आगमोद्धारक-ग्रन्थमालायाः षड्विंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरीश्वरेभ्यो नमः

# आगमोद्धारक-कृतिसन्दोहः

( तस्यायं षष्ठो विभागः )

卐

संशोधकः—

प० पू० गच्छाधिपति-आचार्य श्रीमन्माणिक्यसागरसूरीश्वरशिष्यः

शतावधानी-मुनिलाभसागरः

वीर सं. २४९१    वि. सं. २०२१    आगमोद्धा...

प्रतयः २५० ]    मूल्यम् १-०-०

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

Scanned by CamScanner

+ 5776
198
W - 6878

आगमोद्धारक-ग्रन्थमालायाः षड्विंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

પરમપૂજ્ય ગચ્છાધિપતિ આચાર્યદેવશ્રીની નિશ્રામાં
મુનિશ્રી અશોકસાગરજી મહારાજના
વર્ષીતપનાં પારણા નિમિત્તે
જૈનશ્રીસંઘ- આરાધકોને વેજલપુર
તરફથી સાદર સમર્પણ

संशोधकः—

प० पू० गच्छाधिपति आचार्य श्रीमन्माणिक्यसागरसूरीश्वरशिष्यः
शतावधानी-मुनिलाभसागरः

वीर सं. २४९१ वि. सं. २०२१ आगमोद्धारक सं० १५
प्रतयः २५० ] [ मूल्यम् १-०-०

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

028282

Serving JinShasan
028282
gyanmandir@kobatirth.org

# विषयानुक्रम ।


| क्र. नं. | विषयः | पृष्ठम् |
|---|---|---|
| १ | श्रमणदिनचर्या । | १ |
| २ | जिनमहिमा । | ४२ |
| ३ | कर्मसाम्राज्यम् । | ५६ |
| ४ | गर्भापहारसिद्धिषोडशिका । | ५९ |
| ५ | नग्नाटशिक्षाशतकम् । | ६३ |
| ६ | त्रिपदीपञ्चसप्ततिका । | ७३ |
| ७ | गणधरसार्धशतकसमालोचना । | ८१ |
| ८ | तीर्थपञ्चाशिका । | ८७ |
| ९ | सिद्धषट्त्रिंशिका । | ९५ |
| १० | सिद्धगिरिपञ्चविंशतिका । | १०० |
| ११ | गिरनारचतुर्विंशतिका । | १०५ |
| १२ | गणधरपट्टद्वात्रिंशिका । | ११३ |
| १३ | अनेकान्तवाद विचारः । | ११७ |

---

| | | |
|---|---|---|
| १४ | अमृतसागरमुनिगुणवर्णनम् । | १ |
| १५ | ” कृततीर्थयात्रा । | २० |
| १६ | ” स्तुत्यष्टकम् । | २४ |
| १७ | ” स्तवः । | २६ |


P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# शुद्धिपत्रम्

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २ | १६ | प्रोच्छन | प्रोञ्छन |
| ६ | ५ | कारणाय | करणाय |
| १३ | ६ | सागरि | सागारि |
| १३ | १८ | सङ्घः | सञ्घः |
| ” | १६ | ” | ” |
| १४ | २ | पभिदम | पभिदम् |
| १४ | १० | बध्नाति | बध्नाति |
| १५ | ७ | सङ्घ | सञ्घ |
| १७ | ७ | क्रीत | क्रीतं |
| १६ | २० | तात् | ताद् |
| २४ | १२ | दन चा | दनं चा। |
| २५ | १४ | सङ्घ | सञ्घ |
| २६ | ६ | परिणत | परिणतं |
| २७ | १ | पानष | पानैष |
| २८ | ३ | षट | षट् |
| ३१ | ११ | द्वैती | द्वैँती |
| ३२ | ८ | सङ्घां | सञ्घां |
| ” | १२ | विड | विड् |
| ३३ | २० | करामी | करोमी |
| ३८ | ११ | श्वैत्रे | श्चैत्रे |
| ४३ | १४ | नैवाधो | नाधो |
| ४४ | १४ | दर्शी | दर्शी |
| ४५ | १५ | स्यया | स्वया |
| ” | १६ | स्स्वयं | स्स्वयं |
| ४६ | १२ | चेद्धृदि | चेद्धृदि |
| ५० | ११ | विवुधै | विवुधै |

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
| --- | --- | --- | --- |
| ५१ | १ | कद्रमा | कद्रूमा |
| ” | ७ | श्वेत्ते | श्चेत्ते |
| ५७ | ४ | कम | कर्म |
| ५६ | १५ | सवा | सर्वा |
| ६० | ८ | गोचरे | गोचरं |
| ७२ | १३ | केवत्वे | केवलत्वे |
| ७४ | १२ | विविक्तैषा | विविक्तैषा |
| ७५ | २० | समन्श्नुते | समश्नुते |
| ७६ | ११ | ह्यो ष | ह्यो ष |
| ” | १६ | स्थिति | स्थितिं |
| ” | १७ | सदृशो | सदृशो |
| ७७ | ११ | कुर्यु | कुर्यु |
| ” | १७ | सङ्ख्य | सङ्ख्य |
| ८० | १२ | वाच्यार्थो | वाच्यार्थो |
| ८२ | ६ | तम्य | तस्य |
| ” | २० | देवे | देवै |
| ८३ | १२ | स्यान्ने | स्यान्ते |
| ” | १३ | कूर्व | कूर्च |
| ८४ | ५ | श्रद्धै: | श्राद्धै: |
| ८७ | १७ | सङ्ख्ये | सङ्ख्ये |
| ८८ | ४ | जाव: | जीव: |
| ” | १० | या | यो |
| ८८ | १६ | गिरा | गिरी |
| ” | १७ | वर्यै | वर्यै |
| ” | १८ | मोंच | मोंच |
| ६० | १४ | सुतार्थे | सुतीर्थे |

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ९१ | १७ | उत्सर्गों | उत्सर्गो |
| ९३ | २१ | कर्मं | कर्म |
| ९४ | १३ | स्तार्थ | स्तीर्थ |
| ९५ | १० | सौख्यै | सौख्ये |
| ९६ | २० | चत्वार्पंपि | चत्वार्यपि |
| ९७ | ८ | पंसाम् | पुंसाम् |
| १०० | १५ | जैनो | जैंनो |
| १०१ | १६ | त्साध्यमाप | साध्यमापत् |
| १०४ | १६ | द्राग | द्रागा |
| १०६ | ४ | कशा | कशो |
| ,, | ७ | ऐन्द्रया | ऐन्द्रया |
| ,, | २१ | युंबता | युंक्ता |
| १०७ | १५ | श्वैत्य | श्रैत्य |
| १०९ | २ | नियत | नियतं |
| ११० | ५ | उत्की | उत्की |
| ,, | १५ | ऋषभा | ऋषभा |
| १११ | ७ | विनाताः | विनीता |
| ,, | १४ | श्वकार | अकार |
| ११२ | ५ | शंघ्र | शीघ्र |
| ११३ | १० | वाधे | बोधे |
| ११४ | ३ | सत्व | सत्प्र |
| ,, | ११ | प्रबाधः | प्रबोधः |
| ११५ | ७ | तीथं | तीर्थ |
| ११८ | १ | कश्वि | कश्चि |
| १२० | १६ | कृता | कृत |
| ,, | २० | समाप्ताः | समाप्तः |

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २ | २५ | चीकृतन् | चीकरन् |
| ३ | १६ | सङ्ङ्गं | सञ्ज्ञं |
| ५ | २ | स्तप्रति | स्तत्प्रति |
| ,, | ३ | ममेष | मशेष |
| ,, | १० | आदृतो | आदृतौ |
| ८ | १८ | मतरं | मतरां |
| ,, | २१ | मनाक् | मनाग् |
| ६ | ५ | वाचयमी | वाचंयमी |
| ,, | १७ | वैभव | वैभवं |
| ११ | १६ | व्याख्या | व्याख्या |
| १२ | ४ | सङ्ग | सङ्गः |
| | १६ | भाक | भाक् |
| १४ | १६ | देवर्द्धि | देवर्षि |
| १६ | ११ | लास्तु | लाँस्तु |
| ,, | ११ | निसरयेत् | निरसयेत् |
| ,, | २१ | च यो | चयो |
| १७ | १४ | हमत्या | हनृत्या |
| ,, | १६ | मं | गं |
| ,, | १६ | स्वल्पो | स्वलोभो |
| ,, | २१ | मम्त्र्याद्ये | मन्त्र्याद्यै |
| २४ | ६ | म्भिता | म्भितां |
| ,, | १३ | भावनां | भावनां |
| ,, | १८ | बालकः | बालके |
| २६ | २ | दधत् | दधद् |

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

* णमोत्थु णं समणस्स भगवओ महावीरस्स *

# श्रमण-दिनचर्या।

श्रीवीरः श्रेयसे यस्य, चित्रं स्नेहदशात्यये।
सद्ध्यानदीपोऽदीपिष्ट, जलसङ्गमविप्लवात् ॥१॥

साधूनां दिनकृत्यं, षड्विधमावश्यकं च यतिगृहिणाम्।
अभिधास्ये सङ्क्षेपात्, तत्रादौ दिवसकृत्यमिदम् ॥२॥

सर्वोऽपि साधुवर्गः, पश्चिमयामे निशोऽवबुद्धयेत।
सप्ताष्टनमस्कारानुच्चरमाणोऽप्रमत्तमनाः ॥३॥

कायोत्सर्गं कुर्यादीर्यापथिकाप्रतिक्रमणपूर्वम्।
कुस्वप्नदुःस्वप्नोद्भवजीववधादेर्विशुद्धयर्थम् ॥४॥

तत्रोद्योतांश्चतुरः, स्मरेन्नमस्कृतियुजोऽङ्गनाभोगे।
शक्रस्तवं भणित्वा, वन्देत ज्येष्ठमुनिवर्गम् ॥५॥

कुर्वन्ति स्वाध्यायं, मन्दध्वनिनाऽथवा शुभध्यानम्।
चिन्तयति वा तपोऽभिग्रहादि किमकारि किं नेति ॥६॥

प्राभातिके च काले, विधिनोपात्ते गुरौ प्रबुद्धे च।
ग्लानादिके च कुर्यात्, सम्भूय तथा प्रतिक्रमणम् ॥७॥

पर्यन्ते तस्य यथा, प्रतिलिखिते चोपधौ रविरुदेति।
न यथा च पापजीवा, जाग्रति गृहकोकिलप्रमुखाः ॥८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अत्र क्रमात्प्रतिलिखेन् मुखपटधर्मध्वजौ निषद्ये द्वे ।
पट्टः कल्पत्रितयं, संस्तरकोत्तरपटौ च दश ॥९॥

तत्र प्रमाणतः षोडशाङ्गुला वदनवस्त्रिका कार्या ।
निजनिजमुखमाना वा, ज्ञेयाऽऽदेशो द्वितीयोऽयम् ॥१०॥

सम्पातिमसत्त्वरजोरेणूनां रक्षणाय मुखवस्त्रम् ।
वसतेः प्रमार्जनायां, मुखनासं तेन बध्नन्ति ॥११॥

द्वात्रिंशदङ्गुलमितं, रजोहरणमस्य करमितिर्दण्डः ।
अष्टाङ्गुला दशा अथ, निशीथसमये विशेषोऽयम् ॥१२॥

मानं विंशतिरथवा, षड्विंशतिरङ्गुलानि दण्डस्य ।
दशिकानां तु क्रमतो, द्वादश षट् चाङ्गुलानि स्युः ॥

आदानत्वग्वर्त्तननिक्षेपस्थाननिषदनादिकृते ।
पूर्वप्रमार्जनार्थं, मुनिलिङ्गायेदमानेयम् ॥१४॥

कम्बलमयी निषद्या, दशिकसमेता च सा रजोहरणम् ।
उपरि च तत्पट्टमाने, अधिके वा द्वे निषद्ये स्तः ॥१५॥

तत्रैका क्षौमीया, दशोज्झिता हस्तमानका प्रथमा ।
अपराऽपि हस्तमाना, पादप्रोच्छनमयी ज्ञेया ॥१६॥

द्विगुणश्चतुर्गुणो वा, चतुरस्रः पट्टकः करप्रमितः ।
स्थविरयुवश्रमणकृते, सूक्ष्मे स्थूलेऽपि च विभाषा ॥१७॥

कल्पत्रयं निजाङ्गायामं, सार्धकरयुग्मविस्तारि ।
तत्र द्वौ सूत्रमयावेकस्तूर्णामयो ज्ञेयः ॥१८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

कल्पेन येन भिक्षा, चैत्येगमनं च ततस्तदन्यानि ।
कार्याणि नैव कुर्याद् द्वौ सूत्रमयौ ततो भणितौ ॥१९॥

ध्यानार्थमनलसेवा-तृणग्रहणवारणार्थमुपकारि ।
ग्लानाय कल्पग्रहणं, मृतस्य परिधापनार्थं च ॥२०॥

ऊर्णामये च कल्पे, बहिष्कृते शीतरक्षणं भवति ।
यूका-पनकावश्यायरक्षणं भूषणत्यागः ॥२१॥

सार्द्धौ करौ तु दैर्घ्येऽष्टाविंशत्यङ्गुलानि विस्तारे ।
उत्तरपटसंस्तरकौ, विनोत्तरपटं तु दोषः स्यात् ॥२२॥

साध्व्याः पुनरुपकरणान्यवग्रहानन्तकं तथा पट्टः ।
अर्धोरुकश्चरणिका, तदुपरि चान्तर्निवसनी स्यात् ॥२३॥

षष्ठं बहिर्निवसनी, कञ्चुक उपकक्षिकाऽष्टमं कथितम् ।
वैकक्षिका च नवमं, संघाटी स्कन्धकरणी च ॥२४॥

तत्रावग्रहवसनं, नौसंस्थानं वराङ्गरक्षार्थम् ।
एकं प्रमाणतस्तद्, घनमसृणं देहमाश्रित्य ॥२५॥

पट्टोऽपि भवेदेको, भजनीयो निजशरीरमानेन ।
छादयति गुह्यवसनं, प्रतिबद्धो मल्लकक्षेव ॥२६॥

अर्द्धोरुकोऽपि ते द्वे, गृह्णानश्छादयेत्कटीदेशम् ।
जानुप्रमाण चरणिकाऽपि लङ्खिकाया इवास्यूता ॥२७॥

निजजङ्घाद्धयसी लीनेतरान्तर्गता निवसनी स्यात् ।
बाह्या त्वात्मप्रमाणा, दवरकबद्धा कटीदेशे ॥२८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अस्यूतः कञ्चुककः, स्तनौ यथाऽनुद्धत्तौ समावृणुते ।
उपकक्षिका तु समचतुरस्रा सार्धकरमानैव ॥२९॥

वक्षोदेशं पृष्ठं दक्षिणपार्श्वं स्थिता समावृत्य ।
वामस्कन्धे वीटकप्रतिबद्धा वामपार्श्वे च ।३०॥

तद्विपरीता वैकक्षिकाऽपि वा कञ्चुकं च पिदधाति ।
संघाट्यस्तु चतस्रस्तत्र द्विकरा भवेद्वसतौ ॥३१॥

हस्तत्रयायते द्वे एका भिक्षाकृतेऽपरोच्चारे ।
तुर्या तु निषण्णाऽऽच्छादनी सभायां चतुर्हस्ता । ३२॥

स्कन्धकरणी चतुष्करविस्तरदैर्ध्या चतुष्पुटीकृत्य ।
स्कन्धे ध्रियते प्रावरणस्यानिलधुवनरक्षार्थम् ॥३३॥

कुडभोर्ध्वस्कन्धाधः पृष्ठे संवर्तिता वसनबद्धा ।
क्रियते कुब्जकरिण्यप्येषैव सुरूपसाध्वीनाम् ॥३४॥

अर्धोरुककञ्चुकयोः पट्टेऽपि च दवरिकाश्चरणिकायाम् ।
प्रत्येकं चत्वारो, भवन्ति वैकक्षिकायां षट् ॥३५॥

षट् चोपकक्षिकायां, सर्वेऽष्टाविंशतिर्दवरकाः स्युः ।
एतद्वन्धविशेषाश्चतुर्दशग्रन्थयोऽभिहिताः ॥३६॥

आवश्यके च तुर्ये, विहिते तिमिरे रविप्रभोपहते ।
उत्कटिकासनसंस्थो, मौनी प्रेक्षेत मुखवसनम् ॥३७॥

आभ्यन्तरिकीं पूर्वं प्रेक्ष्य निषद्यां प्रगे ततो बाह्याम् ।
अपराह्णे विपरीतं, प्रेक्षेत रजोहरणदशिकाः ॥३८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

दत्त्वा लघुवन्दनयुगमङ्गप्रतिलेखनां च सन्देश्य ।
मुनिनाऽङ्गप्रेक्षायां प्रतिलिख्यः पट्टको नान्यत् ॥३९॥

साध्व्या तु यथाक्रममथमथप्रहानन्तकादिकं प्रेक्ष्यम् ।
स्थाप्योऽथ नमस्कृत्य प्रतिलिख्य स्थापनाचार्यः ॥४०॥

तदनु प्रेक्ष्य मुखपटं दत्त्वा लघुवन्दनद्वयं विधिना ।
सन्देश्यैकेन तयोरपरेण प्रतिलिखेदुपधिम् ॥४१॥

उदिते सवितरि वसतिं, प्रमृज्य यत्नेन रेणु*पुञ्जमथ ।
संशोध्य कीटकादिकमृतजन्तूँस्तत्र सङ्ख्याय ॥४२॥

सङ्गृह्य च पट्पदिकाश्च्छायायां पुञ्जकं परिष्ठाप्य ।
खेलादिकृते कार्या, मल्लकभूतिर्न चोद्§धृत्य ॥४३॥

निक्षिप्ते पुञ्जादावीर्यापथिकां यतिः प्रतिक्रामेत् ।
यः संसक्तां वसतिं, प्रमार्जयेत् सोऽपि च तथैव ॥४४॥

प्रातः प्रेक्षाद्वितये विहिते वसतिः प्रमृज्यते प्रकटम् ।
अङ्गप्रेक्षानन्तरमपराह्णे मृज्यते वसतिः ॥४५॥

दृष्टिप्रेक्षणपूर्वं प्रमार्जयेद्दण्डकांश्च कुड्यं च ।
भूमिं च रजोहरणेनाभिग्रहिकस्तदितरो वा ॥४६॥

प्रतिलेखनाऽत्र कथिता यत्किल दृष्ट्या निरीक्षणं क्रियते ।
वसनरजोहरणाभ्यां, प्रमार्जनामाहुरर्हन्तः ॥४७॥

---

* पटल । § नैवोद्धृत्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

संशोध्य च हस्तशतं, ज्ञात्वा प्रसवं च योषिदादीनाम् ।
अस्थ्यादि बहिः क्षिप्त्वा, वसतिं शुद्धां प्रवेदयति ॥४८॥

कालग्राही तु मुनिः, प्रेक्ष्य मुखानन्तकं विनयकर्म ।
कृत्वा वसतिं शुद्धां, कालं च गुरोः प्रवेदयति ॥४९॥

उपयुक्तः स्वाध्यायं, प्रस्थापयतेऽत्र वाचनाचार्यः ।
सिद्धान्तोदितविधिना, तदनुज्ञातस्ततः शिष्यः ॥५०॥

शीततु चतुर्मास्यां, प्रेक्ष्य मुखानन्तकं गुरोः पुरतः ।
सन्देश्य च कल्पं ह्रस्ववन्दनाभ्यां परिदधीत ॥५१॥

दत्त्वाऽध्यापकपुरतो, वन्दनकं ह्रस्ववन्दनयुगेन ।
सन्देश्य वाचनामथ, सूत्रमधीयीत मण्डल्याम् ॥५२॥

मण्डल्यः सप्तैताः, सूत्रेष्वर्थे च भोजने काले ।
आवश्यके तथैव, स्वाध्याये संस्तरेऽभिहिताः ॥५३॥

साधुभ्य उपाध्यायो, दत्ते सूत्रस्य वाचनां निपुणः ।
सिंहगिरेः शिष्येभ्यो, वज्रस्वामीव गणनाथः ॥५४॥

कुर्वन्ति स्वाध्यायं, गीतार्था यदुपयोगवेलायाम् ।
स हि दर्शितोऽधुना तैराचारः सूत्रपौरुष्याः ॥५५॥

उपयोगः किल भक्तादिलब्ध्यनुज्ञा ततश्च भङ्गोऽस्य ।
पतितरजोहरणादावन्यजल्पति च किमपि मुनौ ॥५६॥

गुरवे निवेदिते बहुप्रतिपूर्णा पौरुषीति लघुमुनिना ।
पादोनप्रहरे सति, पर्यन्तः सूत्रपौरुष्याः ॥५७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सूत्रेऽनधीतिनां सूत्रगोचरः पौरुषी द्वितीयाऽपि ।
अपवादेऽर्थस्यैव, प्रथमाऽपि गृहीतसूत्राणाम् ॥५८॥

अथ पादप्रोञ्छनकाऽऽसीना दत्त्वा क्षमाश्रमणमेकम् ।
सर्वेऽपि साधवो मुखवसनमनुगुरु प्रतिलिखेयुः ॥५९॥

प्रतिलेखनाक्षणोऽयं, साध्यो यत्नेन लग्नसमय इव ।
अस्मिन्काले स्फिटिते, प्रायश्चित्तं हि कल्याणं ॥६०॥

आगन्तुकसम्मूर्छजजन्तुपरिज्ञानहेतवे प्रथमम् ।
दृक्कर्णनासिकेनोपयोगमनुपात्रकं कुर्यात् ॥६१॥

तिष्ठति किमिह भुजङ्गो, यत्प्रेक्ष्यत एवमिति विवदमानः ।
अत्र किल कोऽपि शैक्षो, देवतया शिक्षयाञ्चक्रे ॥६२॥

पूर्वभवविहितसम्यग्भावप्रतिलेखनामनुस्मृत्य ।
वल्कलचीरिकुमारो, जडोऽपि जातिस्मृतिं लेभे ॥६३॥

आज्ञा जैनीयमिति ज्ञात्वा सप्तविधपात्रनिर्योगम् ।
मुखवसनवत्प्रतिलिखेत् पञ्चाधिकविंशतिस्थानैः ॥६४॥

पात्रे तानि द्वादश, बहिरन्तश्चैककः करस्पर्शः ।
पात्रकनिर्योगोऽयं, यतिसाध्व्योरेक एव स्यात् ॥६५॥

पात्रं पात्रकबन्धः पात्रस्थापनकपात्रकेसरिके ।
पटलानि रजस्त्राणं च, गोच्छकः पात्रनिर्योगः ॥६६॥

चत्वारिंशत्तलपरिधिनाङ्गुलानि प्रमाणमिह मध्यम् ।
पात्रेऽस्मादपि हीनं, जघन्यमुत्कृष्टमधिकं तु ॥६७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

यस्माद्भवन्ति जीवाः, केषुचिदन्नेषु पानकेषु ततः ।
तेषां रक्षाहेतोः, पात्रग्रहणं जिनैरिष्टम् ॥६८॥

पात्रकबन्धे मानं, पात्रकमानेन भवति कर्त्तव्यम् ।
ग्रन्थौ यथाकृते सति, भवन्ति चतुरङ्गुलाः कोणाः ॥६९

पात्रप्रतिलेखिन्या, विज्ञेया षोडषाङ्गुलानि मितिः ।
इदमेव मानमुक्तं, पात्रस्थापनकगोच्छकयोः ॥७०॥

षट्त्रिंशद्विस्तारे, पटलानामङ्गुलानि दैर्ध्ये तु ।
षष्टिरथवा प्रमाणं, स्वशरीरात् पात्रतो वाऽपि ॥७१॥

तानि कदलीदलाभान्युत्तममध्यमजघन्यतस्त्रीणि ।
प्राणिगणकरक्षार्थं, निदाघहेमन्तवर्षासु ॥७२॥

ग्रीष्मे स्युस्त्रिचतुष्पञ्चसङ्ख्यया तानि शीतकाले तु ।
चत्वारि पञ्च षट् चाथ, पञ्च षट् सप्त वर्षासु ॥७३॥

क्रामति मध्ये चतुरङ्गुलं यथा पात्रकं प्रदक्षिणयत् ।
तावत् प्रमाणमुक्तं, जिनै रजस्त्राणमनुपात्रम् ॥७४॥

क्रोशयुगाऽऽगतसाधोः, सूपादिभृतेन यावता तृप्तिः ।
तावन्मात्रं मात्रकमस्य च वर्षासु परिभोगः ॥७५॥

पात्रकनियोगोऽयं, मात्रककल्पत्रये रजोहरणम् ।
मुखवस्त्रनपट्टकाविति, चतुर्दशोपकरणानि मुनेः ॥७६॥

एतानि विना पट्टकमवग्रहानन्तकादि हस्सङ्ख्यम् ।
एकं च कमठकमिति, व्रतिनीनां पञ्चविंशतिधा ॥७७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

यष्टिर्वियष्टिदण्डौ, विदण्डको नालिका कटित्रं च ।
संस्तारकोत्तरपट्टावित्याद्यौपग्रहिक उपधिः ॥७८॥

यष्टिर्निजदेहमितिस्तया यवनिका निबध्यते वसतौ ।
अङ्गुलचतुष्टयेन, न्यूना यष्टेर्वियष्टिः स्यात् ॥७९॥

क्वाप्यज्ञातजलाश्रयमानादेः कारणाय धार्येत ।
ऋतुबद्धकालयोग्यो, दण्डः स्कन्धप्रमाणेन ॥८०॥

वर्षासु वृष्टिसमये, कक्षामात्रो विदण्डको ग्राह्यः ।
स हि नीयते लघुत्वात्, कल्पान्तरितो जलभयेन ॥८१॥

अङ्गुलचतुष्टयेनाधिकप्रमाणा स्वदेहतो नाली ।
नद्यादिजलोत्तारे, तया तलं ज्ञायते पयसः ॥८२॥

पर्वैकमत्र भव्यं, कलहाय द्वे धनाय च त्रीणि ।
मरणाय चतुष्पर्वी च पञ्चपर्वाऽध्वकुशलाय ॥८३॥

रोगकृते षट्पर्वा, मान्द्योच्छेदाय सप्तपर्वा सा ।
अष्टचतुरङ्गुला त्वन्तमूलयोर्मत्तगजजयिनी ॥८४॥

सम्पच्छिदेऽष्टपर्वा यशांसि यष्टिर्ददाति नवपर्वा ।
ऋद्धिकरी दशपर्वा, प्रवृद्धपर्वा विशेषेण ॥८५॥

कुटिला कीटकजग्धा, दग्धा शुषिरा विचित्रवर्णा या ।
सा यष्टिरूर्ध्वशुष्का च, वर्जनीया प्रयत्नेन ॥८६॥

घनवर्धमानपर्वा, वर्णे स्निग्धा तथैकवर्णा या ।
सा मसृणवृत्तपर्वा, यष्टिर्योग्या यतिजनस्य ॥८७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

हस्तप्रमिति कटित्रं, चतुरस्रं तत्पुनः प्रदीपनके ।
वृत्त्याद्युपरि क्षिप्त्वा, सुखेन निष्क्रम्यते स्थानात् ।८८।

तदनन्तरं प्रमृज्य, स्थानं न्यस्येन्निषद्ययोर्द्वितयम् ।
एका योग्या सूरेरपराऽक्षाणां निवेशाय । ८९॥

सविधे विधाय मात्रकयुगं गुरोः खेलकायिकायोग्यम् ।
वन्दनकं च विधायोत्सर्गः कार्योऽनुयोगार्थम् ॥९०॥

अनुयोगे प्रारब्धे प्रत्याख्यानं न दीयते यत्र ।
तत्रान्यस्य मुनीनां, वार्त्ताप्रमुखस्य का वार्त्ता ? ।९१॥

आचार्याः सूत्रार्थं, प्रपञ्चयन्ति द्वितीयपौरुष्याम् ।
विधिनाऽऽर्यरक्षिता इव, दुर्बलिकापुष्पमित्राय ॥९२॥

अनुयोगश्च चतुर्धा, तत्राद्यश्चरणकरणविषयः स्यात् ।
धर्मकथाया अपरो, द्वौ गणितद्रव्यविषयौ स्तः ॥९३।

स्युस्ते च कालिकश्रुतमृषिभाषितसूत्रमृषिभिरुपदिष्टम् ।
सूर्यप्रज्ञप्तिश्रुतमनुक्रमाद् दृष्टिवादश्च ॥९४॥

वाचयति यत्र सूत्रं, पाठयिता यत्र चार्थमाचार्यः ।
कथयति तत्र विदधते, कायोत्सर्गं रहो धीराः ॥९५॥

वन्दनकदानपूर्वमनुयोगविसर्जनार्थमुत्सर्गम् ।
उच्छ्वासाष्टकमानं, कुर्यादन्तेऽर्थपौरुष्याः ॥९६॥

गत्वाऽथ जिनायतने, देवान् वन्देत जिनपतेः पुरतः ।
भूतेष्टाष्टम्योस्तु, स्तुत्याः सर्वे जिना मुनयः ॥९७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

गोचरचर्याकालो, यो यस्मिन् भवति तत्र साध्यः सः ।
कुर्यात् सूत्रार्थगते, पौरुष्यौ तदनुसारेण ॥९८॥

यामद्वयपर्यन्ते, देशाद्यनुरोधतोऽन्यदा वाऽपि ।
मुखवस्त्रिकां प्रतिलिखेद्द्याल्लघुवन्दनं चैकम् ॥९९॥

गुरुमापृच्छ्य विहर्तुं, यामीति प्रेक्ष्य पात्रमादेयम् ।
उपयोगस्तु प्रातर्विहितो बालाद्यनुग्रहतः ॥१००॥

आवश्यकीं भणित्वा, भवोपयुक्त इति गुरुवचः श्रुत्वा ।
इच्छामीत्युक्त्वाऽथ, स्मर्त्तव्यो गौतममुनीन्द्रः ॥१०१॥

वामा च दक्षिणा वा, नाडी यत्रानिलो वहति पूर्णः ।
पवनग्रहणं कुर्वन्, पुरतो विदधीत तत्पादम् ॥१०२॥

वसतेर्निर्यन् भूमेरुत्क्षिप्य व्योम्नि दण्डकः कार्यः ।
लब्धे प्रथमे पिण्डे, मुञ्चेद्वर्निं ततो नार्वाक् ॥१०३॥

इत्येवं समिताऽऽत्माऽऽत्मना द्वितीयोऽशनादिकनिमित्तम् ।
गोचरचर्यां प्रविशेद् ऋजुगत्याद्यष्टवीथिभिः ॥१०४॥

ऋज्वी१ गत्वा प्रत्यागतिका२ गोमूत्रिका३ पतङ्गाख्या४ ।
पेटा५ तथार्धपेटा६ शम्बूका७न्तर्बहिर्द्विविधा८ ॥१०५॥

तत्राद्यायां वसते ऋजुगत्या याति भिक्षमाणः सन् ।
समपङ्क्तिचरमगेहाद्वलति तु भिक्षामगृह्णानः ॥१०६॥

यस्यां तु भिक्षयित्वा, गृहपङ्क्तौ तन्निवर्त्तमानः सन् ।
अटति द्वितीयपङ्क्तौ, गत्वा प्रत्यागतिः सा स्यात् १०७

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

हस्तप्रमिति कटित्रं, चतुरस्रं तत्पुनः प्रदीपनके ।
वृत्त्याद्युपरि क्षिप्त्वा, सुखेन निष्क्रम्यते स्थानात् ।८८।

तदनन्तरं प्रमृज्य, स्थानं न्यस्येन्निषद्ययोर्द्वितयम् ।
एका योग्या सूरेरपराऽक्षाणां निवेशाय । ८९॥

सविधे विधाय मात्रकयुगं गुरोः खेलकायिकायोग्यम् ।
वन्दनकं च विधायोत्सर्गः कार्योऽनुयोगार्थम् ॥९०॥

अनुयोगे प्रारब्धे प्रत्याख्यानं न दीयते यत्र ।
तत्रान्यस्य मुनीनां, वार्त्ताप्रमुखस्य का वार्त्ता ? ।९१॥

आचार्याः सूत्रार्थं, प्रपञ्चयन्ति द्वितीयपौरुष्याम् ।
विधिनाऽऽर्यरक्षिता इव, दुर्बलिकापुष्पमित्राय ॥९२॥

अनुयोगश्च चतुर्धा, तत्राद्यश्चरणकरणविषयः स्यात् ।
धर्मकथाया अपरो, द्वौ गणितद्रव्यविषयौ स्तः ॥९३।

स्युस्ते च कालिकश्रुतमृषिभाषितसूत्रमृषिभिरुपदिष्टम् ।
सूर्यप्रज्ञप्तिश्रुतमनुक्रमाद् दृष्टिवादश्च ॥९४॥

वाचयति यत्र सूत्रं, पाठयिता यत्र चार्थमाचार्यः ।
कथयति तत्र विदधते, कायोत्सर्गं रहो धीराः ॥९५॥

वन्दनकदानपूर्वमनुयोगविसर्जनार्थमुत्सर्गम् ।
उच्छ्वासाष्टकमानं, कुर्यादन्तेऽर्थपौरुष्याः ॥९६॥

गत्वाऽथ जिनायतने, देवान् वन्देत जिनपतेः पुरतः ।
भूतेष्टाष्टम्योस्तु, स्तुत्याः सर्वे जिना मुनयः ॥९७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

गोचरचर्याकालो, यो यस्मिन् भवति तत्र साध्यः सः ।
कुर्यात् सूत्रार्थगते, पौरुष्यौ तदनुसारेण ॥९८॥

यामद्वयपर्यन्ते, देशाद्यनुरोधतोऽन्यदा वाऽपि ।
मुखवस्त्रिकां प्रतिलिखेद्द्यान्लघुवन्दनं चैकम् ॥९९॥

गुरुमापृच्छ्य विहर्तुं, यामीति प्रेक्ष्य पात्रमादेयम् ।
उपयोगस्तु प्रातर्विहितो बालाद्यनुग्रहतः ॥१००॥

आवश्यकीं भणित्वा, भवोपयुक्त इति गुरुवचः श्रुत्वा ।
इच्छामीत्युक्त्वाऽथ, स्मर्त्तव्यो गौतममुनीन्द्रः ॥१०१॥

वामा च दक्षिणा वा, नाडी यत्रानिलो वहति पूर्णः ।
पवनग्रहणं कुर्वन्, पुरतो विदधीत तत्पादम् ॥१०२॥

वसतेर्निर्यन् भूमेरुत्क्षिप्य व्योम्नि दण्डकः कार्यः ।
लब्धे प्रथमे पिण्डे, मुञ्चेदवनिं ततो नार्वाक् ॥१०३॥

इत्येवं समिताऽऽत्माऽऽत्मना द्वितीयोऽशनादिकनिमित्तम् ।
गोचरचर्यां प्रविशेद् ऋजुगत्याद्यष्टवीथिभिः ॥१०४॥

ऋज्वी१ गत्वा प्रत्यागतिका२ गोमूत्रिका३ पतङ्गाख्या४ ।
पेटा५ तथार्धपेटा६ शम्बूका७न्तर्बहिर्द्विविधा८ ॥१०५॥

तत्राद्यायां वसते ऋजुगत्या याति भिक्षमाणः सन् ।
समपङ्क्तिचरमगेहाद्वलति तु भिक्षामगृह्णानः ॥१०६॥

यस्यां तु भिक्षयित्वा, गृहपङ्क्तौ तन्निवर्त्तमानः सन् ।
अटति द्वितीयपङ्क्तौ, गत्वा प्रत्यागतिः सा स्यात् १०७

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

वामाद्दक्षिणगेहे, दक्षिणगेहाच्च भिक्षते वामम् ।
गोमूत्रिका मता सा, पतङ्गवीथिस्त्वनियता स्यात् ॥१०८॥

मध्यं विना चतुर्दिक्षु भिक्षते यत्र सा भवेत् पेटा ।
द्विद्वयसम्बन्धिश्रेणिभिक्षणे त्वर्धपेटा स्यात् ॥१०९॥

अभ्यन्तरशम्बूका, यस्यां क्षेत्रस्य मध्यतो भिक्षाम् ।
भ्राम्यन् बहिर्विनिसरति, शङ्खवृत्तत्वगमनेन ॥११०॥

सा तु बहिः शम्बूका, यस्यां भिक्षां भ्रमन् बहिर्देशात् ।
क्षेत्रस्यान्तः प्रविशत्येवं वीथ्यो मता अष्टौ ॥१११॥

पिण्डः शय्या वस्त्रं पात्रं तुम्बादिकं चतुर्थं तु ।
नैवाकल्प्यं गृह्णात, कल्पनीयं सदा ग्राह्यम् ॥११२॥

पिण्डैषणां च पानकशय्यापात्रैषणां न योऽधिजगे ।
तेनाऽऽनीतं मुनिना, न कल्पते भक्तपानादि ॥११३॥

देशोनपूर्वकोटिं, विहरन्निश्चितमुपोषितः साधुः ।
निर्दोषपिण्डभोजी, ततो गवेष्यो विशुद्धोऽन्धः ॥११४॥

नूनमचारित्री मुनिरशोधयन् पिण्ड-वसति-वस्त्रादि ।
चारित्रे पुनरसति, प्रव्रज्या निष्फला भवति ॥११५॥

पिण्डः शरीरमुक्तं, तस्योपष्टम्भहेतुरिति पिण्डः ।
द्रव्यमपि समयरूढैरेकोऽनेकश्च स द्वेधा ॥११६॥

अशनाद्याश्चत्वारो, वस्त्रं पात्रं च कम्बलं सूची ।
क्षुरपादप्रोञ्छनके, नखरदनी कर्णशोधनकम् ॥११७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

शय्यातरपिण्डोऽयं, लिङ्गस्थस्योज्झतस्तद्ददतो वा ।
चारित्रिणोऽप्यचारित्रिणोऽपि वर्ज्यो रसापणवत् ।११८।

प्राभातिकमावश्यकमन्यत्र विधीयते यदि सुविहितैः ।
यदि जाग्रियते च तदा ग्राह्योऽयं द्वादशविधोऽपि ।११९।

श्रीवृषभवीरवर्ज्यं, जिनैर्विदेहोद्भवैश्च लेशेन ।
अपि कर्म वलिभतं, पिण्डः सागरिकस्यायम् ॥१२०॥

अशिवे रोगे च भये, निमन्त्रणे दुर्लभे तथा द्रव्ये ।
प्रद्वेषे दुर्भिक्षेऽनुज्ञातं ग्रहणमप्यस्य ॥१२१॥

अस्यापि ग्राह्यमिदं, डगलकभस्मकतृणानि रक्षादि ।
सोपधिशैक्षः शय्यासंस्तरकौ पीठलेपादि ॥१२२॥

पादप्रोञ्छनमशनादिचतुष्कं वस्त्रकम्बलौ पात्रम् ।
इति नृपपिण्डोऽष्टविधो, वर्ज्यः प्रथमान्त्यजिनसमये ॥

तस्य हि पिण्डो वर्ज्यो यो राज्यं पञ्चभिः सह करोति ।
नृपतिकुमारामात्याः, सेनाधिपतिः पुराध्यक्षः ॥१२४॥

अत्र हि गवेषणायां, ग्रहणे ग्रासे त्रिधैषणा भवति ।
द्वात्रिंशद्दश पञ्च च, दोषा आसां क्रमेण स्युः ॥१२५॥

आधाकर्मिकमौद्देशिकं२ तथा पूतिकर्म३ मिश्रं४ च ।
स्यात् स्थापना५ तथा प्राभृतिका६ प्रादुष्करणसञ्ज्ञः७ ॥

क्रीत८मपमित्यसञ्ज्ञः९ परिवर्त्तित१० मभिहृतं११ तथोद्भिन्नम्१२
मालापहृतं१३ च भवेदाच्छेद्याख्यो१४ ऽनिसृष्टश्च१५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अध्यवपूरक१६ इत्युद्गमाभिधाना भवन्त्यमी दोषाः ।
षोडश गृहस्थविहिता एषां क्रमतः स्वरूपमिदम् ॥१२८॥
आधाऽशनादिकर्म्मणिधानं साधवे तया क्रियते ।
यत्पाकादि तदाधा-कर्माहारोऽपि तद्योगात् ॥१२९॥
आधाय मुनिं प्रणिधाय क्रियते यत् सचेतनमचित्तम् ।
पाको यदचित्तस्य च, निरुक्तितश्शतस्तथा तदपि ॥१३०॥
यद्वाऽधः कर्म मुनिं नरकेऽधः संयमाच्च कुरुते यत् ।
आत्मघ्नं वा तद् यत्, कर्मभुजो हन्ति चरणं स्वम् ।१३१॥
स्पृष्टादिना प्रकृत्यादिना च साधुर्यदप्रशस्तानि ।
आत्मा कर्माण्यष्टौ, बध्नाति तदात्मकर्म स्यात् ।१३२।
विष्ठावमथुगवामिषसममिदमिति पात्रमपि युतं तेन ।
पूर्वं करीषघृष्टं, कृतत्रिकल्पं च कल्प्यं स्याद् ॥१३३॥
चरणोपघातकत्वादस्यास्ति मुनेर्न चौघतो ग्रहणम् ।
अपवादपदे त्वस्ति, द्रव्याद्याश्रित्य यत उक्तम् ॥१३४॥
"संथरणंमि असुद्धं, दुण्हवि गिण्हंतदिंतयाणऽहियं ।
आउरदिट्ठंतेणं, तं चेव हियं असंथरणे" ॥१३५॥
उद्देशः साध्वादिप्रणिधानं तत्प्रयोजनं तेन ।
निर्वृत्तं चौद्देशिकमोघेन विभागतो द्वेधा ॥१३६।
कश्चिदनुभूतदुर्भिक्षबुभुक्षः प्राप्तकालसौख्यः सन् ।
स्वार्थारब्धे पाके, प्रचुरतरांस्तन्दुलान् क्षिप्त्वा ॥१३७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

कन्यपि भिक्षा दत्ते, पुण्यार्थं यावदर्थिकेभ्यो यत् ।
ओघेन स्वपरपृथक् प्रविभजना भावरूपेण ॥१३८॥

ओघेन तदौद्देशिकमथ वीवाहादिपूद्धरितमन्नम् ।
यत् कल्पितं पृथग् दातुमभिहितं तद्विभागेन ॥१३९॥

उद्दिष्टं च कृतं कर्म, तत्त्रिधा तत्र कथितमुद्दिष्टम् ।
यत् स्वार्थसिद्धमशनं, शेषं दातुं पृथगकल्पि ॥१४०॥

तदभिदधे कृतसङ्ख्रकमुद्धरितं यत् सदोदनप्रमुखम् ।
भिक्षार्थिभ्यो दातुं, कृतं करम्भादिरूपतया ॥१४१॥

मोदकचूर्णिप्रमुखं, शेषं यन्मोदकादिरूपतया ।
क्रियते पुनरपि गुडपाकदानमुख्येन तत्कर्म ॥१४२॥

त्रिविधमपि प्रत्येकमिह विभागौद्देशिकं चतुर्भेदम् ।
उद्देशसमुद्देशावादेशोऽपि च समादेशः ॥१४३॥

क्रमतोऽपि यावदर्थिकपाखण्डिश्रमणवर्गनिर्ग्रन्थान् ।
सङ्कल्प्य दानविषयानुद्देशाद्या अमी भेदाः ॥१४४॥

अस्मिन् द्वादशभेदेऽष्टासु स्वार्थकृतमेव संस्क्रियते ।
पूर्वत्र तु साध्वर्थं, कृतमित्यनयोर्विशेषोऽयम् ।१४५।

अविशोधिकोटिभक्ताद्यवयवसम्पर्कतो विशुद्धं यत् ।
पूतीभूतं भक्तं, क्रियते तत्पूतिकर्म स्याद् ॥१४६॥

प्रथमदिवसे तदाधाकर्म स्यात् साधवेऽथ यत् क्रियते ।
कर्मांशयुतं पात्रं, त्याज्यं दिवसत्रयं पूतेः ॥१४७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अशुचिलवेनेवाधाकर्मांशेनापि युक्तमशनादि ।
शुद्धमपि भवति पूति, त्याज्यं तस्मादिनत्रितयम् ।१४८।
तद्द्वैधैकं सूक्ष्मं, यद्युक्तं कर्म गन्धधूमाद्यैः ।
तददुष्टं स्थूलं स्यात्, द्विधोपकरणेऽशनादौ च ॥१४९॥
तत्राधाकर्मवत्पात्राद्युपकरणसंस्थितं प्रथमम् ।
तत्कल्प्यं यदि तेभ्यः, पृथक्कृतं स्वार्थतो गृहिणा ।१५०।
पात्रान्तरे विनिहितं, कर्माशनपानलेशलिप्ते यत् ।
तत्पूत्यशुद्धमथ पिठरकादिकल्पत्रये शुद्धम् ॥१५१॥
स्वार्थाय यावदर्थिकपाखण्डिकयतिकृते च मिश्रतया ।
यत्प्रथममुपस्क्रियते, त्रिविधं तन्मिश्रजातं स्यात् ।१५२।
स्थापना त्रिविधाऽऽधारकालद्रव्यविभेदतः ।
द्वौ द्वौ भेदौ मतौ तस्यास्त्रिविधाया अपि क्रमात् ।१५३।
साध्वर्थे स्वस्थाने, चुल्लीस्थाल्यादिकेऽपरे स्थाने ।
सुस्थितकपटलकादौ, यद् देयं स्थाप्यते वस्तु ॥१५४॥
साधारतोऽथकालात्, यावद् द्रव्यस्थितिं चिराद् ज्ञेया ।
अपरा त्वित्वरकालं, गृहत्रितयमन्तरा कल्प्या ।।१५५।।
द्रव्यतया तु द्विविधा, क्षीरादिपरम्परा भवेदेका ।
अपरा त्वनन्तरस्थापना यदाऽल्पादिकं ध्रियते ॥१५६॥
स्वल्पारम्भा सूक्ष्मा, प्राभृतिका बादरा महारम्भा ।
प्रत्येकं चोपष्कणावष्कणतया तथा द्वेधा ॥१५७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अत्र मुनिदानसमये, परतोऽर्वाग्गर्भकादि भोजयति ।
कुरुते परतोऽर्वाग्वा, लग्नं गुर्वागमनसमये ॥१५८॥

प्रादुष्करणं द्विविधं, प्रकाशनं प्रकटनं यदशनादेः ।
साध्वर्थं छिद्रगवाक्षदीपमण्यादिभिः प्रथमम् ॥१५९॥

प्रकटीकरणं त्वपरं, चुल्ल्यादेर्यस्य वा बहिष्करणम् ।
संतमसि गृहे यतीनां, चक्षुर्विषयं भवति येन ॥१६०॥

क्रीतं चतुर्विधं तत्रात्मधनक्रीतमिह परस्माद्यत् ।
आवर्ज्य तीर्थशेषाद्यर्पणतो गृह्यते वस्तु ॥१६१॥

अपरं तदात्मभावक्रीतं परिगृह्यते यदाक्षिप्य ।
स्वयमेव धर्मकथनादिरूपभावेन भक्तादि ॥१६२॥

यद् गृहिणा साध्वर्थं, सचेतनाचित्तमिश्रभावेन ।
क्रीतं भक्तादि परद्रव्यक्रीतं तृतीयं तत् ॥१६३॥

तत्परभावक्रीतं, यन्मङ्खादिः परो मुनिनिमित्तम् ।
आवर्ज्य जनं गृह्णाति, निजकलारूपभावेन ॥१६४॥

आदाय यत्परस्मादुद्यतकं दीयते यतिजनाय,
अपमित्यं तत्प्रामित्यं वा दोषस्त्वयं ज्ञेयः ॥१६५॥

स्थानद्विगुणिकया किल, कस्याश्चित्तैलकर्षमुद्यतकम् ।
आनीय काऽपि मुनये, दत्त्वा निःस्वाऽऽप दासत्वम् ॥

परिवर्त्तितं यदाज्यादि द्रव्यं साधवे परावर्त्य ।
तद्द्रव्यान्यद्रव्यैर्दत्तं दोषोऽत्र कलहादि ॥१६७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

स्वपरग्रामानीतं, यतयेऽभिहृतं द्विधेह तत्रैकम् ।
अज्ञातमभिहृततया, प्रच्छन्नं प्रकटमितरस्तु ॥१६८॥
आचीर्णं त्वानीतं, हस्तशतान्तर्गृहत्रितयमध्ये ।
तत्रैकस्मिन् भिक्षाग्राह्युपयुक्तो द्वयोरपरः ॥१६९॥
उद्भिन्नं द्वेधा स्यात्तत्र जतुच्छगणकादिपिहितं सत् ।
उद्घाट्यते मुनिकृते, तत्पिहितोद्भिन्नमतिदुष्टम् ॥१७०
तत्तु कपाटोद्भिन्नं, यद्दत्तकपाटकेऽपवरकादौ ।
मुनिदानाय कपाटावुद्घाट्य गुडादिकं दत्ते ॥१७१॥
ऊर्ध्वाध उभयतिर्यग्देशे विषमे स्थितं तु भक्तादि ।
करदुर्ग्राह्यं दत्ते, मालापहृतं चतुर्भेदम् ॥१७२॥
तत्रोर्ध्वं शिक्यकगृहमालाद्यधस्तु भूमिगृहमुख्यम् ।
उभयं मञ्जूषा–कोष्ठकादि तिर्यग्गवाक्षादि ॥१७३॥
आच्छेद्यं भृत्य१ कुटुम्ब२ सहचरेभ्य३ स्त्रिधा यदाच्छिद्य ।
दत्ते स्वामी राजा, प्रभुर्गृहेशश्च दस्युश्च ॥१७४॥
दिशति बहुस्वाधीनं, यदेक एवानिसृष्टमाहुस्तत् ।
तत्साधारणचोल्लगजड्डभिदाभिस्त्रिधा तत्र ॥१७५॥
आनीय हट्टगेहादिस्थं साधारणं ददात्येकः ।
तिलकुट्टितैलवसनाशनादिकं तद्भवेदेकम् ॥१७६॥
गोष्ठिकभक्तं चोल्लकमेकस्य प्रविशतो द्वितीयं तत् ।
जड्डस्तु गजस्तद्भक्तमिभनृपादत्तमपरं स्यात् ॥१७७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

स्वार्थारब्धे पाकेऽधिकतरतन्दुलादि यत् क्षिपति ।
आश्रित्य यावदर्थिकयतिपाखण्डिकसमागमनम् ॥१७८॥

सोऽध्यवपूरकदोषोऽमी दोषाः षोडशोद्गमाभिख्याः ।
पिण्डोत्पत्तिमिहोद्गममाहुस्तद्गोचरा एते ॥१७९॥

भेदैर्धात्रीत्वादिभिरुपार्जनं मूलशुद्धपिण्डस्य ।
उत्पादनोच्यते तद्विषया दोषा यतिकृताः स्युः ॥१८०॥

धात्री१ दूती२ निमित्ता३ ऽऽजीव४ वनीपका५ श्चिकित्सा६ च ।
क्रोधो७ अथ मानविषयो८ मायापिण्डश्च नवमः स्यात् ॥

लोभश्च१० पूर्वपश्चात्संस्तव११ विद्य१२ च मन्त्रचूर्णौ च१३-१४ ।
योगो १५ ऽथ मूलकर्म च, षोडश दोषा इमे तत्र ॥१८२

धात्रीपिण्डोऽसौ यल्लभते साधुर्विधाप्य कृत्वा वा ।
बालस्य पयोमज्जनमण्डनरमणाङ्कधात्रीत्वम् ॥१८३॥

यस्तु मिथः सन्देशं, कथयित्वा प्राप्यते निजे ग्रामे ।
मुनिनाऽन्यग्रामे वा, दूतीपिण्डः स विज्ञेयः ॥१८४॥

दूती त्वेका प्रकटा, प्रच्छन्नाऽन्या द्विधा द्वितीया स्यात् ।
लोकोत्तरविषयाऽऽद्या, द्वितीयसाधोरपि च्छन्ना ॥१८५॥

या तु द्वितीयसांघाटिकसाधोरपि जनस्य च च्छन्ना ।
द्वैतीयिका भवति सा लोकलोकोत्तरच्छन्ना ॥१८६॥

सुखदुःखादिकविषयेऽतीतादिनिमित्तकथनतः साधुः ।
आवर्जितात् जनाद् यल्लभते स निमित्तपिण्डः स्यात् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

तत्तद्गुणमात्मानं, वदतो जातिकुलकर्मशिल्पतया ।
याऽऽजीविका मुनेरत्र, पञ्चधाऽऽजीवपिण्डोऽसौ ॥१८८॥

श्रमणादिभक्तगृहिणां, पुरतस्तद्वर्णनादिना मुनिना ।
यो याच्यते स पिण्डोऽप्युक्तोऽत्र वनीपकत्वेन ॥१८९॥

भैषज्यवैद्यसूचा, सूक्ष्मैकाऽन्या स्वयं भिषग्वचनम् ।
एतद्विधचिकित्सालब्धेः पिण्डोऽपि तद्रूपः ॥१९०॥

शापादिक्रोधफलं, ज्ञात्वा यो दीयते भयाद् गृहिणा ।
मुनये तद्धेतुतया, क्रोधाभिख्यः स पिण्डोऽपि ॥१९१॥

एवं स मानपिण्डो, यस्मिन् गृहिणं तथा चटापयति ।
मुनिरभिमानेन यथा, दत्तेऽनिच्छत्यपि सुतादौ ॥१९२॥

यत्परवञ्चनहेतोः, कृत्वा रूपान्तरादिकं साधुः ।
अर्जयति मोदकाद्यं, मायाहेतुः स पिण्डः स्यात् ॥१९३॥

स तु भवति लोभपिण्डः गृद्ध्या यल्लभ्यते रसोपेतम् ।
यद्वा खण्डादिपयःप्रभृतिकसंयोजनाहेतोः ॥१९४॥

एषु च घृतपूरक्षपकसेविकाक्षुल्लकौ कषायेषु ।
ज्ञातान्यार्याषाढश्च सिंहकेसरमुनिः क्रमतः ॥१९५॥

द्वेधा संस्तव उक्तो, वचनात् सम्बन्धतश्च तत्राद्यः ।
गुणवर्णनरूपोऽन्यो, जननीस्वस्रादिकल्पनया ॥१९६॥

एकैकोऽपि द्विविधः, पूर्वं पश्चाच्च तत्र पूर्वं सः ।
यत्पूर्वमेव देयेऽलब्धे गुणकीर्त्तनं क्रियते ॥१९७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

एतद्विपरीतोऽन्योऽथ पूर्वपश्चान्धिसंस्तवस्त्वेवम् ।
यन्मात्रादेः कल्पनमितरः श्वश्र्वादिकल्पनया ॥१९८॥
विद्या जपादिसाध्या, प्रज्ञप्तिप्रमुखदेव्यधिष्ठाना ।
अक्षररूपा तस्याः, प्रयोगतो भवति तत्पिण्डः ॥१९९॥
एवंभूतो मन्त्रोऽप्यधिष्ठितः पुरुषरूपदेवतया ।
सिद्धश्च पठनमात्रात्तदर्जितो मन्त्रपिण्डः स्यात् ॥२००॥
नयनाञ्जनादिरन्तर्धानादिफलो निगद्यते चूर्णः ।
सौभाग्यादिविधायी, योगः पादप्रलेपादिः ॥२०१॥
एतद्व्यापारणतः, सम्प्राप्तौ योगचूर्णपिण्डौ स्तः ।
बहिरुपयोगी चूर्णो, योगो बहिरन्तरुपयोगी ॥२०२॥
मूलमिव संसृतितरोः, कर्म तु सावद्ययोगकरणं च ।
गर्भाधानस्तम्भनपाताद्यं मूलकर्म स्यात् ॥२०३॥
तत्करणेन प्राप्तः, पिण्डोऽप्येवमिति दोषषोडशकम् ।
इत्थं गवेषणायां, द्वात्रिंशन्मीलिताः सर्वे ॥२०४॥
अथ शङ्किताख्यदोषो, म्रक्षित-निक्षिप्त-पिहितदोषाश्च ।
संहृत-दायकदोषावुन्मिश्रोऽपरिणतो लिप्तः ॥२०५॥
छर्दित इति दश दोषास्तत्राहारादि दीयमानं यत् ।
दृष्ट्वा प्रचुरं शङ्कितमाधाकर्मादिदुष्टतया ॥२०६॥
ग्रहणेऽपि शङ्कितो भोजनेऽपि चेत्यादिभङ्गकचतुष्कम् ।
यच्छङ्कते तमाप्नोति त्रिषु चरमस्तु शुद्धः स्यात् ॥२०७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

द्वेधा म्रक्षितमुक्तं, सचित्ततोऽचित्ततः तत्राद्यम् ।
मात्रककरादि भूजलवनस्पतिम्रक्षितं त्रिविधम् ॥२०८॥

द्वेधाऽचित्तम्रक्षितमेकं कल्प्यं घृतादिसंसक्तम् ।
अपरं तु लोकनिन्दितवसादिना म्रक्षितमकल्प्यम् ।२०९

चिद्रूपकायषट्कान्यतरोपरि संस्थितं तु निक्षिप्तम् ।
षड्विधमपि तदनन्तरपरम्पराभ्यां द्विभेदं स्यात् ॥२१०

तत्र सचित्ताद्य(व्य)वधानस्थितमशनाद्यनन्तरं ज्ञेयम् ।
यत्तु सचित्तोपरि पिठरकादिनिक्षिप्तमितरस्तत् ॥२११॥

यदनन्तरनिक्षिप्तं, यतिनां तत्कल्पनीयमेव(न) स्यात् ।
संघट्टादि त्यजतां, यतनया ग्राह्यमप्यपरम् ॥२१२।

एवं पिहितमपि सचित्त-कायषट्केन षड्विधं स्थगितम् ।
नवरमचित्तस्थगिते भङ्गचतुष्कं त्रिदं ज्ञेयम् ॥२१३॥

गुरुकं पिहितं गुरुकेण, गुरु लघुकेन लघु च गुरुकेण ।
लघुकं लघुकेनैषु, द्वितीयतुर्यौ न दुष्टौ स्तः ॥२१४॥

क्षिप्त्वाऽन्यत्रायोग्यं, मात्रादेयं ददाति तेन यदि ।
तत्संहृतं सचित्ते, क्षिपति सचित्तं चतुर्भङ्गी ॥२१५॥

तुर्यो भङ्गः शुद्धः, सचित्तसङ्घट्टनादिरहितत्वात् ।
इह पूर्वत्रानन्तरपरम्परविकल्पना कार्या ॥२१६॥

दायकदोषयुतं तद्, यद्दाता भवति बालको वृद्धः ।
ज्वरितो नपुंसकोऽन्धः, प्रकम्प्यमानाङ्गको मत्तः ।२१७।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

उन्मत्तश्छिन्नकरो, बद्धश्छिन्नांह्रिपादुकारूढौ ।
त्रिगलत्कुष्ठो व्यालोडकश्च षट्कायवधकारी ॥२१८॥

कर्त्तक-लोढक-वींपक-विरोलका भर्जकश्च भुञ्जानः ।
कण्डक-पेषक-दलकाः, षट्कायविघट्टकश्चापि ॥२१९॥

सापाया शिशुवत्सा, परकीयपदार्थदायिका गुर्वी ।
इत्यादिदायकानां, ददतामोघेन न ग्राह्यम् ॥२२०॥

करमन्दकादिनाऽचेतनेन ( सचित्तेन ) यत्पूरणादिकमचित्तम् ।
मिलितं ददाति भक्त्याऽनुपयोगेन च तदुन्मिश्रम् ।२२१।

अपरिणतं तु द्रव्यं, भावो वा तत्र तद् द्विधा द्रव्यम् ।
दातृग्राहकसत्तास्थितं यदप्रासुकीभूतम् ॥२२२॥

भावोऽप्येवं द्वेधा, देये साधारणे यदेकस्य ।
दित्सा नैवान्येषां, दायकभावापरिणतं तत् ।।२२४॥

शुद्धमिदमिति यदेकस्य, न द्वितीयस्य परिणतं भवति ।
भिक्षामटतोः साध्वोर्ग्राहकभावापरिणतं तत् ॥२२५॥

अत्र च शुद्धा विषमा, भङ्गाश्चत्वार एव यत्तत्र ।
पश्चात्कर्म न सम्भवति, सावशेषाशनग्रहणात् ॥२२६॥

छर्दितमुक्तं त्यक्तं, तत्र च मधुबिन्दुपतनदृष्टान्तात् ।
परिशाटिसम्भवे सम्पतन्ति काकादयो जीवाः ॥२२७॥

इत्युभयकृता एते, दशापि दोषाः समासतो भणिताः ।
एवं स्थिते द्विचत्वारिंशद्दोषा मताः सर्वे ।।२२८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

आधाकर्म विभागोद्देशिककर्मान्तिमास्त्रयो भेदाः ।
अथ पूतिकर्ममिश्रं, प्राभृतिका बादरा या च ॥२२९॥

अध्वपूरक एतेऽष्टावप्यविशोधिकोटिरस्यार्थः ।
एतत्कोटिरवयवस्तन्मिश्रं शुद्धमपि पूति ॥२३०॥

न क्रीणाति न पचति च, न हन्ति न च कारणादनुमतेश्च ।
पिण्डैषणाऽत्र सर्वा, नवकोटिष्वाशु समवैति ॥२३१॥

कोणगबेलिचतुष्कं, द्वे गुरुवेल्यौ च पृष्ठवंशश्च ।
सप्तभिरेभिः स्वार्थकृतेर्वमतिर्मूलगुणशुद्धा ॥२३२॥

उत्तरगुण द्विभेदास्तत्रैके सप्तमूलपूर्वपदाः ।
अपरे विशोधिकोटौ, स्युरुत्तरोत्तरगुणा अष्टौ ॥२३३॥

वेल्योस्तिर्यगुपरिगतवंशा आच्छादनं च पार्श्वाणाम् ।
बन्धश्च कम्बिकानां दर्भाद्याच्छादन चोर्ध्वम् ॥२३४॥

कुड्यानां लेपो द्वारविधानं भूमिकासमीकरणम् ।
सप्तभिरात्मार्थकृतैः, शुद्धा मूलोत्तरगुणैः स्यात् ॥२३५॥

उद्योतिता धवलिता, सम्मृष्टा वासिता कृतबलिश्च ।
सिक्ता लिप्ता धूपायितेति सा शुद्धकोटौ स्यात् ॥२३६॥

एवं च दोषरहितां, स्त्रीपशुपण्डकविवर्जितां वसतिम् ।
सेवेत सर्वकालं, विपर्यये दोषसम्भूतिः ॥२३७॥

संस्थाप्य ग्रामादिषु, वृषभं दीर्घीकृताग्रिमैकपदम् ।
अधिग्रामकटिनिविष्टं, पूर्वमुखं वसतिरादेया ॥२३८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

H 5770

शृङ्गस्थाने कलहः, स्थानं चरणेषु न भवति यतीनाम् ।
उदररुजाऽधिष्ठाने, पुच्छे तु स्फेटनं विद्धि ॥२३९॥
मौलो ककुदे पूजासत्कारावानने प्रभूतान्नम् ।
उदरे धाणिः स्कन्धे, पृष्ठे च भरः क्षमो भवति ॥२४०।
यन्न मुनिकृते क्रीतं, न वायितं यत्परस्य न गृहीतम् ।
प्रामित्यमभिहृतं च, त्यक्त्वा वस्त्रं मुनेरर्हम् ॥२४१॥
वस्त्रे च खञ्जनाञ्जनकर्दमलिप्ते विकुट्टिते जीर्णे ।
मूषकजग्धे दग्धे, जानीहि शुभाशुभं भागैः ॥२४२॥
कृतनवभागे वस्त्रे, चत्वारः कोणकास्तदन्तौ द्वौ ।
तत्कर्णपट्टिके द्वे, मध्ये वनं (वस्त्रं) भवेदेकः ।२४३॥
चत्वारः सुरभागास्तेषु भवेदुत्तमो मुनेर्लाभः ।
द्वौ भागौ मानुष्यौ, भवति तयोर्मध्यमा लब्धिः ॥२४४।
द्वावसुरौ च भागौ, ग्लानत्वं स्याद्यतस्तदुपभोगे ।
मध्यो राक्षससङ्गस्तस्मिन्मृत्युं विजानीहि ॥२४५॥
मूल्यमनगारवस्त्रस्याष्टादश रूपका जघन्येन ।
उत्कर्षेण तु रूपकलक्षं स्यान्मध्यमं शेषम् ।२४६॥
तुम्बमयं दारुमयं, पात्रं मृत्स्नामयं च गृह्णीयात् ।
यदकल्प्यं कांस्यमयं, ताम्रादिमयं च तत्त्याज्यम् ॥२४७।
वर्णाढ्ये ज्ञानं सुप्रतिष्ठिते पात्रके प्रतिष्ठा स्यात् ।
व्रणरहिते कीर्त्तिःकल्यता मता संस्थिते लाभः । २४८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

हुण्डे चरित्रभेदः, शबले मतिविभ्रमो भवेत्पात्रे ।
अन्तर्बहिश्च दग्धे, मृत्युं तस्मिन् विजानीहि ॥२४९॥

पद्मोत्पले त्वकुशलं, व्रणं पुनः सव्रणे विनिर्देश्यम् ।
स्थानं न गणे चरणे, चतुष्पदे स्थाणुसंस्थाने ॥२५०॥

सौवीरमम्लकणधावने तथोष्णोदकं च गृह्णीयात् ।
वर्णादिभिः परिणत, प्रासुकनीरं च तदभावे ॥२५१॥

उष्णोदकं त्रिदण्डोत्कलितं पानाय कल्पते यतिनाम् ।
ग्लानादिकारणमृते, यामत्रितयोपरि न धार्यम् ॥२५२॥

तद्धि प्रहरत्रितयादूर्ध्वं वर्षासु चेतनीभवति ।
शिशिरे यामचतुष्कात्पञ्चप्रहरोपरि ग्रीष्मे ॥२५३॥

संसृष्टाऽसंसृष्टोद्धृताऽल्पलेपा तथोद्गृहीता च ।
प्रगृहीतोज्झितधर्मा चैताः पिण्डैषणाः सप्त ॥२५४॥

तत्र खरण्टितमात्रकहस्ताभ्यां भवति भङ्गकचतुष्कम् ।
तस्मिन् भङ्गेषु त्रिषु, संसृष्टाऽन्या त्वसंसृष्टा ॥२५५॥

भोजनजाते गृहिणोद्धृते स्वयोगेन तूद्धृता भिक्षा ।
निर्लेपवल्लचणकादिकदानादल्पलेपा स्यात् ॥२५६॥

भोजनकाले निहिता, शरावमुख्येषु सोद्गृहीता स्यात् ।
प्रगृहीता यदशितुं प्रदातुमथवा करे कुरुते ॥२५७॥

यत्र द्विपदप्रमुखाः, काङ्क्षन्त्यथवा भवेत् परित्याज्यम् ।
अर्धत्यक्तं यदि वा, सोज्झितधर्मा भवेद् भिक्षा ॥२५८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

पिण्डैषणावदेवं, ज्ञेया पानैषणाऽपि सप्तविधा ।
केवलमिहाल्पलेशा, सौवीराचाम्लकप्रमुखा ॥२५९॥

आदाय मधुपवृत्त्या, पिण्डं वसतौ प्रविश्य गुरुयुग्तः ।
नैषेधिकीति जल्पन्नीर्यापथिकीं प्रतिक्रामेत् ॥२६०॥

कायोत्सर्गे भिक्षाऽतिचारजातं विभाव्य निश्शेषम् ।
गमनागमने आलोचयेत्तथा भक्तपानादि ॥२६१॥

तदनु दुरालोचितभक्तपानशोधननिमित्तमुच्चार्य ।
गोचरचर्यादण्डकमुत्सर्गे चिन्तयेदेवम् ॥२६२॥

'अहो जिणेहिं असावज्जा, वित्ती साहूण देसिया ।
मोक्खसाहणहेउस्स, साहुदेहस्स धारणा ॥२६३॥ (द.अ.५)

उद्योतपठनपूर्वं, प्रत्याख्यानस्य पारणं कुर्यात् ।
तदनु रजोहरणेन, प्रमार्जयेन् मौलिभालतलम् ॥२६४॥

भुक्ते पात्रेऽपरथा स्वेदः संपातिमादि वा पतति ।
प्रेक्ष्य भुवं मण्डल्यां, पात्रं मुक्त्वा स्तुयाद्देवम् ॥२६५॥

कुर्याज्जघन्यतोऽपि, स्वाध्यायं श्लोकषोडशकमानम् ।
विश्राम्येत क्षणमथ, देहे तप्तेऽन्यथा रोगः ॥२६६॥

बाहुमुनिमूलदेवक्षत्रियघृतवस्त्रमित्राणाम् ।
चरितानि मनसि कृत्वा, विदधीत च्छन्दनां यतिनाम् ॥

बालग्लानादीनां, कुर्वीत च्छन्दनां विशेषेण ।
प्रतिलिख्य वदनमाननपटेन लघुवन्दनं दद्यात् ॥२६८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

पात्रं प्रतिगृह्णामीत्येवं मुनिकुञ्जरं समापृच्छय ।
उच्चार्य नमस्कारं, प्रकाशदेशस्थितोऽश्नाति ॥२६९॥

संयोजनाप्रमाणाङ्गारा धूमश्च हेतवः षट् षट् ।
इति पञ्चविधा ग्रासैषणा मता भोजने तत्र । २७०॥

संयोजनोपकरणेऽन्नपानयोगश्च क्रमेण बहिरन्तः ।
द्वात्रिंशत् कवलाधिकभुक्तावधिकं प्रमाणं स्यात् ।२७१।

कवलानां मानमिदं, यो द्वात्रिंशत्तमो भवेद्भागः ।
निजकाहारस्य तथा, यो वाऽविकृते मुखे विशति ।२७२।

रागेण सरसमास्वादयतश्चारित्रमत्र साङ्गारम् ।
भुञ्जानस्यानिष्टं, द्वेषेण सधूमकं भवति ॥२७३॥

संयमवृद्धयै वैयावृत्त्यर्थं वेदनाधिसहनाय ।
ईर्याशुद्धयर्थं प्राणवृत्तये धर्मचिन्तायै ॥२७४॥

इति हेतुषट्कतोऽद्यान्न चापि भुञ्जीत हेतुभिः षड्भिः ।
रोगोपशमनिमित्तं, राजाद्युपसर्गरक्षार्थम् ॥२७५॥

तुर्यव्रतरक्षायै वर्षासु जन्तुपालनकृते च ।
तपसे सन्न्यासादौ, तनुव्यवच्छेदनार्थं च ॥२७६॥

प्रथमप्रहरातीतं, यतिनामशनादि कल्पते भोक्तुम् ।
आयामत्रयमुपरि तु कालातिक्रान्तता तस्य ॥२७७॥

तापक्षेत्राभावे, यदात्तमशनाद्यनुद्गते तरणौ ।
तद्धि क्षेत्रातीतं, न युज्यते जेमितुं यतिनाम् ॥२७८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

क्रोशद्वितयादर्वागानेतुं कल्पतेऽशनप्रभृति ।
तत्परतोऽप्यानीतं, मार्गातीतमिति परिहार्यम् ॥२७९॥

द्वात्रिंशच्चाष्टाविंशतिश्च कवलाः प्रमाणमाहारः ।
तदतिक्रमे प्रमाणातीतं साधोर्यतिन्याश्च ॥२८०॥

भक्तमशुद्धं कारणजातेनात्तमपि भोजनावसरे ।
त्यजति यदि तदा शुद्धो, भुञ्जानो लिप्यते नियतम् ।२८१

अर्धमशनस्य सव्यञ्जनस्य देहे जलस्य चांशौ द्वौ ।
न्यूनं षष्ठं भागं कुर्यादनिलानिरोधार्थम् ॥२८२॥

भुङ्क्ते स्वादमगृह्णन्न लम्बितमद्रुतं विशब्दं च ।
केसरिभक्षितदृष्टान्ततः कटप्रतरगत्या वा ॥२८३॥

जम्बुककाकोपमया यो भुक्त्वा भक्तमविधिनाऽन्यस्मै ।
दत्ते यो गृह्णाति वमनादि स्यात्तयोर्दोषः ॥२८४॥

आवश्यकेऽपि भणितं द्वावप्येतौ गणाद् बहिः कार्यौ ।
अपुनःकरणतयाऽभ्युत्थिते तपः पञ्चकल्याणम् ॥२८५॥

भुक्ते द्विदले निर्लेप्य, मुखं करं पात्रकं च दध्यादि ।
पात्रान्तरेण वाऽश्नाति भोज्यमादौ सदा मधुरम् ।२८६॥

परिशाटिरहितमभ्यवहरेत्तथा सर्वमक्रमरसमपि ।
न ज्ञायते यथा भोजनप्रदेशस्तदितरो वा ॥२८७॥

पात्राणां प्रक्षालनसलिलं प्रथमं पिबति नियमेन ।
संशोध्याऽऽस्यं प्रक्षालयन्ति पात्राणि बहिरेत्य ॥२८८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सूरेः पात्रं प्रथमं भिन्नं प्रक्षाल्य शेषपात्रेषु ।
पूर्वं यथा विशुद्धं कल्पो देयस्ततोऽन्येषाम् ।२८९॥

उद्धरितं यदि कथमपि, तत्तु परिष्ठापयन्ति विधिनैव ।
निपुणाः शैक्षा अतथाकरणे चोड्डाहमुखदोषाः ॥२९०॥

निर्जन्तुस्थण्डिलगमनपूर्वकं रक्षया समाक्रम्य ।
व्युत्सृष्टं त्रिविधेनेत्येवं त्रिःश्रावणं कार्यम् ॥२९१।

व्रणलेपाक्षोपाङ्गम्रक्षणवत् प्राणधारणामात्रम् ।
भुक्त्वा देयं लघुवन्दनं ततः कल्पतेपादि ॥२९२॥

कुर्वीतेर्यापथिकीप्रतिक्रमण-चैत्यवन्दने तदनु ।
चितिकर्मदानपूर्वं, प्रत्याख्यानं विधातव्यम् ॥२९३॥

संशोध्य पात्रबन्धनं, पात्रं निमार्ज्य तेन बद्ध्वा च ।
संस्थाप्येच्च विधिना यावत्प्रतिलेखनासमयः ॥२९४॥

पटलानि पात्रबन्धोऽथवापि कल्पः प्रमादयोगेन ।
कथमपि खरण्टितः स्याद्विधिना प्रक्षालयेत्तानि ॥२९५॥

प्रथमं निमार्ज्यन्ते चीवरखण्डेन सर्वपात्राणि ।
तन्नित्यं प्रक्षाल्यं कुत्सादिदोषघातार्थम् ॥२९६॥

उच्चाराय यतिजनो जिगमिषुरेकं मुनिं विमुञ्चेत ।
वसतौ परं युवैको बालो वृद्धश्च न विमोच्यः ।२९७॥

आवश्यकीं भणित्वाऽत्वरमाणो युगलितो रहितविकथः ।
जलमात्रकं गृहीत्वा स बहिर्भुवि याति समितात्मा ।२९८

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

पूज्ये उत्तरपूर्वे निशाचरेभ्यो भयं च याम्यायाम् ।
मुक्त्वा दिशां त्रयमिदं स्थण्डिलभूप्रेक्षणं कुर्यात् ॥२९९॥

अनापातमसंलोकं परस्यानौपघातिकम् ।
समं चाशुषिरं चैवाचिरकालकृतं च यत् ॥३००॥

विस्तीर्णं दूरावगाढमनासन्नं बिलोज्झितम् ।
प्राणबीजत्रसत्यक्तं स्थण्डिलं दशधा मतम् ॥३०१॥

स्थण्डिलभुवां चतुर्विंशतिः सहस्राणि भङ्गका एषाम् ।
ते त्वेकशुद्धभङ्गकसहिताः परिपूर्णतां यान्ति ॥३०२॥

उभयमुखे द्वे राशी तत्राद्यो यः स आद्यसंयोगः ।
स च संयोगो भक्तोऽधस्त्याङ्कानन्तरेण ततः ॥३०३॥

लब्धे भागहाराङ्कोर्ध्वगताङ्कहते भवेदिहाङ्को यः । (स पुन द्वैतीयीकः संयोगः) दशसंयुक्ता द्विशती शतद्वयी सद्विपञ्चाशत् ।३०४।

द्विशती दशभियुक्ताऽष्टकसंयोगे शतं सविंशतिकम् । (?)
चत्वारिंशत्पञ्चाधिका दशैकश्च संयोगः ॥३०५॥

एको दशपदशुद्धो द्वितीयको भङ्गः (?) ।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | |
| १० | ९ | ८ | ७ | ६ | ५ | ४ | ३ | २ | १ | |
| १० | ४५ | १२० | २१० | २५२ | २१० | १२० | ४५ | १० | १ | १०२३ |

देशविशुद्धाः शेषा, भङ्गसहस्रश्चतुर्विंशः ॥३०६॥

स्थण्डिलभुवामभावे कुर्वीतोच्चारकायिकादीनि ।
स्मृत्वाऽऽधारद्रव्यं, धर्माधर्मास्तिकायादि ॥३०७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

तत्रोपविश्य निर्लेपनाय गृह्णाति लेष्टुशकलानि ।
प्रस्फोटयन्ति च यत्नान्न जायते येन जन्तुवधः ॥३०८

तत्र स्थाने पश्येदूर्ध्वं सागारिकं द्रुमादिस्थम् ।
गत्वा दरीगतमथो, गमनादि विधायिनं तिर्यक् ॥३०९।

कृत्वा स्थण्डिलभूमेः संदंशकयोश्च यत्नतः प्रेक्षाम् ।
तद्देवतामनुज्ञापयेदितरथा छलादि स्यात् ॥३१०॥

उत्तरमुखो यदि दिवा, भूत्वा दक्षिणमुखो निशायां तु ।
लघुवन्दनेन निगदति, तनुसङ्ग्रां व्युत्सृजामीति ।३११

दक्षिणहस्ते मात्रकमुपकरणं वामजानुनि न्यस्य ।
वामकरगतैर्लेष्टुभिरुच्चारं व्युत्सृजेत् साधुः ॥३१२॥

सूर्यपूरयोर्न देयं, पृष्ठं यस्मादवर्णवादः स्यात् ।
पवने पृष्ठगतेऽर्शांसि स्युर्घ्राणस्य विडगन्धात् ॥३१३।

वर्षिष्णुच्छायायां, संसक्तपुरीषमुत्सृजेत्साधुः ।
तदभावे तूष्णेऽपि, व्युत्सृज्य मुहूर्तकं तिष्ठेत् ॥३१४॥

तस्मिन्नन्यस्मिन्वा, देशे पुतपुंसनं विधायाथ ।
लघुवन्दनेन निगदति, कुर्वे निर्लेपनादीनि ॥३१५॥

निर्लेपनां प्रकुर्यादुड्डाहभयाददूरदेशस्थः ।
प्रासुकपयसस्तिसृभिः प्रसृतिभिरथ लेपकृत्यं च ।३१६॥

यदि पश्यन्ति गृहस्थाः प्रत्येकं मात्रकाण्युपादाय ।
आचामेयुर्मुनयस्तदा सशब्दं प्रचुरपयसा ।३१७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

त्रिविधेन कायसञ्ज्ञा, व्युत्सृष्टेति त्रिवेलमुच्चार्य ।
भिक्षामटन्ति ये तैर्दण्डप्रक्षालनं कार्यम् ॥३१८॥
मार्गमपि श्रमणीनां, परिहरमाणोऽप्रमद्वरो मौनी ।
समितात्मा मुनिवर्गः, प्रतिश्रयं प्रतिनिवर्त्तेत ॥३१९॥
तदनु प्रविशन् वसतौ, कुरुते नैषेधिकीं बृहच्छब्दम् ।
वदति च 'नमो खमासमणाण'मिति विनीतविनयः सन् ॥
लघुरादाय यतीनां, दण्डान्मुञ्चेत प्रमृज्य भित्त्यादि ।
क्रमयोः प्रमार्जनीयं, रजोहरणस्य दशिकाभिः ॥३२१ ।
अनुगुर्वीर्यापथिकीप्रतिक्रमणपूर्वकं गुरोः पुरतः ।
गमनागमने आलोच्य, स्वाध्यायं च प्रकुर्वन्ति ॥३२२॥
संयमयोगे निहिते, यावद्योगान्तरस्य समयो न ।
तावत्सर्वत्र मुनिः कुर्यात्स्वाध्यायविधिमेव ॥३२३॥
पूर्णं तृतीययामं, ज्ञात्वा छायानुमानतः साधुः ।
गुरवे कथयति यदनुप्रेक्षासमयोऽधुना पूज्याः ! ॥३२४॥
प्रथमं सूरिः पश्चात्साधुर्दत्वा क्षमाश्रमणमेकम् ।
प्रतिलेखनां करोमीति, वदति दत्त्वा द्वितीयं तु ॥३२५॥
वसतिं प्रमार्जयामीति, भाषतेऽथाऽऽस्यवस्त्रिकां प्रेक्ष्य ।
त्यक्तक्रियान्तरः सन्, लघुवन्दनकद्वयं दद्यात् ॥३२६॥
तत्रैकेन शरीरप्रेक्षां लघुवन्दनेन सन्दिश्य ।
अन्येनाङ्गप्रतिलेखनां करोमीति भाषेत ।३२७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

उपवासिनाऽखिलोपधिपर्यन्ते चोलपट्टकः प्रेक्ष्यः ।
अन्यैस्तु स प्रथममेव सर्वे पश्चाद्रजोहरणम् ॥३२८॥

वसतिं प्रमृज्य तदनु, प्रतिलिख्य स्थापनागुरुः स्थाप्यः ।
एकं लघुवन्दनकं, दत्त्वा प्रेक्षेत मुखवसनम् ॥३२९॥

तदनु लघुवन्दनेन, स्वाध्यायं मुनिजनः प्रकुर्वीत ।
यः सूत्रार्थग्राही, स्वाध्यायस्तस्य तु स एव ॥३३०॥

तत उपधिस्थण्डिलयोः, प्रेक्षार्थं स्यात् क्षमाश्रमणयुगलम् ।
तत्रैकं मन्देशेऽन्यस्तु प्रतिलेखनायां स्यात् ॥३३१॥

प्रातःसमये प्रेक्ष्यो, दशधोपधिरेव नैव पात्राणि ।
यस्मात्प्रेक्षाऽवसरस्तेषामुद्घाटपौरुष्याम् ॥३३२॥

पश्चिमयामे तूपधि पात्राद्यं प्रतिलिखेत्समस्तमपि ।
अथ पात्रकनिर्योगं, सप्तविधं प्रेक्ष्य निक्षिपति ॥३३३॥

प्रेक्षां कुर्वन् प्रत्याख्यानं, दत्ते यदि प्रमत्तो वा ।
वाचयति पठति च तथा, षट्कायविराधको भवति ॥३३४

औधिकमौपग्रहिकं विधिना प्रतिलिख्य सर्वमुपकरणम् ।
अथ पुनरपि सूत्रार्थग्रहणं विदधाति मुनिवर्गः ॥३३५॥

पश्चिमघटिकाद्वितये, कालं प्राभातिकं प्रतिक्रम्य ।
अथ सप्तविंशतिविधान्, प्रेक्षेत स्थण्डिलोद्देशान् ॥३३६।

अधिसहमानस्यासन्न-मध्य-दूरे त्रयः स्युरन्तस्ते ।
एवमनधिसहमानस्याप्येवं षट् बहिः षट् च ॥३३७।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

इत्युच्चारे द्वादश भवन्ति ते द्वादशैव नृजलेऽपि (प्रश्रवणे) ।
स्यादेव चतुर्विंशतिस्त्रयः पुनः कालमाश्रित्य ॥३३८॥
स्थण्डिलदेशप्रेक्षां, कृत्वाऽशनपानके परिष्ठाप्य ।
विस्मृतमम्बरवसतिप्रमुखं प्रतिलेखयेत्किञ्चित् ॥३३९॥
एकं लघुवन्दनकं गोचरचर्याप्रतिक्रमणविषयम् ।
दत्त्वा ततो द्वितीयेन, तेन कुर्यादिहोत्सर्गम् ॥३४०॥
अर्धनिमग्ने बिम्बे, भानोः सूत्रं भणन्ति गीतार्थाः ।
इतिवचनप्रामाण्याद्दैवसिकावश्यके कालः ॥३४१॥
अथवाऽप्येतन्निर्व्याघाते मुनयस्तथा प्रकुर्वीरन् ।
आवश्यके कृते सति, यथा प्रदर्श्येत तारकात्रितयम् । ३४२
धर्मकथादिव्यग्रे, गुरौ तु मुनयः स्थिता यथास्थानम् ।
सूत्रार्थस्मरणपराश्चापृच्छ्य गुरुं प्रतीक्षन्ते ॥३४३॥
आवश्यकं विदधते, पूर्वमुखास्तेऽथवोत्तराभिमुखाः ।
श्रीवत्साकारस्थापनां समाश्रित्य तिष्ठन्तः ॥३४४॥
आचार्या इह पुरतो, द्वौ पश्चात्तदनु त्रयस्तस्मात् ।
द्वौ तत्पश्चादेको, रचनेयं नवकगणमानात् ॥३४५॥
मुनियुगलकेन विधिना, कालो व्याघातिकस्तथा ग्राह्यः ।
तस्मिन् यथा समाप्ते, सन्ध्याया अप्यपगमः स्यात् ।३४६
कुर्वीत स्वाध्यायं, मुनिवर्गो यावदादिमप्रहरम् ।
विश्रामणां च कुर्यात्, सुबाहुमुनिरिव यतिजनस्य ।३४७

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

कालिकसिद्धान्ताध्ययन-वाचना-गुणनगोचरः कालः ।
दिवसस्य निशश्च प्रथमपश्चिमौ द्वौ मतौ प्रहरौ ॥३४८॥

अङ्गान्येकादश कालिकं श्रुतं तत्त्ववेदिभिर्भणितम् ।
सर्वोऽपि दृष्टिवादः, कालिकरूपं श्रुतं च स्यात् ॥३४९॥

प्रतिलिख्य वदनवसनं, लघुचन्दनकेन रात्रिसंस्तरकम् ।
सन्देश्यान्येन वदति, 'राई संथारए ठामि' । ३५०॥

शक्रस्तवं भणित्वा, कृतमिथ्यादुष्कृतो यथाज्येष्ठम् ।
कृतसाकारानशनो, निर्जितनिद्राप्रमादः स्यात् ॥३५१॥

यतिनो यतिनः प्रत्येकं कुड्यस्य च यतेश्च रचनायाम् ।
यतिनां च पात्रकाणां, हस्तो हस्तोऽन्तरे कार्यः ।३५२॥

उचिते देशे गत्वा, संस्तरकोत्तरपटावथ प्रेक्ष्य ।
संयोज्य च जानूपरि, संस्थाप्य भुवं प्रमार्जयति । ३५३॥

तत्रास्तीर्य मुनिः, करयुगलं न्यस्य शिरसि भणतीदम् ।
'अणुजाणह निस्सीहि णमो खमासमणाण पुज्जाणं' ॥३५४॥

अथ संस्तरके स्थित्वा, प्रेक्ष्याऽऽस्यपटं त्रिवेलमुच्चार्य ।
सनमस्कारं सामायिकं ततो वामपार्श्वे च । ३५५॥

उपधानीकृतबाहुः, पादौ द्वौ कुर्कुटीवदाकुञ्च्य ।
असमर्थो भूमितलं, प्रमृज्य विधिना प्रसारयति । ३५६।

किल कुर्कुटी प्रसुताऽपत्यत्राणाय पादयुग्ममपि ।
आकुञ्च्य स्वपिति सदा, यदा तु पादौ परिक्लान्तौ ।३५७।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

गगने तदा पुनरपि, प्रमार्ज्य संस्थापयेत् प्रयत्नेन ।
कुर्कुट्या दृष्टान्तं, तथाऽनगारान्मनसि कृत्य ।।३५८।

परितान्तौ निजचरणावुत्पाट्य स्थापयेद् गगनभागे ।
प्रतिलिख्य पदस्थानं, तत्र स्थापयति यत्नेन ।।३५९।।

सुप्तो यावज्जागर्त्ति, तावदाध्यात्मिकः शुभध्यायी ।
निद्रामोक्षं कुरुते, मुहूर्त्तमेकं विशुद्धया च ।।३६०।।

स्थविरा द्वितीययामं, सूत्रार्थविभावनेन निश्शेषम् ।
अतिवाह्य स्थिरहृदयाः, प्राप्ते यामे तृतीयेऽथ ।।३६१।।

गृह्णन्ति चार्धरात्रिककालं गुरवस्ततो विबुध्यन्ते ।
पूर्वोदितेन विधिना, स्थविरा निद्रां प्रकुर्वन्ति ।।३६२।।

उद्वर्त्तनाऽपवर्त्तनमुख्यं यदि कुर्वते तदा मुनयः ।
प्रथमं शरीरकं प्रतिलिखन्ति पश्चाच्च संस्तारकम् ।।३६३।।

कृत्वा शरीरचिन्तामीर्यापथिकीप्रतिक्रमणपूर्वम् ।
कुर्वन्ति स्वाध्यायं, गाथात्रयमानमधिकं वा ।।३६४।।

निद्राऽपगमे गुरवस्तत्त्वं ध्यायन्ति चिन्तयन्त्यथवा ।
अभ्युद्यतं विहारं, तृतीययामे जनोद्धारम् ।।३६५।।

सूरि-स्थविर-ग्लानप्रमुखा निजसमय एव कृतनिद्राः ।
भावेनाप्यपनिद्रा, विचिन्तयन्तीदृशं हृदये ।।३६६।।

'धण्णाणं विहिजोगो, विहिपक्खाराहगा सया धण्णा ।
विहिबहुमाणी धण्णा, विहिपक्ख अदूसगा धण्णा' ।।३६७।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

तिष्ठन्ति पञ्च पुरुषाः, यत्र ज्ञानादिरत्नसेवधयः ।
तद्गच्छनिश्रयाहं, कदा विधास्यामि विधिपक्षम् ॥३६८

पृथ्वीपतिः कुमारो, मन्त्री सेनापतिः पुराऽऽरक्षः ।
पञ्चभिरेतै राज्यं, यथा प्रधानैर्भवति मुदितम् । ३६९॥

तद्वत् प्रवराचार्यो-पाध्याय-प्रवर्त्तिनस्तथा स्थविरः ।
यत्र गणावच्छेदी, पञ्चैते सन्ति स हि गच्छः ॥३७०

विश्राम्यन्ति गणधराश्चतुर्थयामे तु जागृयुः सर्वे ।
वैरात्रिककालाऽऽदानपूर्वकं कुर्वतेऽध्यायम् ॥३७१॥

ग्राह्योऽर्धरात्रिकस्यासन्नः प्राभातिकस्य चासन्नः ।
मुनिना कालो वैरात्रिक इतिसिद्धान्तपरिभाषा ॥३७२॥

साधुश्चैत्रे शुक्लत्रयोदशीप्रभृतिके दिनत्रितये ।
कायोत्सर्गं कुर्यादचित्तरजसोऽवनमनार्थम् ॥३७३॥

स्वाभाविके पतत्यपि, रजसि स वाते समीररहितेऽपि ।
सूत्रं प्रमादरहितो, यावद्वत्सरमधीयीत ॥३७४॥

शुचिकार्त्तिकयोर्मासे, सितभूतेष्टाप्रभृत्यहस्त्रितयम् ।
प्रतिपदवसानमध्येतव्यं, न यतोऽत्र जीववधः ॥३७५॥

एवं प्रतिपदन्तमाश्विने चैत्रिके च नाध्येयम् ।
द्वादशदिनानि यावत्, सूत्रं सितपञ्चमीप्रभृति ॥३७६॥

ऋतुबद्धं कालमपास्य जीवघातादिदोषसम्भवतः ।
बहुवर्षासमये क्षालयन्त्युपधिमखिलमपि यत्नात् ।३७७।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सलिलाभावे तु जघन्यतोऽपि नियमेन पात्रनिर्योगः ।
आचार्यग्लानानामुपधिर्मलिनः सदा क्षाल्यः ॥३७८॥
आचार्याणां मलिनोपधिपरिभोगे ह्यवर्णवादः स्यात् ।
ग्लानानां तद्वसनप्रावरणेऽजीर्णतापत्तिः ॥३७९॥
सामाचारीमनिशं, सेवेत यथाऽऽगमं यथास्थानम् ।
सा त्रिविधा स्यादोघे च, पदविभागे च दशधा च ।३८०।
आद्या तत्रौघे स्यादिहौघनिर्युक्तिजल्पितं सर्वम् ।
ओघोऽत्र हि सामान्यं, तद्विषया साऽपि तद्रूपा ॥३८१॥
प्रायश्चित्तविधिगता, या कथिता जीतकल्पसमयादौ ।
सा पदविभागरूपा, सामाचारी जिनैरुक्ता ॥३८२॥
या चक्रवालसामाचारी सा कालगोचरा दशधा ।
इच्छाकारो मिथ्याकारश्च तथा तथाकारः ॥३८३॥
आवश्यकी च नैषेधिकी तथाऽऽपृच्छना भवेत् षष्ठी ।
प्रतिपृच्छाऽपि च तथा, छन्दनापि च निमन्त्रणा नवमी ॥
उपसम्पच्चेति दशविधा तत्राद्या यदिच्छया करणम् ।
न बलाभियोगपूर्वकमिच्छाकारप्रयोगोऽतः । ३८५।
संयमयोगे वितथाऽऽचरणे 'मिथ्येद'मिति विधानं यत् ।
मिथ्यादुष्कृतदानं, मिथ्याकारः स विज्ञेयः ॥३८६॥
सूरिर्बहुश्रुतो नैष्ठिकश्च यद्वाचनादिकं दत्ते ।
शिष्याय तथैव तदिति निश्चयकरणं तथाकारः । ३८७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

आवश्यकी विधेया, गमने नैषेधिकी पुनर्विशता ।
कार्यं प्रविधातुमभीप्सितमापृच्छा गुरोः कार्या ॥३८८॥
पूर्वनिरूपितेन च, पूर्वनिषिद्धेन वा सतोत्पन्ने ।
कार्ये पुनर्गुरोः पृच्छा प्रतिपृच्छा जिनैरुक्ता ॥३८९॥
सा छन्दना यदशनादिके गृहीतेऽर्थ्यते मुनिर्भोक्तुम् ।
अगृहीत एव तस्मिन्निमन्त्रणामाहुरर्हन्तः ॥३९०॥
यद्गम्यते बहुश्रुतसूरिसमीपे विमुच्य निजगच्छम् ।
सम्यग्ज्ञानादित्रयलाभार्थं सोपसम्पदिति ॥३९१॥
सामाचारी दशधाऽपि चक्रवालेति सञ्ज्ञया गदिता ।
चक्रमिव येन वलते भ्रमति प्रतिपदमहोरात्रम् ॥३९२॥
सामाचारी दशधाऽन्यापि प्रेक्षा प्रमार्जना चैव ।
भिक्षेर्यापथिकी लोचनानि भोजनविधिः षष्ठी ॥३९३॥
मात्रविचारौ स्थण्डिलमावश्यक (मार्जनादिक) विधानम् ।
एषापि यथास्थानं, विवृता दशधाऽपि पूर्वत्र ।३९४॥
इति दिनकृत्यं कुर्वन्नवभिः कल्पैः सदाऽपि विहरेत ।
तत्राष्टमासकल्पास्तेषु न पीठादिपरिभोगः ॥३९५॥
विजिहीर्षवस्तु वार्षिकमासिककल्पावसानदिवसेषु ।
पीठादिकं समर्प्योपग्रहिकं सर्वमुपकरणम् ॥३९६॥
शय्यातरमापृच्छ्य, प्रमृज्य वसतिं तृतीयपौरुष्याम् ।
विहरन्ति पथि तु दूरे, प्रथमे प्रहरे द्वितीयेऽपि ॥ युग्मम्॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

गीतार्थश्च विहारोऽपरस्तु गीतार्थमिश्रितो भवति ।
गीतं तु सूत्रमुक्तं, जघन्यतोऽप्यादिमाङ्गं तत् ॥३९८॥

तद् द्वादशाङ्गमुत्कृष्टतोऽनयोर्मध्यगं तु मध्यमतः ।
अर्थः सूत्रव्याख्या, गीतेनार्थेन युक्तो यः ॥३९९॥

तन्निश्रया विहारो, युक्तो गच्छस्य बालवृद्धयुजः ।
अप्रतिबद्धस्य सदा, द्रव्यादिचतुष्कमाश्रित्य ।४००।युग्मम्

नवभिः कल्पो मासैर्भवति चतुर्भिर्नभोनभस्याद्यैः ।
तत्र च संस्तरकपदप्रोञ्छनकादेर्न परिभोगः ॥४०१॥

पङ्कापनयनहेतोः, पादप्रतिलेखनी घना मसृणा ।
प्रतिसंयतं निषद्या, बद्धा ध्रियते रजोहरणेन ॥४०२॥

अभितो नखसंस्थाना, प्लक्षोदुम्बरवटादिकाष्ठमयी ।
एकाङ्गुल-विस्तारा, वितस्तिमाना प्रमाणे सा ॥४०३॥

यतिनां फलकं शय्याऽऽसनं तु वर्षासु पीठफलकादि ।
शेषसमये हि संस्तरपादप्रोञ्छनकपरिभोगः ॥४०४॥

अस्मिन् वर्षाकल्पे, विधि (विविध) तपोऽभिग्रहेषु यतितव्यम् ।
पञ्चकहान्या जाते, पर्युषणामहे विशेषोऽयम् ॥४०५॥

आगमोद्धारक-आचार्य-प्रवर-श्रीआनन्दसागरसूरि-
पुङ्गवगुम्फिता श्रमण-दिनचर्या समाप्ता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# 卐 जिन—महिमा 卐

संयोगा विप्रयोगान्ताः-समग्रेणात्मनाऽनन्ता अन्वंशं वृद्धिहानितः।
सिद्धैः सदाऽसि संयुक्तस्तद्योगो न वियोगभाक् ॥१॥

सर्वाणि स्थानान्यशाश्वतानि-सिद्धैः स्थानं त्वया प्राप्त-मचलं न
चलिष्यसि । त्वमीश ! न च तज्जातु कथमेतदशाश्वतम् ॥२॥

यथा लाभस्तथा लोभो, लाभाल्लोभः प्रवर्धते-
कैवल्यं युगलं लब्ध-मप्राप्तं भववारिधौ ।
विवर्धयिषुः किन्नैतद् यदि लोभोऽस्ति लाभतः ॥३॥

जातः सिद्धिगतौ नैव च्योष्टाऽस्यास्त्वं कथं पुनः ।
पुनर्जन्म पुनर्मृत्युरिति सत्यं वचस्तव ॥४॥

ध्रुवा जनिर्मृतस्या-सोस्त्वमृतो न भवे जनुः ।
तवेति किं महर्षीणां स्वोक्तं स्वस्य न बाधकम् ।५। युग्मम्

आशक्र—चक्रिणं नित्यो विभवो नेति वचस्तव ।
लाभः कथं तवेशाऽयं कैवल्यस्य सनातनः ॥६॥

दुःखरूपो दुःखफलस्तथा दुःखानुबन्धवान् ।
भवो विद्वत्प्रवादोऽयं सदानन्दाद् मृषा कृतः ॥७॥

कुलद्रोही प्रभुद्रोही मित्रद्रोही नरोऽधमः ।
त्वं तु धर्मफलं सर्वं लब्ध्वा निर्णासितं ननु ॥८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

स्वामिँस्तुभ्यं नरत्वेनाभयस्थानं समर्पितम् ।
तदैव तत्त्वया दग्धं, कैत्र नीतिर्भवान् कथम् ॥९॥

यावज्जीवमदा धर्म-मग्लान्या भाषयाऽऽर्यया ।
न चेत् सोऽणुः शिवे किं न यथा दानं तथा फलं ॥१०॥

एका ते निष्फला नाथ ! देशनाऽऽश्चर्यमन्तिमम् ।
निष्फलं त्वां शिवे दृष्ट्वा वच्म्यशेषास्तथाविधाः ॥११॥

केवलज्योतिषा लब्धा अर्था नाथ ! प्ररूपिताः ।
तर्कावेशो न नोऽस्त्यत्रान्धानां यद्वत् परेक्षिते ॥१२॥

तथापि ते समादेशो विनियोगविधौ परः ।
ततरेषां प्रसिद्ध्यर्थं तर्कावेशात् प्ररूपणा ॥१३॥

अदृष्टपरपारत्वादनन्तं सर्ववादिनाम् ।
आकाशं लोकमाहात्म्यं तज्जोवाणुसमागमः ॥१४॥

ऊर्ध्वलोके शुभोऽणूनां प्रभावोऽधस्त्वशोभनः ।
पुण्यप्रकर्षभाजस्तद्देवा नैत्राधोभुवस्तले ॥१५॥

अनल्पजीविता-नित्यजीवनाश्च समे त्विमे ।
पुण्यपापप्रकर्षात्त-भवास्तद्भूस्ततस्तताः ॥१६॥

नरा मध्यमकर्माणस्तिर्यञ्चो जीवितप्रियाः ।
तत्तेषां धाम तैरश्चमेकाक्षा लघ्वशोभनाः ॥१७॥

कर्माणुतारतम्येन भविनां विविधा गतिः ।
लोके समस्तकर्माणून्, (मुक्त्वा) मुक्ता लोकाग्रगामिनः ॥१८

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

लोकाग्रं सिद्धानां स्थानं तन्नियमतः समे सिद्धाः ।
तल्लोकाग्रमुपेताः सिद्धा नम्यन्त इह सर्वे ॥१९॥

संसारोऽयमनादिः परम्परं निश्चितास्ततः सिद्धाः ।
तत्ते परम्परगतास्तान् नमस्कुर्वते धीराः ॥२०॥

पीयूषं सममूहते विषलवैः साम्यामृते ते रता ।
यद्भावेऽविषमं परं समतया नैत्रोहते संवृतिम् ।

तुल्यामाश्रवसञ्चयेन विषमं संसारपातं नयन् ।
मोक्षत्वेन बुधः समेति मनसा पीनो वचस्ते पिबन् ॥२१

समः स्त्रैणे तार्णे कनक-उपले दुःखसुखयोः,
समाधौ लीनात्मा भवति न खलु मिथ्यात्वसुदृशोः ।

यदेतत्साम्यं स्याद् भवजलधिपातप्रतिभयं,
ततो ये त्वामाहुः परसुरसमं ते न महिताः ॥२२॥

सर्वाद्भुतो धाम महाद्भुतानां, त्वत्तोऽपरो नास्ति जगद्विभो! भुवि
गतक्रियः सर्वगतिक्रियः सदा, विदर्शनश्चासि समस्तदर्शी ॥२३॥

परैश्चिदानन्दरसेन मुक्ता, मुक्तिस्तदीयाप्तजनेषु घुष्टा ।
परं त्वदीयैस्तु विदां समक्षं, घुष्टः क्रियामात्रविहीन ईशः ॥२४॥

विधेर्निषेधस्य च ये त्वयोक्ताः, पुरो मुनीनां नियमा विचित्राः ।
परं पदं प्राप्य जिन! त्वया ते, दूरीकृतास्ते किमु इन्द्रजालम् ॥२५

जीवः स्वकीयाप्तयुजि क्रियायाः, प्रामाण्यतो वीर्यबलं युनक्ति ।
भवाँस्त्वयोगोऽमितवीर्ययुक्तः कथं परेषां गमनीय ईशः ॥२६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

विधेऽत्र कोऽपीश! न जीवभावो, विहृत्य प्राणान् श्रुतिमुख्यसारान्
भवांस्तु वाणैर्दशभिर्वियुक्तः सदासि धर्ता विविधांस्तु तान् कृती ॥

चैतन्यशक्तेर्जिन! जन्तुजाते मानं त्वयोक्तं निजयोगमानात् ।
व्यवहारमार्गागतपार्थिवादा—वत्यन्तचैतन्ययुतोऽस्ययोगी ॥२८॥

तेषां हि पापप्रचयस्य भीर्न, ये स्युस्सदा संवरयोगनिष्ठाः ।
असंवरस्त्वं कथमाप्त! हीनः, पापाणुभिः सर्वमनेहसं शमी ॥२९

समस्तकर्मावलितो न तस्य, भयं जिनेन्द्रोदितमार्गगो यः ।
विमुक्तमार्गोऽसि विलीनकर्मा, जिन! त्वदन्यो नहि कोपि मह्यां ॥

जिन! त्वदाज्ञाविमुखोऽङ्गधारी, युज्येत पापप्रचयेन नित्यम् ।
चिन्तोक्तिकार्यैरपि नो प्रवृत्तो, विभो! अनाज्ञोऽसि कथं निरंहाः

त्वया समक्षं विदुषां निवेदितं, परस्परं जीवगणः समस्तः ।
सम्बद्ध उर्वी निखिलैर्नियोगै र्वृथैतदेषो हि जिनेन्द्रदेवः ॥३२॥

वित्तोऽसि विश्वज्ञतया विभो! त्वं, सत्यं नु चेदाऽऽसमहं त्वदीशः ।
दीनत्वपूर्णं न हि वीक्षसे मां, भवाङ्गणे यन्न समुद्दिधीर्षा ॥३३

सार्वज्ञ्यबन्धोऽवितथोक्तिभावे, त्वयाऽऽस्थिता मे व्यसनोद्धृतिः पुरा
वारानमेयानधुना भवाब्धौ ब्रुडन्तमर्हन्न हि पासि दीनम् ॥३४।

विभोऽसि सार्वज्ञ्यपदेऽमले यदि, मां दावदग्धं किमु नेक्षसे त्वम्
चेद्वेत्सि मां तद्विधमात्मशक्तितो न रक्षसि त्यक्तदयोऽसि किं विभो!

वज्राभाः शरणं श्रिते कृतधियो नीतिस्त्वयं सात्त्विकी,
त्वं मेऽमेयभवान् श्रितोऽसि शरणार्थित्वैकमत्योत्तमः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अद्यापीश ! भवाधिसन्धिहरणे मे किं न ते जायते,
बुद्धिर्धिग्न यदर्थितोऽपि फलितः कारुण्यपूर्णोऽपि हा ॥
ज्योत्स्कारमित्राण्यपि पीडितासुं, प्राणार्पणेनाप्युपकुर्वते सदा ।
त्वं सेवितोऽमेयभवेषु भक्तितस्तथापि किं नो कुरुषे मयीक्षणम्
वाचः सौख्यैकहेतवो मुनिगणे ख्याता मताश्चोत्तमैः,
सत्यं तन्मानसंहृतिगुणगणापातैकरम्या श्रिता ।
शेषाः सर्वेऽपि जन्तवोऽयमगुणास्ता दुःखहेतू र्दधु-
र्यद्दुःखं सदृदृशामसुमतां मिथ्याधरेभ्योऽधिकम् ॥३८
कृष्टा भूमिः साम्यभावेन शून्या, तीक्ष्णस्पर्शा रूपसौन्दर्यहीना
शस्ता शास्त्रे योक्ष्यते या फलेन,
तद्वद्वाचो भवभयमतये मोक्षसारेण दृश्याः ॥३९॥
नादा न चैव ददासि न दास्यसि त्वं,
मह्यं सदा सुगुणपूर्णजिनेश्वर ! त्वम् ।
त्वत्पादयुग्ममहनं कथमीश ! वाञ्छे,
स्यान्नैव चेद् धृदि विभोगुणराशिभारः ॥४०॥
अन्तर्व्याप्तियुतं भनन्ति मनीषामन्तो नराः सिद्धये,
ज्ञातं यन्मतिरश्नुवति प्रमिततां नैवान्तरा तादृशम् ।
नित्यं ज्ञानमुखा समं गुणगणं कोऽप्यस्ति नान्यो दधत्,
सिद्धेः साधनमेवमत्र विदुषां तत्ते भवद्भ्यो नताः ॥४१
सत्यं मातोऽसि सिद्धेष्वपगतमितिषु प्राणपूर्णेषु तत्त्वा-
दंशैः सर्वात्मना चापरमहितभाग्मात्रलेशे न मातः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

रिक्तोऽसौ यत्त्वदीयानणुगुणसुधया तेन भ्रान्ता भवाब्धौ,
रिक्तानां यत्र धामाव्ययपदमखिलैर्दृश्यते चेदमर्हन् ॥४२॥
ध्यानध्यं ध्यानध्यं हि ध्यानध्यं जगति च निखिले ध्यानध्यमेतद्विचित्रं
शान्तिं दान्तिं मुमुक्षामनुपदमुदितां धारयन् मार्गगामी।
न्यायोऽयं सार्वतन्त्रस्तदपि कुमतगास्त्वां न सत्कर्तुमुत्काः
सत्योऽयं किं न तानभिप्रैति ( निच्छति ) च,
निखिलो न्यायनाशः स पाशः ॥ ४३ ॥
लज्जानम्रमुखो भवेन्ननु जनश्चक्षुर्युगं धारयन्,
चेत् स स्याच्छरणागताङ्घ्रिधरणे सामर्थ्ययुक्तोऽक्षमः।
त्वां शरणं निखिलार्तिनाशनिपुणं श्रित्वाङ्गिनोऽनन्तकाः,
पीड्यन्ते भवशत्रुणा ननु विभो ! लज्जा नतेऽदर्शन ! (१) ॥
नरेन्द्राः सुरेन्द्रा गणेन्द्रा जगत्यां,
भवन्ति प्रपूज्याः कृताप्ताभिषेकाः।
प्राक्पूज्यतामाप्य गतोऽभिषेकं यल्लोकं भावस्तव पक्षपाती ॥४५
(जिनत्वं दधानोऽवतीर्णः प्रभुस्त्वद्गृहोऽस्ति यल्लोकभावो समानः)
पूज्यास्ते परमेष्ठिनो जिनमुखा भव्येषु मार्गादिभैः,
कार्यैर्मोक्षविधायिता कृतिकरास्तन्नाद्भुतं मे हृदि।
त्वं भगवन् ! गतसाधनस्तनुमनोवाग्भिः कृताद्युन्मुखः,
किं पूज्यत्वमुपेयिवान् ननु गुणाः पूज्याः स्वभावाप्तितः ॥
काव्यस्यैकफलं वदन्ति विबुधाः स्वानन्दमेवोत्तमं,
तच्च स्वानुभवैकवेद्यमखिलं नाथादिवृन्दाश्रितम्।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

तन्मिथ्या न यदस्ति सुज्ञजनता श्रुत्या विहीनं सतां,
बाध्यं नैव परं पुरोक्तमनयो नोत्सर्गमार्गो मतः ॥४७॥

जिन ! त्वदाज्ञासुधयोक्षितोऽस्मि, जातो महामोहविषोर्मिपूर्णः ।
पक्वा न मेऽन्तर्यदि सा तदा त्वं विधेहि वैधेयविधिं मयीष्टम् ॥

घुष्टा जिनेन्द्र ! जगतीह परा तवासीत् सिद्धत्वबुद्धत्वकृतार्थताश्रितिः
परं न तां सत्तमभावशालिनः सभा जयन्तीह परा प्रदानात् ॥४९॥

ज्ञाता समर्थो यदि दीनहीनं, जनं समुद्धर्तुमलं न भूयात् ।
लिप्येत पापप्रचयेन सत्यं, यदीदमाप्तेश ! कथं स्थितिस्ते ॥५०॥

भक्त्याश्रितेन यदसमंजसमाप्त ! लप्तं,
तन्मे न पापपदमाश्रितवत्सले यत् ।
सिद्धे र्विधायि वचनं ह्युपलम्भसारं,
मिष्टं तथा ननु नहीति सुनिश्चितं नः ॥५१॥

ध्यानाज्जिनेश ! तव पारमगुर्भवस्या-
नन्ता भवेऽत्र भवधारणकार्यसक्ताः ।
सत्या श्रुतिस्त्वियमभिप्रभुमाश्रिते मे
योगत्रिकेण परमां (यदि चेद्) विदधासि सिद्धिम् ॥५२

चित्रं जिनेश ! तव भक्तिभृतोऽपि जीवा,
नापुः परं पदमतीतकुमार्गचित्ताः ।
स्याद्वादशुद्धवचनां तव वाचमाप्ताः,
सत्यं यदत्र वचनं वदितुः प्रमाणम् ॥५३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

जानानः समुपेक्षकोऽक्षतबलो दोषैकपात्रं ननु,
साधुत्वं निरघं दधन् मुनिजनो देवैकनिश्रं धनम् ।
इत्थम्भूतवचस्तव श्रुतिपथे सत्यं च चेत्तद् ध्रुवं,
मां देवं समुपाश्रितं न च यदा पासि ध्रुवा ते क्षितिः ॥

भक्त्या नते मयि महेश ! दधासि चेन्न,
साद्रां दृशं हतसमस्तविदादिसारे ।
नागे तथा कमठदैत्यगुरौ कथं त्वं,
दुःखाङ्कुरोद्दलनतत्परतां व्यधा हा ! ॥५५॥

त्वां तारयाम्यहमुदारहृदम्बुवाहे शुद्धां तनुं सुवचनान्तरमादधानः
मां दुःखवारिधिगतं न समुद्धरंस्त्वं,
प्राप्ता पदं कथमधीश ! विशुद्धसाम्नाम् ॥५६॥

नीतः साक्षात् प्रतिपदमिहानादनीनां निकायं,
सर्वज्ञं त्वां सकलशरणं चेतसा जानतापि ।
नम्रो वृक्षः फलभरयुतो ग्रावघातात् फलेद्यद्,
यद्वा स्निग्धो जन इह विमतः कल्पनातीतशर्मा ॥५७॥

त्वं सर्वज्ञपदान्वितो यदि तदा मां किं ननु ज्ञातवान्,
मूर्धस्थं कृतलोपिनां भवभृतं त्वामेव कृत्वा पुरः ।
यद्धित्वा तत्र वन्दनामपि प्रभो ! गन्ता पदं त्वत्समं,
सत्यं भो ! बहुरत्निका प्रभुसमैर्भूमिः परार्थोद्यतैः ॥५८

इयं समक्षं विदुषां निवेदिता, मया प्रतिज्ञा यदुताऽऽप्य धाम ।
सदागमैर्नित्यसमेतमार्यं हास्यामि पश्चाद् भविताऽस्म्यवाप्तः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

मया समाहृतो जिनेश ! कुजिनवृन्दवर्जनात्,
तनूमनोवचस्त्रिकेण सेवनादिभिः पुनः ।
तथापि मां भवाम्बुधेः क्षमोऽपि नैव रक्षसि,
कथं नु मे भवेत् प्रतीतिरुद्धृतावत्वयाऽधमाः ॥६०॥

जागर्ति ते यशो जिनेश ! जानतां गणे नृणां,
प्रवरबोधिलम्भनाद् भवाद् भवान्तिमां दशाम् ।
परार्थकारितोद्भवं कृताघसञ्चये जने,
न मेऽवनं कथं करोषि भक्तिभावितात्मनः ॥६१॥

विदुषां संसदि तेऽस्ति मतं ननु, विदुषा नैव विधेयो बन्धः
त्वं बद्धा किमु जिनभव आप्त ! जिननाम्नोऽङ्गं श्रेणेयवित्

गतरागद्विड् जिन ! ते रूपं, किमुपास्या क्रियते विबुधैस्ते ।
सत्यं विबुधा निजशुभलाभं, दत्तेऽन्यस्मै तत्त्वं तायी ॥६३॥

जिनेश ! जायते जने फलोदयः प्रसन्नतः,
भयं भयान्त आप्यते द्विपज्जनाद्व्यतीतिगम् ।
त्वयि विभो ! न युग्मकं भवापवर्गदोऽसि किं,
निमित्तभावभावतो बुधैस्तथा सदा (परं) मतः ॥६४॥

भवाम्भोधिनिस्तारणायेदमर्हं-स्त्वया स्थापितं शासनं वित्तमेतत्
कथं सर्वदा तत्प्रपन्नं न मां तत्प्रदत्तेऽव्ययं तत् किमु भक्तिमान्द्य

अनन्तचिद्रूपधरं महान्तं, मोहादतीतं सुरसङ्घसेव्यम् ।
नित्येतरात्मार्थनिदेशकं जिनं, चतुर्गुणं देवपदाश्रितं परम्॥६६

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

मायाविनो यद्यपि जाग्रतीहा-शोकद्रुमाद्यष्टकधारिणोऽन्ये ।
तथाप्यविच्छिन्नमनन्यरूपं, जिन ! त्वदीयाष्टकमीहनीयम् ।६७

जगति विदितमेतत् सत्यसद्भावसिद्धि-
रनुकृतिकरणाद्धि नान्यथा यत्समूला ।
सुरविसरनभोगादित्वमाप्तुं यतन्ते,
परमतनिपुणा यत् सिद्धये किं न हि ते ॥६८॥

त्वं गम्यः कथमार्यमार्गनिपुणैश्चेत्ते विलोक्यं तर्कैः,
सार्वज्ञ्यं गतरागताश्रितमलं तन्मानता किंकृता ।
चेदाप्तागमसन्ततिर्गतमलाऽत्रास्ति प्रमाणं जिन ! ,
किं प्रामाण्यपदं भवेत् प्रथमतश्चेन्नार्थनिष्ठा सका ॥६९॥

कथं ते जिन ! प्रेक्षणादङ्गभारो, हृदो मे प्रसक्ति गताघां तनोति ।
मीर्त्तौ न तद्वान् न भवत्स्वरूपं, सा नैव मेऽभूत् कथमात्मबोधात् ।

रागाद्या रिपवो मताः परमतैः किं सेव्यते देवता,
रागाढ्यः परमेश्वरश्च किमु तैर्वैराग्यभाग् निन्द्यते ।
आरम्भादियुतश्च किं गुरुतया नित्यं समोपास्यते,
निर्ग्रन्थान् निरघान् विनिन्द्य सततार्हद्धर्मशून्या यतः ॥७१

पूर्णकृपाधरमार्हतवृन्दं, भविनः पूर्णकृपायाः पात्रम् ।
फलमपि भुवनेऽक्षुभ्यन्मानं, को नु विलम्बो जिन! भविसिद्धौ ॥

यूयं शरण्याः कथमागमा भवे, कथं च भव्याः शरणं प्रयान्ति वः
शिवं ह्यधीनं नच वो न चैषां, फलेद्धिचित्रा भवितव्यताङ्गिनाम् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सत्यं सर्वमुमुक्षवः शिवपदं लब्धार इद्धां परां,
लब्ध्वा सद्भवितव्यतां यत इह कर्त्री न तामन्तरा ।
नैवाकारणमेति सिद्धिपदवीं दाहो न वह्निं विना,
तत्तत्कारणतां सदागम दधद्(दिशन्)जिनपनेद,त्तं पदं त्वं शिवम् ।

बाढं जीवोऽयमज्ञो जिनप ! भवगतोऽनादितो नैव वेत्ति,
रूपं स्वीयं कथञ्चिद्वृजिनपरिगतः पौद्गले लुब्धिमाप्तः ।
सौख्ये दुःखं जिहीर्षुरशुभतरकृतौ याऽऽश्रिता पापबन्धं,
रक्तोऽस्यां सर्वमेतज्जिन ! तव शरणाच्चोरनाशं प्रनष्टम् ॥७५

आढ्यो जीवो विविधधनवान् रत्नहीरादिराशेः,
स्वामी शुद्धैर्निजवरगुणैर्ज्ञातिजैराश्रितोऽपि ।
मिथ्याशीधुस्वदनरसिकः सर्वमेतद्विधत्ते,
कर्मायत्तं जिन ! तव वचनात् शुद्धराज्याधिकारी ॥७६॥

अज्ञानिना पीतमदेन वा यत्, प्रदीयते स्वं द्रविणं परं वा ।
सज्ज्ञानमेतः शुचिमानसो वा, मिथ्या करोतीह तथा जिनादयम् ॥

मलिम्लुचो रक्षकमेष्यमाणं, दृष्ट्वा पलायन्तः उदित्वरान्ध्याः ।
श्रद्धापथं तद्वदिहागतं त्वां, दृष्ट्वा जिनाऽदृष्टचयः पलायते ॥

विविधं द्रविणं निखिले स्वगृहे स्थापितपूर्वं ह्यविदन् मनुष्यः,
काकिण्यर्थं भ्राम्यति भुवने तद्वदिहाङ्गी ज्ञानधनोऽपि ।
इन्द्रियबोधायाटति सुचिरं भवभवने प्रतिभवमुज्झंस्तं,
श्रित्वा त्वां जिन ! पूर्वविदाढ्यः पदमभ्येति सनातनशुद्धम् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

नव्यो नव्यो जिनेशः स्वचरणकमलेन्दीवराभान् सुसाधून्,
देष्टा यस्त्याज्य एषोऽङ्गनिचयसुखदो देहगेहाङ्गनादिः ।
माता सद्वप्ततनुजैर्विविधसुखकरैः संयुतो ज्ञातिवर्गोऽ-
व्याबाधं स्थानमाप्यं लभत इह जनः स्वात्मसौख्यैकचेताः ॥८०
या चेष्टा विकलेषु तां समुदितां भव्यैः सदा कार्यं-
स्त्यागोऽर्थस्य जनस्य सौख्यनिचितेरन्धोऽपि नेष्टं मतं (वदेत्)
कच्छोटं विजहातु लुञ्चतु शिरो नोपानहोर्धारणं
[ शय्या भूमितले सदा विचरणं ]
मोक्षाध्वप्रगुणं तदेव जिनपाव्याबाधगामी चरेत् ॥८१॥
अव्यादव्यान् विभो ! मां भवभयमिताज् शुद्धमार्गे समाख्यन्,
सर्वेषामेष हेयोऽमितभवचरितो ह्याश्रवो बन्धबन्धुः ।
श्रेयोऽसौ संवरो द्राक् सुकृतिततियुतो निर्जरामोक्षमूल,
इत्थं नान्यो लपेद्वा विषयकुमिसमस्त्यागमूर्तिर्जिनेशः ॥
न नाट्यकर्तृत्वरसेन नम्यो, गोपाङ्गनाहावरसेन नैव ।
न चाङ्गनापुत्रधनादिदानान् मोक्षस्य देष्टेति जिनः प्रणम्यः ॥
मायावार्धिर्दवाग्निर्विपिनमसुगमं पाश इन्द्रस्य मौर्वी,
स्वप्नो मर्वम्बुभास इति विविधरत्नै रूपमुक्तं भवस्य ।
तीर्थ्यैः शास्त्रे स्वकीये शिवपदविमुखैर्देवमेतत्प्रदाने,
निष्पुण्यं मत्वेति नौति न तु जिनप इवात्मैकरामं विचिन्त्य ॥
संसारे सर्वजीवा नियतमनुमताः सर्वदाऽशेषबोधा-
स्तेजः सूर्यस्य दीप्तिः शशिन इव परं मेघवत् कर्म मूर्तं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

रुन्धे तं तत्त्वयस्तु पवन इव तपश्चेद् भवेत् स्फूर्तिधारि,
मार्गे वक्ताऽमुमेषोऽनघजिनपविभोर्नैव कश्चित् परोऽस्ति ।

कर्त्ता हर्ता तनुभुवनभवेष्वेक एवानुमेयः,
कश्चिद् बुद्धेरननुभवगमो हृद्वचःकायशून्यः ।
जप्यः सेव्योऽनुदिनमनुगतैः स्वर्गमोक्षप्रदाता,
तीर्थ्या एवं सुमतिरहितास्त्वां जिनं न प्रपन्नाः ॥

न कर्ता न हर्ता न वै पालको यः,
सुराणां नराणां तथा नारकाणाम् ।
पशूनां तथापीड्यते पुष्टबोधै-र्जिनेशो जगत्यां गुणैः पूर्णरूपः ॥

द्रव्यं गुणा नैव दशा प्रभिन्ना, मते जिनेशाऽस्ति तवाप्तमान्ये ।
कथं गुणानामुदयं करोषि, दशायुतानां स्थिरवस्तुभावे ॥८८॥

जिन ! त्वया ख्यातमशेषमर्थमुत्पत्तिनाशाचलतास्वभावम् ।
मार्गं त्वदीयमिममाश्रिता जना, भवन्ति मुक्त्यै चरणेषु रक्ताः ॥

स्वीये स्वीये च शास्त्रे निखिलमतधरैर्मङ्गलमाद्यमुक्तं,
स्वेष्टानां देवतानां नमनकृतिपरं तत्प्रक्लृप्तं परैस्तु ।
आरब्धग्रन्थसङ्के न भवति परमं भागमाश्रित्य विघ्नो,
ध्यात्वेत्यर्हन्मतस्त्वं शिवपथपरमोऽस्तीति मत्वाऽस्मदीयैः ॥

स्थानेषु त्रिषु मङ्गलं श्रुतधरैर्ग्रन्थे समस्तैर्मतं,
प्रारम्भान्तरपूर्णतासु तदीयारम्भात्पराऽस्याप्तता ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

पारस्थैर्यपरम्परांगतिकृते तान्यार्हते शासने,
भार्यं स्थानमदोऽर्हतां विधिपरैस्सर्वज्ञवाक्योद्धुरैः ॥९१॥

उद्देशोऽध्ययने भवेत् स्थितिकृते शास्त्रे समुद्देशको-
ऽनुज्ञा शिष्यपरम्परार्पणकृते यौगो विधिस्तत्कृते ।
सर्वत्रार्हतशासने विधिपरैर्नान्दीक्रिया मङ्गले,
स्थानेषु त्रिषु सेव्यते जिन ! तवाम्नायः परैः सेवितः ॥९२

जिन ! तवानुमतं श्रुतसाधनं, त्रिकमिदं वरमङ्गलसङ्गतम् ।
जलधिपोतगतव्यनुकारकं, परमतैः परिसेव्यतया मतम् ॥९३॥

आगमोद्धारक–आचार्य–प्रवर–श्रीआनन्दसागरसूरि–
पुङ्गवगुम्फितो जिन–महिमा समाप्तः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# 卐 कर्म साम्राज्यम् 卐

आरङ्कादानृपात् सर्वे, परालम्बनजीवनाः ।
स्वकर्मजे फलं यत्नः, परैरेव प्रणोद्यते ॥१॥

प्राक् तावत् कर्मणा प्राचो-दितेनाखिलजन्तवः ।
उत्पत्तिदेशमायान्ति, न तत्रायत्तताऽऽत्मनाम् ॥२॥

न मात्रा मानितो जन्तुरर्थितो जनकेन न ।
पुत्रत्वमागतो नैव पितरौ पुत्रवाञ्छितौ ॥३॥

सर्वेषामपि कर्माणि, तादृशान्युदयं ह्यगुः ।
संयोगस्तेन सम्पन्नः, स्वच्छन्दोऽत्रेह नो कणात् ॥४॥

कर्ता चेत् कश्चिदीशोऽत्र, सिद्धं परावलम्बनम् ।
न सोऽत्र विश्ववैचित्र्ये, विधातृत्वं प्रयुज्यते ॥५॥

यतोऽरूपोऽशरीरो न, कर्मापि तस्य लेशतः ।
सर्वज्ञे निस्पृहे नैव, क्रीडालीलादिकं भवेत् ॥६॥

कः कर्त्ता किं हरो ब्रह्मा, हरिर्वा यवनाश्रिताः ।
महम्मदश्च शुभ्रुख्याः, परस्परं समे हताः ॥७॥

किञ्चाऽत्र देशकालाङ्ग-प्रभृतिष्वाश्रितो विधिः ।
विचित्रस्तत्र चापि स्याद् विचित्रो बहुधा विधिः ॥८॥

गर्भे समेतो निजकर्मणाऽङ्गी, शुद्धं परं वा परकर्मसंस्कृतम् ।
तत्रापि कर्मानुगतो विभावः, क्षणे क्षणे स्यान्न कृतिः स्वकीया ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

यदाऽऽहरेत् षड्रसभोजनं प्रसूः पोषस्तदीयेन रसेन गर्भे ।
गर्भस्थजीवाश्रितकर्मयोग्या, सर्वा जनन्याऽऽहृतिमुख्यिका क्रिया ॥
जन्मापि जन्तोर्नहि कामजातं, मात्रादिवर्गोऽपि क्षमो न तत्र ।
न कालनैयत्यमिहापि किञ्चित्, स्वकर्मयोग्ये हि भवेत्तु काले ॥
तत्राप्यनेके सहकारभाव-मायुर्यथास्वं विधिमाचरन्तः ।
स्वयं तु कर्मैकफलोऽनुभावं भुनक्ति सर्वं परसङ्गमोत्थम् ॥
नानाविधाऽऽहारसमूहसिद्धं कर्मोत्थितेनात्मफलाङ्कितेन ।
जातं जनन्या पयश्चाददानो —
बाल्येऽपि न स्वात्मयतोऽयमात्मा ॥१३॥
नानाविधांश्चित्रमतिप्रयत्नैः, कृत्वा प्रयोगान् शिशुजीवनाय ।
मातापिता चापि न किं तदानीं,—
बालं पपालात्मविधौ नदीष्णम् ॥१४॥
मातुश्च वप्तुश्च निजापरेषां, यत्ना विचित्राः शिशुपालने ये ।
तदीयतन्त्रा अपि ते समस्ताः, शिशोरदृष्टस्य विपाकरूपाः ॥
बालाः कुमाराः सहसा समेताः, क्रीडारसे चित्रविधौ प्रवृत्ते ।
ये तेपि प्राक् कालिककर्म मुख्यप्रणोदिता नापर आययुस्ते ॥
कुमारकैः सह प्रथिते विनोदे, जयै युता ये च पराजयैश्च ।
सुखानि दुःखानि च चित्ररूपा-ण्यायान्ति तत्र स्वककर्मजानि ॥
छात्रत्वमेतो जनकप्रमुख्यै-र्यन्नीयते पाठसभां सुबुद्ध्या ।
सापि प्रणुन्ना शिशुभाग्यभाराद् वप्त्रादयस्त्वत्र निमित्तयन्ति ॥
समानपाठा अपि ये सयोगा-स्तेपि स्वकीयात्मजकर्मयोगात् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

समानयोगेऽप्यसमानभावा, निमित्तयन्त्यत्र तु पाठकाद्याः ॥
आरोग्यहान्याऽनुगतः कदाचिद्, रुजातुरत्वमशुभोदयेन ।
तत्रापि वैद्यौषधसेवकानां योगोऽप्यदृष्टोत्थप्रभावरूपः ॥२०॥
वैद्या अनेके बहवोऽप्युपायाः सेवापरा नैक इहाश्रियन्ते ।
यदा यतो यत्र यथैव वेद्यं, तथैव ते सर्व उपाश्रयन्ति ॥२१॥
वणिक्क्रियायामपि वर्त्तमाना, लाभान् परेभ्य इह संश्रयन्ते ।
तान् ये स्वकर्मापगमाश्रिताः स्युः, सर्वत्र सर्वे न समानलाभाः
सल्लाभबुद्ध्या नृपसंसदङ्गताः-पदान्यमात्यादिगतान्यवापुः ।
तत्रापि लाभास्तु मनीषिणां स्युः, स्वकर्ममाना नृपमुख्यदत्ताः ।
कर्षुकत्वमुखचित्रविधासु, विविधहेतुधरा जनता स्यात् ।
सापि कर्मफलमनुगच्छति तद् यत्,—
स्वकर्मफलमनुगतिमत् स्यात् ॥२४॥
कौटुम्बिके वृद्धगते च भावे, प्राप्येत तद्यत्स्वक-लाभयोग्यम् ।
परापरेभ्यो मतिमांस्तदित्थं स्वकर्मसाम्राज्यमबाधमेयात् ॥
इत्थं सर्वावतारे विविधविधिभरे वेद्यमाने विचित्रे,
दुःखे सौख्ये च तैस्तैर्विविधमतिकृतिप्राप्तभावैः सुवेद्यैः ।
जीवाः सर्वेपि सर्वात्रधिमतिसहिताः स्वीयप्राक्कर्मजातं,
गच्छन्तीमे न कुत्राप्यभिभवपदवीं निर्निमित्तं लभन्ते ॥२६॥
इत्थं विदित्वा सुकृतेतराणां, सर्वत्र सौख्येतरसाधनानाम् ।
साम्राज्यमेकं विबुधाः श्रयन्तु तत्कर्म हेतुं स्वकृतिं विचित्राम् ।

॥ इति कर्म-साम्राज्यम् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# गर्भापहारसिद्धि-षोडशिका ।

नग्नाटो जिनराजवीरविषयं गर्भान्तरे मोचनं,
ब्राह्मण्या उदरान्तराच्छतमुखादिष्टेन यन्निर्मितम् ।
देवेन त्रिशलोदरे शुभवता घस्त्रेषु द्व्यष्टोन्मिते-
ष्वव्याबाधतया जनुः सफलतां नेतुं न तद् रोचते ॥१॥

आर्याणां भिषजां मतेन ततिभिः प्राप्तो दिनैर्गर्भगो,
बालः पूर्णनिजाङ्गराजिरनणुं पुष्टिं क्षमः क्रामितुम् ।
अन्यस्मिन्नुदरे प्रसूजठरतोऽप्याङ्ग्ला भिषक्पुङ्गवाः,
त्रायन्ते प्रसभं शिशुं जनिमृताविर्त्यक्षमुद्वीक्ष्यते ॥२॥

जैनानां निगमोऽप्यमुं विधिमुशत्यादिष्टवान् यद्ध्यसौ,
बालस्याङ्गनिवर्त्तनं स्फुटतया मासे तृतीयेऽन्विते ।
सत्येवं स्वपरागमानुगततां यद्विस्मरन् नग्नराट्,
तथ्यार्थं प्रविलुम्पितुं प्रलपति प्रास्तागमस्तन्मृषा ॥३॥

सत्येवं परगर्भसंहरणगे कुक्षेर्यदम्बाऽऽश्रितो,
बालस्यास्ति सुसम्भवो न जिनराड्जीवार्भकस्येक्ष्यते ।
यच्चेषां सुकृतं जगत्यनुपमं सर्वार्त्तिशान्तिक्षम-
माजन्मप्रकटं समैः स्वनिगमश्रद्धोद्धुरैर्मन्यते ॥४॥

सिद्धान्तः समतन्त्रगो ननु शिशुः कुक्षौ जनन्याः स्थित-
स्तीव्रां वेदयते व्यथां नरकगप्राणिव्यथासम्मितां ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सूचीनां घनवह्नितापिततनूभाजां परः कोटिशो,
वेधादष्टगुणां प्रवेदितवतः किं भाविनी नो व्यथा ॥५॥

किञ्चाऽऽशाम्बरसम्मतं जिनपदं ते क्षीणमोहात् परं,
चेदङ्गीक्रियते जिनस्य जननीकुक्षौ यतः सम्भवः ।
तर्ह्यस्यांशुकचन्दनाभरणहृक् संरोहणे किं द्विषः,
तन्नात्मप्रविबाधकं निगदतो विभ्राजते ते मनाक् ॥६॥

दुःखं जन्मभवं जनुर्धृतवतामौपम्यवर्त्मातिगं,
शास्त्रे गीतमुदीक्ष्यते स्वपरयोः तत्किं न ते गोचरे ।
श्रुत्योर्यातमशेषदोषमथिनो जन्मापि किं नो तथा,
सातासातयुगं भवादधिगतं संवीक्ष्य मा भो ! मुहः ॥७॥

तीर्थेशो निजगाद संसृतिगतां जन्मावलीं स्वां यथा,
जातां सद्दृगवाप्तिजन्मन इह स्वच्छामनच्छां तथा ।
तद्वृत्तेन गतद्विषा निगदितो गर्भापहारः स्वयं,
किं श्रद्धापदमेति ते न महता मोहेन चेल्लुप्तधीः ॥८॥

अन्ये ब्राह्मणविद्विषोद्भवमिदं वृत्तं प्रकल्प्योदितं,
जैनेन्द्राश्रयमित्थमाहुरखिलोन्मादास्पदा यन्न तम् ।
शोचन्त्यार्हतशासनि गणभृतः ख्याता द्विजा जातितः,
तुर्येऽङ्गेऽपि जगाद संहतिमिमामाद्येऽपि जैनीं गणी ॥९॥

आश्रित्यार्हतजन्मनीचकुलतां विप्रेषु सम्मेनिरे,
शास्त्रे शास्त्रकृतो नृपोत्तमकुले साम्राज्यसंशोभिते ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

स्यात् सूतिर्जिनताजुषां न गणिनां तादृग्विधानान्विता,
तत्तेषां नहि नीचता निगदितेर्ष्यासम्भवा कर्हिचित् ॥१०॥

विप्राणां यदि सन्ततौ मुनिपतिः कुर्याज्जिनेशोद्भवे,
व्याषेधं समशत्रुमित्रजनतः सत्यं तदिर्ष्यान्वितः ।
तत्तस्याः किमु मोक्षसम्पदमिमां नो वारयेद् वाङ्मये,
श्रीमन्तो द्विजवंशमौक्तिकसमाः कल्पे स्वयं सूत्रिते ॥११॥

याता मोक्षपदं श्रुते निगदितः श्रीवीरमात्रा समं,
देवानन्दपदान्वितर्षभयुतो दत्तो जिनेशः (न्द्रः) पिता ।
आराध्यानघसंयमं गुणगणश्रेणिं समारुह्य स,
शुद्धात्मा क्षपकाश्रितां द्विजकुले द्वेषस्य नाशंस्ततः ॥१२॥

कल्पोक्ता मुनिशावली न वितथा पाषाणलेखेषु यत्,
प्राच्येषु प्रविदृश्यते स्फुटतया कालेऽपीदानीन्तने ।
नग्नाटप्रभवात् मताद्विलिखिता वाणिज्यमुख्यान्वया,
तत् कल्पोक्तमशेषमाश्रयति श्रुत् (विद्) नग्नाट हित्वाग्रहम् ॥

निन्दा श्रीजिनराजवृत्तविषये चीर्णा भवाम्भोनिधौ,
भ्रामं भ्राममशेषदुःखनिचये विब्रूडयेत् प्राणिनम् ।
तद्वत् सत्यकथाद्पेनमुदितं स्तोत्रं तदीयं न किं,
जैना यन्निखिलाघमुक्-पथमिताः स्वान्याश्रिताः सद्गिरः ॥

सम्पूर्णो जिनराजसंस्तव इहाशेषैनएधोऽनलो,
यत् सद्भूतमुपेयते निजपराङ्गीकारमुज्झन् वदेत् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सत्यं सद्गुणशालि सत्कृतिपदं तन्नो जिनेशेऽलिकं,
गर्भस्यापहृतिं विलुप्य मतिमान् ब्रूयात् स्तवं शास्त्रदृक् ॥१५

इदं नग्नाटानां मतमुपदधत् दोषनिचयं,
विहन्तुं शास्त्राणां सितवसनसाधूत्तमधृताम् ।
ततिं सन्मान्यां चापगतमलिनां स्थापितुमना,
अकार्षीदानन्दोदधिरमृतशिष्यार्चितपदः ॥१६॥

आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता-
गर्भापहारसिद्धि - षोडशिका समाप्ता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# ॥ नग्नाटशिक्षा-शतकम् ॥

प्रातिहार्याष्टकोपेतं मूलातिशयशोभितम् ।
वीरमानम्य नग्नाटाः शिक्ष्यन्ते हितकाम्यया ॥१॥

आदौ सक्तो नृपतिप्रदत्तरत्नांशुके त्रिसन्ध्यं यः ।
छन्नं निरीक्षमाणो नग्नाटस्तेन भुवि प्रथितः ॥१॥

तंभावं गच्छेशः स्फेटयितुं खण्डशस्तु तत्कृत्वा ।
नाशितवान् क्रुद्धोऽतो नग्नाटस्तेन भुवि प्रथितः ॥२॥

क्रोधानलसंदीप्तः प्रच्छन्नं प्राग्दहनवत् सोऽस्थात् ।
कालं नियतं गणगो नग्नाटस्तेन भुवि प्रथितः ॥३॥

जिनकल्पिकसाधूनां व्याख्यानं श्राव्यमाणमाकर्ण्य ।
सफलितरोषज्वलनो नग्नाटस्तेन भुवि प्रथितः ॥४॥

इष्टार्थस्यालाभे नवस्य, पूर्वागतं शिशुर्जह्यात् ।
तद्वदयं मूर्च्छालो नग्नाटस्तेन भुवि प्रथितः ॥५॥

सर्वं संयमसाधनमुदस्तवान् संयमाङ्गनिरपेक्षः ।
जिनकल्पिकैरपि धृतं नग्नाटस्तेन भुवि प्रथितः ॥६॥

न स्थातुं शक्तोऽसौ गणे जने वसति धामनि द्विष्टः ।
नग्नो जगाम विपिनं नग्नाटस्तेन भुवि प्रथितः ॥७॥

वासोऽरण्येप्यदधन्न कोपि संसर्गमस्य ना चक्रे ।
तदरण्यमहिषवदसौ नग्नाटस्तेन भुवि प्रथितः ॥८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

श्रुतमाचार्यायत्तं न तवारण्ये गणाद्विभिन्ने स्यात् ।
आजन्माऽनागमोऽसौ नग्नाटस्तेन भुवि प्रथितः ॥९॥

साख्यच्छ्रोतुः पुरतः कथञ्चिदायात आत्मगर्विष्ठः ।
जिनपागमा विनष्टा नग्नाटस्तेन भुवि प्रथितः ॥१०॥

तत्प्रेम्णोत्तराख्या स्वसा तदीया च वन्दनायागात् ।
तां नग्नां चक्रेऽसौ नग्नाटस्तेन भुवि प्रथितः ॥११॥

वेश्या जनचेतोऽर्थं तामाच्छादितवती च वासोभिः ।
नेह श्रमणीत्यूचे नग्नाटस्तेन भुवि प्रथितः ॥१२॥

एवं त्रयमापन्नं साधनमागममगाररहिता स्त्री ।
व्युच्छिन्नं मन्तव्यं नग्नाटस्तेन भुवि प्रथितः ॥१३॥

आद्यं महाव्रतं ननु यतनायुक्तस्य नान्यथावृत्तेः ।
यतनासाधनहीनो नग्नाटस्तेन भुवि प्रथितः ॥१४॥

समितय ईर्याद्या नैतस्याऽभावाद्रजोहृते रात्रौ ।
गतिरप्रमार्ज्य पिच्छान् नग्नाटस्तेन भुवि प्रथितः ।१५।

यावत् पदयोः परिधिस्थानं पिच्छं न तावदुन्मृज्यात् ।
करिपादमितं रजोहृद् नग्नाटस्तेन भुवि प्रथितः ।१६।

प्रवदन् रजसां रेणोर्वातस्यापि त्यजेन् न हिंसां सः ।
भाषा समितिर्नास्य नग्नाटस्तेन भुवि प्रथितः ॥१७॥

पात्राभावेऽज्ञानी भजेन् न माधुकरीं भुनक्त्येकम् ।
अन्नमशोधितमयतं नग्नाटस्तेन भुवि प्रथितः ॥१८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

न क्षेप्यं नादेयं न साधनं च प्रमार्जने तस्य ।
वधुरिव यतनाहीनो नग्नाटस्तेन भुवि प्रथितः ॥१९॥

मूत्रं पुरीषमेषोऽप्युत्सृजन् मात्ररहित उन्मत्तः ।
शालायां यत्र तत्र च नग्नाटस्तेन भुवि प्रथितः ॥२०॥

नाभावे समितीनां व्रतमाद्यं शेषकाणि तदभावे ।
उपकरण रहितो यन् नग्नाटस्तेन भुवि प्रथितः ॥२१॥

कुमनूनागमसन्ततिमसतीं ननु घोषयेत्तु वाक्यततिम् ।
जैनं निरागममतं नग्नाटस्तेन भुवि प्रथितः ॥२२॥

सत्त्राभावादन्धः कुर्वन् गुरुवाक्यमन्तरा सततम् ।
विरतोऽयं नादत्तान् नग्नाटस्तेन भुवि प्रथितः ॥२३॥

चेद् वस्त्रं सङ्गोऽस्याभिमतं, कथमालयो न तद्रूपः ।
ब्रह्म न, नाशाद् गुप्ते-र्नग्नाटस्तेन भुवि प्रथितः ॥२४॥

उपकरणं चेत् सङ्गः, पिच्छं च कमण्डलुर्न किं सङ्गः ? ।
तीरं नीरं नष्टं नग्नाटस्तेन भुवि प्रथितः ॥२५॥

एवं महाव्रतानां नाशस्तत्साधनादराभावात् ।
सत्यं बोटिकमुण्डः नग्नाटस्तेन भुवि प्रथितः ॥२६॥

स्याद्वादाङ्कं जैनं निरस्य सद्दर्शनं निवसनत्वे ।
एकान्तं संश्रितवान् नग्नाटस्तेन भुवि प्रथितः ॥२७॥

ऐकान्तिकमात्यन्तिकमङ्कं मतमाश्रयेषु भिरभिरामम् ।
मात्रस्य नैष मतवान् नग्नाटस्तेन भुवि प्रथितः ॥२८॥

अत एव नास्य सिद्धा मतेऽन्यलिङ्गा गृहस्थलिङ्गाश्च ।

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust
Scanned by CamScanner

चरणाभावान् न वनिता नग्नाटस्तेन भुवि प्रथितः ॥
सुच्छेदं मिथ्यात्वं मतेऽस्य घात्यपि न कायगो वेदः ।
स्त्रीणां, तत् कियदाख्यं नग्नाटस्तेन भुवि प्रथितः ॥३०
तत्त्वार्थाद्याः श्वेताम्बररचना मानिताः परं मोहात् ।
सत्योऽर्थो न तु विवृतो नग्नाटस्तेन भुवि प्रथितः ।३१
त्यक्त्वा जैन्याख्यां स्वं निर्वस्त्रं ख्यापयन् जनेऽलज्जः ।
निर्ग्रन्थार्थं लुम्पन् नग्नाटस्तेन भुवि प्रथितः ॥३२॥
निर्ग्रन्थाः पञ्चोक्तास्तत्त्वार्थाद्येषु तत्र भूषोक्ता ।
वस्त्राणां लुम्पंस्तन् नग्नाटस्तेन भुवि प्रथितः ॥३३॥
चरणे मोहनमुक्तं न चास्ति वस्त्रस्य मोहनं किञ्चित् ।
निर्वस्त्रं निर्मूलं नग्नाटस्तेन भुवि प्रथितः ॥३४॥
ग्रह आश्रवेषु नोक्तो व्रतेऽतिचारे च जैनशास्त्रेषु ।
किन्तु परिग्रह इति वाग नग्नाटस्तेन भुवि प्रथितः ।३५
सविशेषणेन गदितं यत्तु निषेधाय तद्विधिं ब्रूते ।
सामान्ये सिचयात्तद् नग्नाटस्तेन भुवि प्रथितः ॥३६॥
तत्त्वार्थेऽपि तदीये मूर्छोक्ता यत्परिग्रहत्वेन ।
न परिग्रहमुपकरणं नग्नाटस्तेन भुवि प्रथितः ॥३७॥
सिद्धिर्न स तुषवच्चेत् सकायसिद्धिस्तदा भवेत् किं नु ।
दहनयुताऽक्षतसिद्धिः नग्नाटस्तेन भुवि प्रथितः ॥३८॥
सम्यग्दर्शनशुद्धं ज्ञानं चरणं मतं शिवे हेतुः ।
नाग्न्यं त्वजगलकुचवन् नग्नाटस्तेन भुवि प्रथितः ॥३९।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

लभ्ये क्रये बाह्ये चेद्वस्त्रे ते मतिर्निराशंसे ।
सक्ताङ्गे न परं ते नग्नाटस्तेन भुवि प्रथितः ॥४०॥

बाला असहा वृद्धास्तपस्विनः किं समर्पिता गृहिणे ।
चारित्रं रक्षेयुः नग्नाटस्तेन भुवि प्रथितः ॥४१॥

वैयावृत्त्यं जिनताहेतुस्तत्सर्वथा त्वया त्यक्तम् ।
पात्राद्यृते न तद्यन् नग्नाटस्तेन भुवि प्रथितः । ४२॥

सफलं वैयावृत्त्यं तपसि मतं तच्च नान्तरा वस्त्रम् ।
तल्लोपात्तल्लुम्पन् नग्नाटस्तेन भुवि प्रथितः ॥४३॥

येभ्यो बन्धस्तेभ्यः कर्मक्षपणं मतेऽत्र जैनेऽस्ति ।
स्याद्वादात्तल्लुम्पन् नग्नाटस्तेन भुवि प्रथितः ॥४४॥

ये ह्याश्रवास्त एवाभिमताः शास्त्रे परिश्रवाः सर्वे ।
स्याद्वादात् तल्लुम्पन् नग्नाटस्तेन भुवि प्रथितः ॥४५॥

बालं ग्लानं वृद्धं तपस्विनं क्षुत्परिगतं मुक्त्वा ।
जग्धन् पशुवच्चैकः नग्नाटस्तेन भुवि प्रथितः ॥४६॥

बाह्यपरिहारमत्तो न्यषेधयद् विधिगुर्तां जिनार्चां तु ।
प्रहिलांशुकवच्चलितो नग्नाटस्तेन भुवि प्रथितः ॥४७॥

भक्तार्पितकुसुमाद्यैः सङ्गो निलयातिशेषशौचैर्न ।
अर्हत्ता विबुधार्च्या नग्नाटस्तेन भुवि प्रथितः ॥४८॥

चक्षुर्हीना मूर्तिर्जिनस्य किं तत्तनुर्नयनहीना ? ।
अन्धानुकरणमेतद् नग्नाटस्तेन भुवि प्रथितः ॥४९॥

तनुभिन्नवर्णचक्षुर्युतो हि देहीति तस्य चेन्मूर्त्तिः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

नहि देहवर्णचक्षुः (नेत्रा) नग्नाटस्तेन भुवि प्रथितः ॥
स्वसमानं जिनराजं स्पष्टलिङ्गवृषणाढ्याम् ।
विदधानोऽर्चां तद्वद् नग्नाटस्तेन भुवि प्रथितः ॥५१॥
व्यवहारेण हि वनिता न तस्य सिद्धिं व्रजेद्यतो लिङ्गम् ।
पश्येदर्हति साधौ नग्नाटस्तेन भुवि प्रथितः ॥५२॥
उपकृत्युत्थापनतो नास्य जिनो न च मुनिर्न सङ्घोऽपि ।
साध्वीनां शून्यत्वाद् नग्नाटस्तेन भुवि प्रथितः ॥५३॥
अर्हन् सङ्घं धर्मं दिशंश्चतुर्विधमिमं न देष्टा स्यात् ।
साध्वीनां शून्यत्वाद् नग्नाटस्तेन भुवि प्रथितः ॥५४॥
स्त्रीणां निर्लज्जत्वान्नाग्न्यं न हि दुष्करं यतोऽप्यक्षम् ।
निर्वस्त्रा योगिन्यो नग्नाटस्तेन भुवि प्रथितः ॥५५॥
पुरुषाणामपि देहो विचित्रगण्डूपदादिधामाऽस्ति ।
हिंसा न चाप्रमादे नग्नाटस्तेन भुवि प्रथितः ॥५६॥
पुण्यनिकायोद्भूतं सर्वार्थे चेद् गमनमविरुद्धम् ।
स्त्रीणां तत्परभावः नग्नाटस्तेन भुवि प्रथितः ॥५७॥
पुण्ये सति चेत्पापे न परा बुद्धिर्भवेदिह स्त्रीणाम् ।
को मोक्षे प्रतिबन्धो ? नग्नाटस्तेन भुवि प्रथितः ॥५८॥
नाधो गमने शक्तिर्बलदेवानां ततः किमु स्वर्गम् ।
गन्तारो खलु ते न नग्नाटस्तेन भुवि प्रथितः ॥५९॥
नियताधोगतिमन्तः किं हरयो ? यन्न ते सुरभवार्हाः ।
जातिविशेषः स्त्रीवन्नग्नाटस्तेन भुवि प्रथितः ॥६०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

साम्यं न पुण्यपापोद् बन्धे जीवस्य मोक्षणे चेत्किम् ।
तत्त्वानां भिन्नत्वाद् नग्नाटस्तेन भुवि प्रथितः ।।६१।।
मत्स्यो यात्यध उत्तमक्ष्मां न सर्वार्थमेति किं नूर्ध्वम् ? ।
न बन्धेऽपि व्याप्तिः नग्नाटस्तेन भुवि प्रथितः ।।६२।।
जिन-गणि-मुनिराजः किं सर्वार्थं शिवपदं च गन्तारः ।
यातारोऽधउदग्राः नग्नाटस्तेन भुवि प्रथितः ।।६३।।
जीवस्य शुद्धिहेतुः परिणामो बन्धने तु हृदयस्य ।
जैनोऽवश्यं वेत्ता नग्नाटस्तेन भुवि प्रथितः ।।६४।।
बन्धेऽपि चेन्न साम्यं पुण्यस्याद्यस्य तर्हि किं क्षपणे ।
ग्रहिलः साम्यं कुर्वन् नग्नाटस्तेन भुवि प्रथितः ।।६५।।
मालिन्याज्जीवानां बन्धः पापस्य, शुद्धितः सुकृतः ।
अविदन्नेतन्मात्रं नग्नाटस्तेन भुवि प्रथितः ।।६६।।
सम्यक्त्वोत्पत्तौ प्राग् यः परिणामो भवेन्न जीवस्य ।
अपतन् सार्वज्ञ्याज्ञं नग्नाटस्तेन भुवि प्रथितः ।।६७।।
श्राद्धो मुनिवत्सामायिके भवन् पौषधे च विधियुक्तम् ।
नग्नः प्रमार्जयेत् किं ? नग्नाटस्तेन भुवि प्रथितः ।६८।
शय्यासंस्तारकयोर्लोपाच्छिक्षाव्रते न सूत्रोक्ते ।
तेन मते विपरीते नग्नाटस्तेन भुवि प्रथितः ।।६९।।
पूर्वं पश्चात्कर्म पात्राऽभावात् सदा तवाऽऽपन्नं ।
अन्तर्गृहेऽशनात्ते नग्नाटस्ते भुवि प्रथितः ।।७०।।
अप्रासुकजलमिष्टं पात्राभावाद् गृहस्थवत्ते नु ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

शतमुखपातो भवतो नग्नाटस्तेन भुवि प्रथितः ॥७१॥
शिशिरे तृणसंहत्या व्यवहारः सिचयवर्जनाज्जातः ।
वाहनमपि स्फुटं ते नग्नाटस्तेन भुवि प्रथितः ॥७२॥
त्वद्धेतोर्गृहिणस्ते शिशिरेऽग्निं सर्वतः प्रकुर्वन्ति ।
त्वय्यनुकम्पां दधतः नग्नाटस्तेन भुवि प्रथितः ॥७३॥
दैगम्बरं न दर्शनमन्येषामपि स्वतो न सिचयानि ।
जैनं चेत् किमनेन हि नग्नाटस्तेन भुवि प्रथितः ॥७४॥
श्वेताम्बरभेदार्थं चेत्ते त्वत्तः पुरातनाः सिद्धाः ।
व्यर्थं विशेषणं न नग्नाटस्तेन भुवि प्रथितः ॥७५॥
सत्यं जनैस्त्वमुक्तः-किं वस्त्राणि न ते प्रदृश्यन्ते ? ।
आशाम्बरोऽहमात्थ नग्नाटस्तेन भुवि प्रथितः ॥७६॥
द्वाविंशतेर्जिनानां बहुविधवर्णांशुकादराद् भिन्नाः ।
सितसिचयाः कल्पोऽयं नग्नाटस्तेन भुवि प्रथितः ।७७।
भिन्नाश्चेत्त्वत्तस्ते ख्याताः सिचयाङ्किता इति स्पष्टम् ।
स्युर्वाऽमी सग्रन्था नग्नाटस्तेन भुवि प्रथितः ॥७८॥
अन्तर्व्याप्त्या साध्यं सिध्येदिति मन्यमानचेतास्त्वम् ।
यद्वा तद्वा प्रलपन् नग्नाटस्तेन भुवि प्रथितः ॥७९॥
स्त्रीणां नरकविशेषेऽगमनं दुर्भिक्षमत्र किं ब्रूषे ।
बाह्यव्याप्ते रूपं नग्नाटस्तेन भुवि प्रथितः ॥८०॥
दुर्भिक्षे ह्येकान्तं निश्चेलत्वं च भवति भुवि सिद्धम् ।
द्रुमुमी सितांशुका न तु नग्नाटस्तेन भुवि प्रथितः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

न सिताम्बरागमेषु काचिच्छाया सुगष्ट्रसत्काऽस्ति ।
सौगतपिटकसमेषु च नग्नाटस्तेन भुवि प्रथितः ।८२।
चलति मतं नाऽशास्त्रं त्वत्पाश्चात्यैः कृतानि रुचितानि ।
श्रित्वाऽऽगमान् श्रुतानि नग्नाटस्तेन भुवि प्रथितः ॥
किं ते प्राच्या धतुं लघूनिदशकालिकादिशास्त्राणि ।
शिशु-पाठ्यान्यऽसमर्था नग्नाटस्तेन भुवि प्रथितः ।८४।
शास्त्रे पट्टावल्यां विभूतिषु च कल्पयन्नसत्यं ते ।
न सलज्जः किं सूरिः नग्नाटस्तेन भुवि प्रथितः ॥८५॥
निन्द्यो निरघोप्यर्हन् सलिङ्गमूर्त्या त्वया जगति चक्रे ।
निरवद्योऽपि च मुनिराट् नग्नाटस्तेन भुवि प्रथितः ॥
लिङ्गं सयोनि महता स्त्रिया समेतं च देवमन्येऽमी ।
न सलिङ्गवत्सलज्जा नग्नाटस्तेन भुवि प्रथितः ॥८७॥
छद्मे लिङ्गाण्डयुग्मे तथा न लज्जां वहेद्वस्त्रोऽपि ।
स्फुटलिङ्गाण्डयुगाऽर्चा नग्नाटस्तेन भुवि प्रथितः ।८८।
सिद्धत्वबुद्धिधात्री मूर्त्तिर्जैनेश्वरी ततो द्वन्द्वम् ।
तस्या आसनमनघं नग्नाटस्तेन भुवि प्रथितः ॥८९॥
वसनं न सिद्धताया लक्षणमिति तद्भवतु मा मूर्त्तौ ।
सिद्धे सामान्ये स्यात् नग्नाटस्तेन भुवि प्रथितः ।९०।
रैवतकं गिरिराजं त्वयि लुण्टितुमागते सुधीः सूरिः ।
चक्रेऽश्वलिकाचिह्नं नग्नाटस्तेन भुवि प्रथितः ॥९१॥
उपविष्टायां स्पष्टं मूर्तौ तव लिङ्गवृषणयुगलं स्यात् ।

P.P. Ac. Gunratnasuri M.S.          Jun Gun Aaradhak Trust
Scanned by CamScanner

गतबुद्धिना मतं ते नग्नाटस्तेन भुवि प्रथितः ॥९२॥

सर्वे जिनाः सदूष्या निष्क्रान्ता इति धिया धृतेयमश्वलिका ।
पट्टलिकायां विबुधैः नग्नाटस्तेन भुवि प्रथितः ॥९३॥

गुरुवच्छिष्या इति चेन्मतं न तत् सुन्दरं यतो जिनाः सर्वे ।
इन्द्रवसनसंयुक्ता नग्नाटस्तेन भुवि प्रथितः ॥९४॥

नाशक्तः शक्तस्यानुकरोति चरित्रमुदारवृत्तः सन् ।
काकः किं हंसानुगः नग्नाटस्तेन भुवि प्रथितः ॥९५॥

स्तेन्यं तीर्थे चैत्ये मूर्तौ शास्त्रे कुले गणे सङ्घे ।
निर्लज्जः यत् कुरुषे नग्नाटस्तेन भुवि प्रथितः ॥९६॥

न विना साधूंस्तीर्थं तव तद्धर्त्तारकैः सदा विधृतम् ।
हिंसार्थरक्तचित्तैः नग्नाटस्तेन भुवि प्रथितः ॥९७॥

श्रमणोपासकभावः साधुषु सत्सु प्रभूतगुणसिद्धयै ।
चित्रं तव केवत्वे नग्नाटस्तेन भुवि प्रथितः ॥९८॥

सङ्घश्चतुर्विधः स्यात्तीर्थं तव हीनमेव निर्ग्रन्थ्या ।
त्रिपादमश्ववन् ननु नग्नाटस्तेन भुवि प्रथितः ॥९९॥

यावत्तीर्थं श्रमणास्तव तीर्थं साधुमन्तरेणापि ।
तद्धर्मेण विहीनं नग्नाटस्तेन भुवि प्रथितः ॥१००॥

नग्नाटशिक्षणायैत-दार्याशतकमुद्धृतम् ।
सुरते साधुनाऽऽनन्दाद्भव्यानां हितहेतवे ॥१०१॥

॥ इति नग्नाटशिक्षा–शतकम् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# त्रिपदी-पञ्चसप्ततिका ।

सर्वे जिनेश्वरा बुद्धान्, जगुरादौ गणाधिपान् ।
उत्पत्तिर्विगमो ध्रौव्यमिति पूर्णां पदत्रयीम् ॥ १ ॥

तत्रोत्पत्तेः समादाय पदं मान्यं मनीषिभिः ।
जीवाः संसारिणः सर्वेऽनुक्षणं चलिता यतः ॥ २ ॥

चलितं स्याच्चलद् वस्तु, चलनात् कर्मबन्धनम् ।
प्रतिक्षणमतो नान्यच्चलनं चलिताद् भवेत् ॥ ३ ॥

मिथ्यात्वादिवशाज्जन्तोः स्वरूपाच्चलनं सदा ।
कर्मोदयादनाभोगेऽप्येषां बन्धस्य हेतवः ॥ ४ ॥

यथा भुक्तात्तनौ सप्त-धातवो मलसंयुताः ।
जीवानामन्धसोभोगाभावेऽपि पूर्वहेतुकाः ॥ ५ ॥

ये स्वभावं परित्यज्य मिथ्यात्वादिदशां गताः ।
ध्रुवं तेषामुदीर्यन्ते तत्तत्कर्माणि तत्क्षणे ॥ ६ ॥

भिन्नः क्षणो नात्र कर्मोदीरणोदीर्णतागतः ।
प्रतिक्षणं ततः कर्मो-दीर्यमाणमुदीरितम् ॥ ७ ॥

न कोऽपि जीवः संसारी भवेत् कर्मानुदीरकः ।
चलितोऽङ्गी ततोऽवश्यं कर्मणां स्यादुदीरकः ॥ ८ ॥

कर्माष्टकाच्चला जीवाः सर्वकर्मसमुदीरणाः ।
कर्माण्यष्टाऽनुक्षणं ते वेदयन्ते कृतानि प्राक् ॥ ९ ॥

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust
Scanned by CamScanner

वेद्यमानं वेदनं च न पृथक् क्षणिकं यतः ।
वेदितं वेद्यमानं तत् समस्तं कर्म गीयते ॥ १० ॥

न च कोऽप्यस्ति संसारी नागतः शिवसाधनम् ।
प्रतिक्षणं च यः कर्माष्टकं वेदयते नहि ॥ ११ ॥

कर्मणां वेदितानां स्या-दवश्यं क्षय आत्मनाम् ।
एवं पदानि चत्वार्येकस्मिन्नात्मनि नित्यशः ॥ १२ ॥

निर्जरा कर्मणां देशान्नाशः सोऽत्र क्षयः परम् ।
भेदा द्वादश तस्याः स्युः शिवाप्त्यै साधुभिः कृता ॥ १३ ॥

अ(स)कामेयमिति ज्ञेया निर्जराऽपि क्षयात्मिका ।
भुक्तानामंहसां कार्त्स्न्य-नाशात् प्रक्षय ईरितः ॥ १४ ॥

चतुष्पदीं विना नास्ति यथाङ्गी भवभूतिभाक् ।
एनां तथा विविक्त्यैषा नाङ्गिनि क्वापि सम्भवेत् ॥१५॥

भवोऽस्या न विनैतां स्यात् स तद्रूप एव सः ।
उत्पन्नपक्ष इत्याम्–राम्नातोऽयं गणेशिनः ॥ १६ ॥

गणेशाश्च निशम्यैनं गतिजातिमुखाः समाः ।
मार्गणाः सूक्ष्मबोधास्ताः शास्त्रेष्वातेनुरार्हतीः ॥१७॥

एवमणवाद्यजीवेषु प्राक् पर्यायविनाशतः ।
चलनं नूतनोत्पादाभिमुखत्वमुदीरणा ॥ १८ ॥

तत्तद्भावेन यत्स्थान-मणवादीनां द्विधा पुनः ।
विस्रसात्मात्मयत्नोत्थं, समं वेदनमुच्यताम् ॥ १९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

स्थितेः क्षये पुनः प्राच्य-पर्यायक्षय इष्यताम् ।
प्रक्षयस्तेन सर्वेषा-मजीवानां तदात्मता ॥ २० ॥

धर्मादीनां वगाहादौ वर्णादिषु च रूपिणाम् ।
ये भावास्ते समेऽप्याप्ताः पक्षेणोत्पत्तिनामिना ॥ २१ ॥

तत एव मुमुक्षूणां यथातत्त्वद्वयं मुखे ।
जीवाजीवात्मकं ख्यातं भवहेतुस्तथाऽऽश्रवः ॥ २२ ॥

पुण्यं पापं विचित्रश्च बन्ध आत्ममिरं हसाम् ।
तत्त्वषट्कं समुत्पत्तेः पक्षे स्याद्विततं बुधैः ॥२३ ॥

द्वितीयोऽपि च पक्षोऽस्ति यो विगमात्मतया स्मृतः ।
भिन्नस्थानि पदान्यस्य छेदाद्याख्यानि पञ्च तु ॥२४ ॥

आश्रवः पुण्यपापे सबन्धे च प्राणिषु ध्रुवम् ।
सयोगकालमर्यादं समेष्वस्त्येव यद्यपि ॥ २५ ॥

नादेयत्वं तथाप्येषां ध्रुवं यद् भवकारणम् ।
सर्वोऽप्युत्पत्तिपक्षोऽय-मित्येकस्थत्वनिर्णयः ॥ २६ ॥

जैनेन्द्रशासने नैवा-भ्युदयः साध्यतां व्रजेत् ।
मोक्षसाध्यं मतं जैनं मोक्षश्च विगमात्मकः ॥ २७ ॥

अनन्तान् पुद्गलावर्तान् जीवो भ्राम्यन् भवोदधौ ।
चरमेऽव्यवहारभावे सोऽनादितो भवं श्रितः ॥ २८ ॥

कालादियोगतो बध्नन्-नल्पं निर्जरयन् बहु ।
भव्योऽभव्योऽपि वा कश्चिन् मनुजत्वं समश्नुते ॥ २९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

दशोक्तमक्रियावादं स्यान्मिथ्यात्व्यभिनिश्रितः ।
कृष्णपक्षः स नियमात् चिन्वन् भूर्यल्पमुज्झति ॥ ३० ॥

भव्यङ्ग्यपि च नैतत्स्थः स्याच्चरमावर्तभावभाक् ।
मितानामी दशां-भावा-द्दृढबन्धेऽपि न क्षतिः ॥ ३१ ॥

कश्चिदेव ततः शुध्यन्नङ्गी स्यात् शुक्लपाक्षिकः ।
क्रियावादं दशोक्तं यः श्रित्वा स्यान्मार्गसङ्गतः ॥ ३२ ॥

स शुक्लपाक्षिकोऽङ्गी सन् मुक्त्यर्थमुत्थितो पि हि ।
अज्ञोऽश्रद्धश्च मार्गस्य स्यादनाभोगनिर्जरः ॥३३ ॥

तथावस्थोपि सोऽङ्गयत्र कोटीकोट्यधिकां स्थितिम् ।
सर्वेषां कर्मणां छिन्द्यात् प्रतिपात्यपरोऽप्ययम् ॥ ३४ ॥

प्रथमो विगमो ह्येष छेदाख्यो यदनन्तशः ।
छिन्नोऽपि जायतेऽनन्त-कायवद् भूरिशो भवेत् ॥ ३५ ॥

भाविभद्रस्ततः कश्चिद् भिनत्ति ग्रन्थिपर्वतम् ।
अपुनर्भावभाग्येष, भेदः सम्यग्दशामयम् ॥ ३६ ॥

सम्यक्त्वात् प्रतिपाते स्याद्रसो वृद्धो घनांहसाम् ।
स्थितिं न लङ्घयत्येव जातो मिथ्यात्व्यतः परम् ॥३७॥

द्वितीयो विगमो भेद-नामाऽयं सद्दृशौ नरे ।
ग्रन्थिं भित्त्वा न कोऽप्यङ्गी सद्दृशा वञ्चितो भवेत् ॥३८॥

अत एव च तत्त्वार्थ–भाष्यकारैरदो मतम् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अपूर्वकरणं त दृग् येनासौ नर आप्नुते ।
निसर्गजां दृशं शुद्धां नोक्तं करणं पुरोभवम् ॥ ३९ ॥

भेदस्यैतादृशत्वाद्धि नानन्तो भेदरूट् मतः ।
नरत्वस्यापि दौर्लभ्ये भिन्नोऽणुर्ज्ञातमाश्रितः ॥ ४० ॥

अनिवृत्ति मतं शास्त्रे करणं दृष्टिसिद्धये ।
भेदं विधाय न ग्रन्थे-र्हीनः स्यान्न नरो दृशा ॥ ४१ ॥

भाष्येऽतोऽपूर्वकरण-मेकमेव समीरितम् ।
भेदाख्यो विगमश्चैव-मनिवर्त्योऽङ्गिनि क्वचित् ॥ ४२ ॥

नैकेऽङ्गिनश्छिदां कृत्वाऽनन्तशः पुनरेव ताम् ।
बन्धस्थितिं समायान्ति पुरोगास्तु मिताः क्वचित् ॥४३॥

मिथ्यादर्शनभेदान्त-मनेकेऽगुरिहाङ्गिनः ।
देवा नैरयिकाश्चात्रा-वस्थिता न पुरो गताः ॥ ४४ ॥

समानवाश्च तिर्यञ्चो यद्यप्यग्रेगतिं गुणे ।
कुर्युस्तथापि तेऽत्रस्था भूरयः पुरतोऽल्पकाः ॥ ४५ ॥

पुण्यवानन्त्यदेहोऽङ्गी कश्चित्तुर्याद्गुणात्पुरः ।
आरोहन् क्षपकश्रेणिं दहेत् कर्मावलीं समाम् ॥ ४६ ॥

अनेकशोऽङ्गिनां पापभेदोऽसङ्ख्यश आप्यते ।
परं न क्षपकश्रेणिस्तेन दाहोऽत्र कर्मणाम् ॥ ४७ ॥

यथा दग्धेऽङ्कुरे नैव पुनस्तत्सम्भवो न च ।
दाहस्तस्य तथाऽत्रैषां-हृतां भवो दाहश्च नो पुनः ॥ ४८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

कश्चिदेवाऽत्र जीवः स्याल्लघुत्त्वपणविश्रमी ।
परं नासम्भवस्तस्य ततो दाहः स्थितः क्वचित् ॥ ४९ ॥

दुःखमूलो भवोऽनादि-र्भवः कर्मनिदानकः ।
कर्माणि मोहमूलानि दाहोऽतोऽस्य मतो बुधैः ॥ ५० ॥

कर्मकाष्ठोच्चये वह्नि-स्तपसो न परो भुवि ।
तपोऽपि ध्यानवैशद्यं त्त्वपकश्रेणिगं च तत् ॥ ५१ ॥

छेदकानामसङ्ख्योंऽशः कर्मैधोदाहको भवेत् ।
कालेनानादिनाऽनन्त-स्तथा जाताः शिवाध्वगाः ॥ ५२ ॥

अनन्तैः कर्मभिर्बद्ध-स्तैजसैः कार्मणैस्तथा ।
सदाऽङ्गी तेन वृत्ताभ्र-स्थो न शुचिस्ततोऽपि च ॥ ५३ ॥

निगोदजीवगोलानां ततो वृत्तावगाहना ।
विहाय लोककोणादि-भागान् लोकेऽत्र गोलकाः ॥ ५४ ॥

अस्पृशन् मध्यमंशं न कोऽपि लोके निगोदगः ।
असंख्यास्तादृशो लोके गोलाः सोऽनन्तजीवकः ॥ ५५ ॥

प्रतिगोलं वगाहाः स्यु-रसंख्या निगोदा गतसंख्यकाः ।
व गाहेऽनन्तजीवाश्च निगोदे चूर्णपूर्णवत् ॥ ५६ ॥

अनन्तांशो निगोदस्य गन्तुमर्हति निर्वृतिम् ।
नासंख्यांश क्वचित् काले भव्यच्छेदस्ततो न हि ॥५७॥

व्यवहारे स्थितः सिध्येन्नानन्तास्तद्गतासवः ।
षट्कायावस्थितिर्नित्या जीवोच्छेदो न तद् ध्रुवम् ॥५८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सावष्टम्भा नराः (पुनः) सिद्धिं यान्ति षट्कायगः पुनः ।
अवष्टम्भो न तत्सिद्धि-मगुः सर्वेऽपि देहिनः ॥ ५९ ॥

मोहप्राणानि कर्माणि मृतान्यस्मिन् गते पुनः ।
यावदन्त्यां गुणश्रेणिं मृतकर्मप्रमारणम् ॥ ६० ॥

ज्ञानघ्नादीन् द्वादशान्त्ये सयोगेऽन्त्ये सदादिकान् ।
समुद्घातेन निघ्नन् स्या-न्म्रियमाणस्य मारकः ॥ ६१ ॥

संसारप्राणभृत्त्वैक-मप्यंशु कर्म तन्मृताः ।
सर्वेऽप्यमी भटः पापा म्रियमाणं मृतं ततः ॥ ६२ ॥

एवं सत्यपि कालोऽत्र विलम्बयति देहिनम् ।
तत्पृथक् स्थायितैषा न परा यत् सर्वमोक्षगाः ॥ ६३ ॥

अनादिकालतो जीवा बद्धकर्मप्रवेदनाः ।
वेदितानां क्षयो नूनं निस्सत्ताकः परं न सः ॥ ६४ ॥

नितरां जरणं यद्यत् स्यान्निःसत्ताकनाशनम् ।
वस्तुनस्तद्भवान्मुक्तः प्राणी तात्त्विकनिर्जरः ॥ ६५ ॥

अयोगिनि न योगाना-मेकाग्र्यं रोधनं तथा ।
योगाभावेऽप्यधीशास्ते कुर्वते कर्मनाशनम् ॥ ६६ ॥

श्रेण्या प्रागेव सर्वाणि कर्माण्यावर्जिनः प्रभुः ।
कृत्वा क्षय्याणि शैलेशीं समाश्रयति केवली ॥ ६७ ॥

भवान्त्ये सर्वकर्माणि शरीराणि च सर्वशः ।
नेशुरेषां ततोऽत्रैव जीर्णं तु जीर्यमाणकम् ॥ ६८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

भावाः सामयिकाः सर्वे दीर्घकालं श्रिता अपि ।
आरम्भः समयेऽन्ताश्च पृथक् तज्जैनशासनम् ॥ ६९ ॥
पञ्चैते विगमे भेदा, नानास्था भिन्नकालतः ।
नानाघोषा व्यञ्जना च ध्रुवा नवपदी पुनः ॥ ७० ॥
एवं भवस्य मोक्षस्य रूपं गीतं जिनेश्वरैः ।
गणेशिनां पुरस्ते च द्वादशाङ्गं श्रुतं व्यधुः ॥ ७१ ॥
लोकाद्याः सप्ततिश्चार्थां औपपातिककीर्तिताः ।
तृतीये तु पदे ध्रौव्येऽ-र्हद्भिरुक्ता गणेशिनाम् ॥ ७२ ॥
लोकानुभावता ह्येषा यथा लोकादिसंस्थितौ ।
तथा शुभाच्छुभं कर्म-शुभाद्योगात् परं पुनः ॥ ७३ ॥
नित्यत्वादेवमर्थानां द्वादशाङ्गं श्रुतं ततः ।
वाच्यार्थापेक्षया नित्यं रचना शब्दरूपतः ॥ ७४ ॥
उत्पाद-नाश-ध्रौव्याणा-मेवमाकर्ण्य सिद्धिदं ।
रूपं गणधराः सर्वेऽप्यानन्दाद् द्वादशांङ्गभाः ॥ ७५ ॥

पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता
त्रिपदी-पञ्चसप्ततिका समाप्ता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# गणधरसार्धशतक-समालोचना ।

नत्वोत्तंसं धुरीणस्य केशरीयं जिनं मुदा ।
चारित्रसिंहमिथ्योक्तिं दर्शयामि सुबुद्धितः ॥ १ ॥

गणधरसार्धशतकगं प्रकरणं तेन यत् कृतं मत्या ।
तद्गतमशेषमेष हितबुद्ध्याऽऽलोचयाम्यत्र ॥ २ ॥

गदितं यत्तेन वाचनं सूरीणां वर्धमानसञ्ज्ञिनाम् ।
प्रवचनसारादिगानां गाथानां तन् न युक्तिमद् भवेत् ॥३॥

प्रवचनसारो हि सूरिभिः विहितः श्रीनेमिचन्द्रमुनिधुर्यैः ।
पश्चात् तत्तद्वाचनमसम्भवि स्यात् कथं तेषाम् ॥ ४ ॥

पत्तननगरे गमनं जिनेश्वराणां मतं तु सूरीणाम् ।
अनुवर्धमानसूरेः पार्थक्यात् सङ्घतिलकेन ॥ ५ ॥

अत्र तु सहैव तेषां खाष्टत्रियदिन्दु १०८० सम्मिते वर्षे ।
गमनं मतं न च तदाऽऽज्ञाविषुर्वर्धमानविदः ॥ ६ ॥

सूराचार्यैः पत्रं पूर्वं मण्डनकृते व्यधुश्चैत्ये ।
वासस्य तन्न युक्तं यन्नासन् ते तदा विज्ञाः ॥ ७ ॥

सत्सु च मुनिपेषु विज्ञाः वर्धमानेषु खरतरं विरुदम् ।
दद्युस्तेभ्यो न मता जिनेश्वराः प्रज्ञया बहुलाः ॥ ८ ॥

शिष्यकृतो वा विजयो विद्यमानेषु गुरुषु सङ्क्रामेत् ।
योद्धैः कृतो यथाऽसौ स्वामिन्येवेष्यते तत्त्वात ॥ ९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

किञ्च तदाऽभयदेवा जिनेश्वरा बुद्धिसागराश्चाऽऽसन् ।
जावालिपुरे यस्मात् तत्र कृतं ग्रन्थयुग्मं तैः ॥ १० ॥
श्रीमज्जिनेश्वराभयदेवाभ्यामष्टकस्य सद्वृत्तिः ।
श्रीबुद्धिसागरेण च व्याकरणं संस्कृतं नव्यम् ॥ ११ ॥
तत्तद्ग्रन्थान्त्यभागे वर्षाङ्कः स्थानसंयुतो दिष्टः ।
स्पष्टः सत्यप्येवं यदन्यथाख्यानमेतत् किम् ॥ १२ ॥
सूरीणां प्राग्दीक्षाऽभयदेवानां बभूव तत्कालात् ।
यत्त्वसमञ्जसकथनं तद्ध्यान्ध्यं ज्ञेयममितमिह ॥ १३ ॥
दुर्लभराजा नाभूत्तदा नृपः पत्तने यतस्तस्य ।
दशशत्यां सप्तसप्तत्यां षण्मास्यां च्युती-राज्यात् ॥ १४ ॥
संवेगरङ्गशाला कृता रसाला जिनेन्दुसूरिवरैः ।
स्थानाङ्गादिविवरणान्यभयमुनीन्द्रैर्निबद्धानि ॥ १५ ॥
सुरसुन्दर्याश्चरितं बुद्ध्यम्बुधि-चरणकमलभृङ्गसमैः ।
अल्लोपाध्यायपदैरचितं तद्वर्षतः पश्चात् ॥ १६ ॥
एवं श्रीवीतरागनुत्यनुयोगं गुरुः प्रभानन्दः ।
चक्रे परं न क्वापि खरतरबिरुदस्य गन्धोऽपि ॥ १७ ॥
न जिनेश्वरैर्न तदनुगमुनिधुर्यैर्बिरुदमुक्तमेतद्धि ।
मुक्त्वा खररटनपरान् खरतरगच्छात्मजान् कैश्चित् ॥१८॥
द्रोणाचार्यैः शुद्धिर्वृत्तीनां कारिताऽङ्गवृन्दानाम् ।
आचार्याभयदेवैर्न स्यात् सा तैः समं क्लेशो ॥ १९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

श्रीवेशगच्छधुर्यैः श्रीजिनचन्द्रैः कृतस्य शास्त्रस्य ।
रचितं भाष्यं पूज्यैः कथं भवेद् द्वेषभाक्त्वेऽद्ः ॥ २० ॥

तत्प्रामाण्यात् पूज्या नवपदशास्त्रस्य मेनुरर्हत्त्वम् ।
श्राद्धव्रतेषु भङ्गातिचारपार्थक्यमाचख्युः ॥ २१ ॥

पञ्चाशकस्य वृत्तावुपासकाङ्गस्य विवरणे सम्यग् ।
न यथाछन्दत्वे तत् तेषां पूज्याः समाख्यासयन् ॥ २२ ॥

किञ्चाभयदेवगुरोः स्वर्गगतेः कतिपयेषु वर्षेषु ।
जातेषु मता जिनवल्लभस्य गणिताऽस्य किमु पदगा ? ॥२३॥

जिनवल्लभः स्वकीये प्रश्नोत्तरषष्टिशतकमध्येऽवक् ।
शिष्यत्वं कूर्चपूःस्थ-जिनेश्वरस्यायतनगस्य ॥ २४ ॥

मुन्यग्निभूमिचन्द्रे वर्षे जिनवल्लभस्य शिष्येण ।
कोट्याचार्यीय वृत्तिर्लिखिताऽस्यान्तेऽलिखत् भोऽपि ॥२५॥

जिनवल्लभस्य गणिनः कूर्चपुरीयस्य शिष्यतां स्पष्टम् ।
सा पुण्यपत्तनस्था विलोकनीया प्रतिर्विज्ञैः ॥ २६ ॥

न च कोपि शिलालेखो विलोक्यते विक्रमार्कमनुशत्याः ।
पूर्वं खरतरनाम्नोपलक्षितस्तत्कथं प्राक् तत् ? ॥ २७ ॥

किञ्चाभयदेवसूरिः स्वयमाख्यत् सूत्रवृत्तिपर्यन्ते ।
शुद्धिर्द्रोणाचार्यैः कृतेति पूर्वं कुतो वृत्तिः ॥ २८ ॥

श्रीमद् द्रोणाचार्यैर्या विहिता वृत्तिरोघनिर्युक्तेः ।
साऽभयदेवमुनीन्द्रैर्न शोधिता तत्र को नेता ॥ २९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

विहितोपसम्पदि श्रुतेः स्पष्टतयाऽवाचि किं पदेशत्वम् ।
किं वर्धमानसूरिः स्वपदे न्यस्तो न सन्दिष्टः ? ॥ ३० ॥

किञ्चाभयदेवसूरेर्मतं न लोकाः समाद्रीरंश्चेत् ।
किं कर्णजापकल्पनमकारि तन्नामतः कूटम् ॥ ३१ ॥

वसतेरनर्पणात्ते वासश्च चण्डिकामठे श्रद्धैः ।
जिनवल्लभस्य तत् किं मुधाऽस्य चामुण्डिकत्वं स्याद् ॥३२॥

षष्ठं गर्भापहारं द्वितीयमाख्यात् कथं न शून्यमनाः ।
ध्वनि ममाहसमूहस्य चात्राप्रकाशितस्योक्तिराख्याति ॥ ३३ ॥

चैत्यनिवासिभिरपि तन्न्यषेधि किं वल्लभेन भणितं नु ।
किं चैत्यवासि-चैत्ये महं विकीर्षाऽभवत्तस्य ॥ ३४ ॥

मुनिचन्द्रशिष्ययुग्मे कलङ्कदानं स्वभक्तवश्यत्वे ।
स्वोत्कर्षान्यापकर्षकृते खराणां स्वभावोऽयम् ॥ ३५ ॥

श्रीमन्मुनिचन्द्रसूरिस्तर्कसिद्धान्तवित् कथं तस्य ।
शिष्यौ सिद्धान्तार्थं तस्यागातां समीपे नु ॥ ३६ ॥

मृत्युविषये यथाऽस्य विपर्ययो मासवर्षयोर्जातः ।
स्वस्य तथा षष्ठे श्रीवीरकल्याणकेऽप्यभवत् ॥ ३७ ॥

संहननमस्थिनिचयं सिद्धान्ते कथ्यते तथाप्यस्य ।
महती भ्रान्तिर्जाता यच्छक्तिं प्राह स्वग्रन्थे ॥ ३८ ॥

मलयगिरीशैः स्पष्टं जीवाभिगमस्य विवरणे ख्याता ।
तुर्योपाङ्गस्य तथोत्सूत्रोदितिरस्य तद्विषये ॥ ३९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

नैवदनाभोगसम्भवमाशङ्क्यं यत् स्वतः समाख्यात् सः ।
तत्रैव वैपरीत्याद् विषयं शक्त्यस्थिसंहत्योः ॥ ४० ॥

वृत्तौ कल्पस्योक्तं हस्तोत्तरा बहुवचनमालोक्य ।
कल्याणकबाहुल्यं दुर्बोधाऽस्यापि तद्विषये ॥ ४१ ॥

यत्तत्र स्वाभाव्याद् बहुवचनं फाल्गुनीरवात् कोशे ।
व्याकरणे चाख्यातं तत्तद्ग्रन्थाद्बुधैर्मुनिभिः ॥ ४२ ॥

एवं सत्यपि येऽन्ये जगुः फलं तत्र तत्र तद्वचने ।
तदनाभोगजमखिलं तद्वीक्षणसम्भवं यस्मात् ॥ ४३ ॥

दीक्षाऽह्नि जिनदत्तश्चकार नूत्नाङ्कुरावलेर्नाशम् ।
तत्फलमीक्ष्यं विबुधैरनाग्रहैः किं मुधा स्तोत्रैः ॥ ४४ ॥

यच्चोदितं ममाऽऽसीत् चोटिका तां प्रदेहि येन गृहम् ।
गच्छामीत्यस्य फलं विबुधाः स्वयमामृशन्तु धिया ॥ ४५ ॥

ईर्ष्यानलावलीयं यत् ख्यातं गौर्जरत्र संयमिषु ।
श्रीपर्णाक्षालम्बश्रुतयोऽपीत्थं निर्जीवत्यम् ॥ ४६ ॥

न कृतं वाहडचैत्ये लघ्वाचार्यैर्गतस्य जिननत्यै ।
नमनं जिनदत्तस्याभवत् तच्चैत्यपार्थक्यम् ॥ ४७ ॥

नाऽर्चा कार्या नार्या जिनदत्तोपज्ञमेतदार्याणाम् ।
सिद्धान्तविरुद्धत्वात् कथमेयाद् मान्यतां वाक्यम् ॥ ४८ ॥

शास्त्रेषूक्ता स्पष्टं द्रौपदीस्वर्णगुलिकाप्रभृतेः ।
जिनबिम्बानामर्चा जिनकोशोच्छेदकोऽयं तत् ॥ ४९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सुविहितधुर्यं देवाचार्येऽभ्याख्यानमाहितं तैस्तत् ।
विबुधैर्ज्ञेयं तत्कुलमावसमं नान्यथा किञ्चित् ॥ ५० ॥

इत्येवं जिनमार्गमाप्य सुविधेः पन्थाः समालोक्यतां,
सत्यासत्यविचारचारुचरिमा किं स्वीयमिथ्याश्रवैः ? ।
चिन्त्या भावदयाऽभिमानरसिकैर्दृश्येऽनृते संस्तवे,
सद्बोधावगतार्हदागमसुधैरानन्दमाप्यायकैः ॥ ५१ ॥

पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता
गणधरसार्धशतक-समालोचना समाप्ता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# तीर्थ - पञ्चाशिका ।

तीर्थेशा भविनां सदा विदधतु श्रेयोनिधिं सन्ततं,
यै र्भव्योद्धृतिकारकाणि विशदं तीर्थानि गीर्णान्यरम् ।
यद्वज्ज्ञानतीर्थमाप्तनिपुणैर्दिष्ट्वा श्रुतं स्थापितं,
नाना-जन्तुविमोचनेन स्थितिमत्तीर्थं कृतं सिद्धये ॥ १ ॥

आप्त्वा तीर्थकरादिकाच्छुचितरं बोधं जगत्तारकं,
लात्वा संयममस्तपापमनसा धृत्वा च यावद्भवम् ।
प्रान्ते मोक्षगमैकचेतनधरास्तीर्थङ्करा ऽऽदेशतो,
यत्रैत्या ऽव्ययधाम साधितवमास्तीर्थं तकत् सिद्धिकृत् ॥ २ ॥

भवे प्रान्ते या स्यादवनिसरणी धर्मनियता,
मतिः सा मुक्त्यै चेन्ननु भवति तीर्थावनभवा ।
तदित्थं मत्वा किं शिवगतिगमेच्छु (च्छु) मुनिजनः,
सदा तीर्थं स्थास्नु प्रतिनियतमक्त्या स्मरति न ? ॥ ३ ॥

युगादिनेता जगदीशवर्यः, श्रीपुण्डरीकाय गणाधिपाय ।
कैवल्यमुक्त्योर्वरणं प्रभावात्, सिद्धाचलस्येत्य रुरोध तत्र ॥४॥

सपञ्चकोटीमुनिसंयुतस्य, कैवल्यमुक्तो गिरिराट्प्रभावात् ।
निशम्य मुख्यस्य गणेशितुः किं, भव्यो गिरीन्द्रममुमर्चयेन्न ? ॥

प्रभूता सङ्ख्येयं न भवति च यत्तत्कुलभवा,
अतीताः सङ्ख्यां यन् न च बहुतमा धर्ममतयः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

तथैवाश्रितस्यवाः प्रवरगिरिराजं शिवकृते,
तवत्स्ते सर्वेऽत्र प्रवरगिरिराजस्य गदिताः ॥ ६ ॥

यथा विदेहाः सततं जिनानां, स्थानं स्वकीयाच्च्यवनप्रभावात् ।
तथैव सिद्धाद्रिरमुं न पश्ये-द्भव्यजावः स्वकुहीनभावात् ॥७॥

नात्राऽऽप कोऽपि जिननाथ उदात्ततेजा,
मोक्षं तदत्र परिभावयतु प्रधानम् ।
वीर्यं न यत् स परसत्त्वबलाल्लभेत,
साध्यं यतो जिनवराः स्वबलेन गुप्ताः ॥ ८ ॥

निरीक्ष्यापगायाः परं तीरमाप्तं, भुजाभ्यां नरस्तारकं नैव जह्यात् ।
नावं तु यत्नाबलिजातशाभां, कश्चोबः स्वयं या न सरोऽपि यायात्

श्रीनेमिनाऽपि गिरिरैवतमात्मनीना,
मुक्ताः शिवाय मुनयोऽपि परःसहस्राः ।
तत्तीर्थराजमहिमानमपारमाप्ताः,
श्रद्धाय तीर्थमनिशं मनसा स्मरन्ति ॥ १० ॥

श्रीवीरनाथेन शिवाय नैके-ऽनगाररूपाः प्रहिता गिरीन्द्रान् ।
वैभारमुख्यान् शिवमापुरेते, गिरीन्द्रमाहात्म्यमनूनमाप्य ॥११॥

मुनीनां शिवायास्ति नैकं सुधाम, मतं त्रिज्ञवर्यैस्ततः सत्कृद्भिः
शितीका मुनेर्मोक्षहेतुप्रधाना, ततः स्थावरं तीर्थमाम्नायते ह्रीः ॥

वरं दर्शनं श्राद्धवर्यो लभेत, यदीक्षेत तीर्थाधिपानां सुधाम ।
सुजन्मानगारत्व कैवल्यमोक्षा-ननन्तान् क्रमां या भविना शिवाय ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

द्रव्यं क्षेत्रं च कालं विविधमनुसरन् जन्तुराप्नोति बोधिं,
विश्वा जैनीयमेतन्मतमतनुधियस्तेषु रक्ताः सदैव ।
द्रव्याद्येषु प्रकृष्टेष्वखिलजनहितेष्वादरात्तत्समग्रे-
ष्वाराध्येषु तेषु प्रगुणविधये सावधानाः सदाऽऽप्ताः ॥१४
एवं च तीर्थान्यधुनापि सम्यक्, सम्यग्दृशां बोधिकराणि मत्वा ।
सङ्कीर्तनं तीर्थभुवां करिष्ये, श्रुत्वेदमायान्तु विदः प्रमोदम् ॥१५॥
संसारेऽत्र तनूः श्रिता जिनवरैः प्रोक्ता द्विधा प्राणिनो,
दूरे ते शिवधामसङ्गतिविधौ ये सन्त्यभव्याः पुनः ।
ते गन्तार उदारमोक्षपदवीं ये संश्रिता भव्यतां,
तेषामेव परं सुखाय जिनराट्तीर्थानि धर्माहृतेः ॥१६॥
भव्या मोक्षपदं प्रयान्ति निजगामाश्रित्य भव्यात्मतां,
यद्यप्यत्र तथापि निर्मलतमा जीवाः परं हेतवः ।
काष्ठेऽग्निर्भवति स्वभावजनितो नान्यं परं वर्जितुं,
तद्वन्मुक्तिमितान् विधाय शरणं भव्या लभन्ते शिवम् १७
मोक्षस्याप्तिरिहोद्भवेद् गुणगणाद् दृश्याः परं नो गुणा,
जीवानां स्वपराश्रिता भगवतस्त्यक्त्वा समस्तार्चितान् ।
गम्या लिङ्गत एव ते मतमिदं जैनं गुणानां मति-
लिङ्गेनेति मता शुभाऽत्र विबुधैर्मुक्त्यै जिनाराधना ॥१८॥
अन्त्यावर्त्तमिता भवन्ति शिवदान् जीवा जिनेन्द्रादिका-
नर्हाः सेवितुमात्मशुद्धहृदया नान्यत्र कश्चित् पुनः ।
स्यादाराधनमव्ययार्थकमलं द्वारा गुणैस्तद्वतां,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सेवाद्यैः शिवसाधनाय विदुषां देवादितत्त्वत्रये ॥ १९ ॥
संसारेऽस्मिन् परममहनं युज्यते सिद्धिगानां,
　　मुक्तास्ते न व्यवहृतिगतास्तत्तदर्चा कथं स्यात् ? ।
चेन्नार्च्यन्ते परमविधिना मुक्तिधामान्यमीषां,
　　तल्लोकानां शिवपदकृते तीर्थपूजादरोऽर्च्यः ॥ २० ॥
पूजा गुणानां गुणिपूजनेन, न चान्यथेत्याहुरुदारभावाः ।
प्रभात एव स्मरणं पुरैव, परमेष्ठिमन्त्रस्य जिनाश्रितानाम् ॥२१॥
पुष्ट्यै गुणानां गुणिनां समादृतिः,
　　पूजा परं स्याद्गुणिनां गुणास्पदम् ।
अतो हि पूजा द्रविणैरपाष्टा, जिनादिषु मुक्तिपथोपदेशकैः ।२२।
मुक्त्वा यतः प्रातरुपासकानां, सामायिकाद्यं गमनं मुनीशान् ।
नन्तुं जिनानर्चयितुं च योग्यं, शास्त्रे मतं श्रेष्ठतया सुधीभिः ॥
पूजां जिनानां सुरनायका व्यधुः, सत्प्रातिहार्यादिभिरादरेण ।
अतो गुणानां विधये कृतार्थाः, कुर्वन्ति सेवां विविधां सुतीर्थे ॥
कर्तव्यमेतत् कथितं सुधीभि-र्विमुच्यमाना सुविधानवश्यम् ।
सेवा हि तीर्थस्य विधीयतां यतः, संसारसेतुः परमो हि तीर्थम् ॥
गुणास्तारका जीवराशेर्भवाब्धेः, परं स्वाश्रयीभूतमेवाङ्गिनं ते ।
सहायीभवन्ति प्रकृष्टानि लोके, सुतीर्थानि सर्वानपि तारयन्ति ॥
अष्टापदे यो नमतो हि मुक्ते-र्हेतुर्मतोऽन्त्येन जिनाधिपेन ।
नैवं गुणिनामपि पूजनं जगौ, कश्चित् क्वचित्तेन सुतीर्थसेवा
　　　　( सुधीव्रजेत्तत् ) ॥ २७ ॥

P.P. Ac. Gunratnasuri M.S.　Jun Gun Aaradhak Trust
Scanned by CamScanner

तीर्थानि तीर्थपतिभिर्विविधानि लोके,
संस्थापितानि विहितान्यनुमोदितानि ।
स्थास्नूनि तेन शिवसिद्धय आप्तवर्याः,
तान्याद्रियन्त शिवमाप्तुमबाधसौख्यम् ॥ २८ ॥

आराधना विधियुता चिरकालगा स्यात्,
तीर्थेषु या स्थिरतमेषु न सा परेषु ।
कालं बहुं स्थितिमयेत् न परं हि तीर्थं,
स्थास्नूरयाति तदसङ्ख्यमनेहसं यत् ॥ २९ ॥

सम्यक्त्वभूषणतया प्रवरं मतं त-
च्छत्रुञ्जयादिवरतीर्थगता हि सेवा ।
यद्दर्शनादि भवतीह शमक्षयोत्थं,
स्थास्नुस्वभावं न परं तु स्थिरं सदैव ॥ ३० ॥

कालान्तरे जनततिर्जगति प्रवीक्ष्य,
तीर्थं ततोऽनुस्मरति तद्गतमाशु धर्मम् ।
आराधका अपि भवन्ति तदेकतानाः,
कालं बहुं निजकभावमनुश्रयन्तः ॥ ३१ ॥

उत्सर्गादिविधिस्ततः श्रुतधरैरुक्तः समाराधने,
स्थास्नूनां वरतीर्थराजसजुषां यत्तीर्थराजां सदा ।
तान्याराध्य परं पदं स्थिरतराण्यापुस्त्वनन्ताः शिवं,
तीर्थानीति विभाव्य सन्ततममून्याराधयन्तूद्यताः ॥३२

यत्तीर्थं कर्मभूमौ भवति शिवपदं तत्र भूयो जनानां,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

मुन्यादीनां विहारस्तदनुगतिपरा ईयुरुत्कृष्टभावाः ।
श्राद्धास्तेनाखिलः स भवति हि विषयो धर्मबुद्ध्या प्रकृष्टे,
ज्ञात्वैवं स्थास्नु तीर्थं प्रतिदिवसमदः सेवनीयं सुदृग्भिः ॥३३॥
मुक्त्वा चिन्तां गृहकनकगतां देशचारित्रवन्तो,
भार्गं प्रान्त्यं निजभवनियतं चेद्व्यतिक्रान्तुमीयुः ।
स्थानं भिन्नं सुकृतपरतया ते हि तीर्थानि मुक्त्वा,
नान्यत्र स्युरनघविधिना स्थातुमीशाः कदाचित् ॥ ३४ ॥
देशे देशे प्रतिनियततया भूमयस्तीर्थराजां,
तत्तत्रत्याः सुकृतरसिकाः शिश्रियुः सज्जनास्ताः ।
भावोल्लासात् परिकरसहितास्तीर्थभूमीः समग्रा,
वन्दन्ते ये श्रवणपथगतास्तेऽर्चनीयाः परेषाम् ॥३५॥
एवं तीर्थानि यानि प्रवरवृषदानाद्रियन्ते प्रकामं,
संयोगे तत्परेषां सुकृतविधिजुषां वन्दनायैव तेषाम् ।
स्मार्याणि स्पष्टमेतज्जिनपतिमततोऽनूनवात्सल्यमेतत्,
श्रुत्वैतत् कः सचेता प्रतिदिवसममून्यर्चयेन्न प्रकामम् ॥३६
त्यक्तसङ्गा जीर्णवस्त्रा गता हिंसाध्वनः सदा-
ऽऽरम्भमुक्ता धर्मसूक्ता नैव लिप्ता गृहाश्रमे ।
ज्ञानमग्ना ध्यानसक्ता रता वाक्ये गुरूदिते,
तेऽपि मुक्त्वा गणं ग्रामं गतास्तीर्थं शिवाप्तये ॥ ३७ ॥
सञ्ज्ञां ये चिरकालिकीमनुदधत्यङ्गं श्रिताः संसृतौ,
ते सङ्कल्पवशानुगाः प्रतिकलं यावद्भवेज्जीवनम् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सङ्कल्पाश्च समीपवस्तुविहितास्तीर्थानि हित्वा न वै,
वस्तुव्रातगताहि साविलयते हीना दशा प्राणिनाम् ३८॥
तीर्थान्येव गतानि कुत्सिततरैरालम्बनैः सर्वथा,
तत्रैवासमसाम्यकुण्डसरणं शान्तात्मनां चिन्तनम् ।
संसारानलतीव्रतापविहतिर्नान्यत्र लभ्या बुधै-
र्हित्वा जैनमतानुगानि निखिलान्येतानि तीर्थान्यरम् ३९।
उपाधिमुक्तं सुसमाधिहेतु-र्धामापरं नैव विमुच्य तीर्थ-
मागत्य शेषे तत आयतार्थी श्रयेत तीर्थं सुसमाधिहेतुम् ४०।
दृष्टौ समायान्ति न तत्र मन्मथा-नुभावुकाः केऽपि विकारभावाः ।
अर्हन्निवासा यतिनां प्रवासा-स्तीर्थेषु सर्वेषु मुदेक्षणीयाः ॥४१॥
नैति श्रुतिं तत्र खोऽङ्गनानां, विकारहेतुः प्रशमामृतार्द्रः ।
ध्वनिर्हि सर्वत्र ततो न चित्तं, स्याद्धर्ममग्नस्य चलं कदाचित् ४२
तीर्थानि हित्वा परमात्मचिन्ता-मग्नत्वमङ्गी यदि गन्तुमिष्टे ।
हित्वा पयो लातुमभीप्सयाभं, घृतस्य तन्नैव सतां हि मान्यम् ४३
आहूय गच्छाधिपतिं समाधि-माधातुमैच्छत्तच्छुचिभावनाभृत् ।
श्रीगौतमं श्राद्धवरस्तथापि, मुग्धः प्रियायां गतवानधस्तात् ॥

स्वात्मा यथा स्यात्परयोगतोऽपरे,
स्थानेऽघलिप्तोऽशुभभावनां श्रितः ।
परेऽपि सम्बन्धिन आप्य योगं,
तथाविधं किं न विदध्युरंहः । ४५ ॥

बिभेषि चेत् कर्मततेः समृद्धि-र्ज्ञानादिभिस्त्वं शिवसाधनोत्कः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

ततोऽन्त्य आराधयितुं सुमार्गं, तार्थानि जैनानि समाश्रय द्राक्॥

तीर्थं यद्यपि दर्शनादिगुणगं कर्मात्तरोधक्षया-
वाश्रित्यामलबोधभावमहितैर्विज्ञैर्मतं तत्त्वतः।
जैनानां मतमुद्यतं श्रुतमतं भिन्नं न यत्कारणात्,
कार्यं तेन मतं जिनेन्द्रगदितं तीर्थं समस्तं श्रुतम् ॥ ४७ ॥

अन्या शाश्वततिर्भवेन् न नियता शब्दोद्भवा यत्परै-
रर्काग्निभ्य उदीरिता श्रुतिततिर्जाता मरुद्भ्यः पुनः।
जैनेन्द्रं तु भवोत्तरैक्रतुमुलं शास्त्रं खादुत्थितं,
तत्तीर्थं गणधारिणः श्रुततेः कर्त्तार आप्तैर्मता ॥ ४८ ॥

मता यथा श्रीजिनराजराजिभिः,
समा गणेशा वरतीर्थरूपिणः।
तथैव सद्दर्शनमुख्यमोक्षा-
ध्वलम्भतस्तार्थधराऽपि तीर्थम् ॥ ४९ ॥

इत्येवं सुधियां सुतीर्थगमनायोक्ता सुपद्यैरियं,
येन स्याच्चरमोऽपरो वृषविधिः शेषोऽपि तत्साधनः।
शुद्धा शास्त्रवचोऽभिखंचिततमा पञ्चाशता सत्प्रियै-
र्भव्यानां सततं दधातु हृदयं स्वस्यां परं सिद्धये ॥ ५० ॥

[ पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता
तीर्थ-पञ्चाशिका समाप्ता ]

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# सिद्ध-षट्त्रिंशिका ।

ज्ञानानि सर्वाणि ह्यनावृतानि, जीवस्वरूपाणि सदा दधासि ।
परं न लेख्यं प्रतियान्ति कोटी-श्चरालये रारिगणा यथाऽत्र ॥
चिन्तामणिं धारयति स्वचित्ते, परं भवेद्धै श्रमणाम उच्चैः ।
तथैव कैवल्यमनुत्तमं दधत्, सदैव चित्सौख्यपरोऽसि मान्यः ॥
अक्षणोर्युगं यद्वदधिष्ठितं स्यान्नान्योऽन्यघाति न सहायकर्तृ ।
युगं तथा केवलमाश्रितो विभुः, प्रतिक्षणं किन्न बुधेश्वराच्यः ॥
यथाङ्कविज्ञो गुणयुक्तभागे, क्रमाश्रितः स्याज्जिन ! तद्वदेव ।
न चेन्द्रियार्थानुभवं ऽपक्षो, विदन्नशेषं गुणवस्तुजालम् । ४ ।
शक्तस्य यूनो गमने यथेह, नापेक्षणीयो घनयष्टिभारः ।
यथाऽस्थसौख्यै निजरूपजाते, प्राप्ते प्रभो ! ते शुभकर्मसौख्यम् ॥
यथेह विद्वन्नयने चिदब्धौ, लीने सुखानां ततिमाश्रयेते ।
तत्केवलाप्त्या सुकृतस्य ते विभो !
मग्नः सदात्मा निजभानसौख्ये ॥ ६ ॥
नित्यो विभो ! ते सुखदुःखवेद्य-कर्माणुनाशोऽस्ति परं समर्थः
निर्णिक्त.सं.ख्यैकरसो यतो न, यूनो ह्यपेक्षा शिशुगन्त्रीप्राप्त्यै ॥
कालोऽयं किल वस्तुजातनिचयं नित्यं स्वभावैः परा,-
पूर्वयोगवियोगरसिकैर्युक्ते वियुक्तेऽपि च ।
सोऽयं चिन्मयतां परामविचलामाप्तामनूनां त्वया,
दृष्ट्वा किं विललाप नाखिलखलध्यानः परं ते यशः ॥ ८ ॥

P.P. Ac. Gunratnasuri M.S.        Jun Gun Aaradhak Trust
Scanned by CamScanner

अभूतामनाल्यामनन्तामबाधी-मनात्यमिवर्ध्या महानन्दसेतुम्।
वरिष्ठां समृद्धिं प्रभो ! ते समाप्य,
हि कालो विभो ! त्वामुदिताऽन्तकाख्यम् ॥ ९ ॥

प्रतीतिस्तत्त्वार्थे जिनप ! विधिना यात्वविचला,
सका ते सम्यक्त्वं यदि खलु भवेत्सा त्वदुदिता ।
त्वकं तामत्येत्य स्वरूपमविचलं नित्यमगम-
स्तथापि त्वय्येतत् क्षयभवमपीश स्तुतिपदम् ॥ १० ॥

जीवादितत्त्वेषु दधार रागं, योऽसौ भवेन्नूनमनन्तमाथी ।
त्वं वीतरागोऽसि कथं ह्यमुष्य,
माथी विचित्रो हि भवत्स्वभावः ॥ ११ ॥

भवेत्तु देशादवबुन्दमात्राद्विरक्तिराप्ताश्रितजैनमार्गे ।
त्वं सर्वदा मुक्तविरक्तिभावः, कथं व्यतीतोऽसि तकच्चतुष्कम् ॥
आप्राणान्तं व्युपरतिरघात् सर्वभेदाद् वधादेः,
चारित्रे च त्रिविधत्रिविधं पापबन्धोऽन्यथा तु ।
चारित्रं तद्व्यतीत्याभवपदमगमश्चित्रमेतत्परं य-
श्चाघस्याऽल्पोऽपि भावो जिन !
खलु महतां चिन्तनीयं न वृत्तम् । १३ ॥
व्यतीत्य सर्वं कलुषं कषायं, स्यादाप्तभावो निखिलो जगत्याम् ।
जगत्कषायव्रजसिद्धबोधं, कथं विभो ! त्वामकषायमाहुः ।१४।

व्यतीत्य चत्वार्यपि जीवितानि,
न कोऽपि जीवद्व्यपदेशभाक् स्यात् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अर्जावितस्त्वं तु परं समस्तां,
यर्जावितादां खलु भावभूतेः ॥ १५ ॥

जिन ! त्वदुक्तीरवमन्यमानः,
स वानकी वाऽथ पिशाचकी वा ।
सामर्थ्ययोगाद् भवतैव मुक्ता-
स्तथापि पूज्योऽसि जगत्यधीशः ॥ १६ ॥

नामापि नाम्नो भवतीह लोके,
सुकर्मणः सत्कृतिशालिपंसाम् ।
प्रतीत्य तच्छाश्वतसिद्धनामा,
भवाँस्तवोक्तिः कथमाप्तगम्या ॥ १७ ॥

जिन ! त्वदाज्ञां शिरसोद्वहन्नपि,
न मोक्तुमिच्छामि तनूमिमां खलु ।
यतोऽनया सा प्रभवश्च मुक्ते-
रस्या अयं लाभरसः खलस्तु ॥ १८ ॥

जिनेशमार्गोऽयममूढशस्त्वयो-दितो यदस्मात् शिवशर्म लात्वा ।
नामापि न ग्राह्यमतो निकृष्टा, भवेत् कृतघ्नात्मदशा कथं न ॥
विग्रहं प्रशमयन्ति पण्डिताः, स्वान्यशान्तिशमितान्तरारयः ।
त्वं सदा शमयसि प्रत्रोषयन्, स्वान्यविग्रहविनाशपेशलम् ॥
सभाप्रबन्धेन निवेदितं त्वया,
न सारयुक्तास्तनवो नराणाम् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

त्वद्ध्यानमोक्षप्रभवो ह्यमुस्माद्,
दृष्ट्वा कथं तन्महनीयतास्पदम् ॥ २१ ॥

न कर्म सल्लाभ इहाद्रियेत, न चेदमुष्मात् तव चिन्तनादिकम् ।
विराध्य वाक्यं त्वदुपज्ञमग्र्ये, तल्लिप्सुरेवेह जनः कृतज्ञः ॥

लोकेऽपि पूज्यो भविता स एव, यः शुद्धगोत्रं स सुवृत्तमाप्तः ।
गोत्रेण वृत्तेन च हीनरूपो, कथं नु देवेन्द्रमुनीन्द्रपूज्यः ॥

आप्तोऽन्वयं दानगुणं निहत्य, तदन्तरायं जगतामधीशः ।
हित्वा च तं त्वं शिवमाश्रितोऽर्हन्न दानभावो नु शिवप्रदायी ॥

लाभा लभ्यनरभवगता अन्तरायाद्विमुक्तेः,
सिद्धं बाधान्यपगमयुतं नह्यसिद्धं कदाचित् ।
मुक्तस्त्वं सर्वथाऽसि प्रसभमतिवृतेर्नैव लाभश्च तेऽणु,
चित्रं ते सच्चरित्रं जगति नु मनुते कः सचेता मुनीन्द्र ! ॥२५॥

अभूदपूर्वं तव वीर्यमर्हन्, यदा भवस्थो जनताविमोही ।
वीर्यान्तरायक्षयभृज्जिनः सन्, हहाऽसमर्थस्तृणकुब्जतायै ॥२६॥

भगवन् क्षायिकं ज्ञानं, दर्शनं चापि शाश्वतम् ।
धारयन्नात्मसौख्याब्धौ, मग्नोऽनन्तबलः प्रभुः ॥ २७ ॥

न योगा न कषायास्ते, संवरस्ते निरर्थकः ।
न च कर्माणुसङ्गस्ते, निर्जरा किंफलं सृजेत् ॥ २८ ॥

कृतार्थः सर्वथा देव ! न शिष्टं तव साधनम् ।
वीर्येऽनन्तेऽपि किं ते स्यात् प्रवृत्तिः कर्मसङ्गदा ॥२९

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

यथार्था नाथ ! ते सिद्धिः, श्रेणिभ्शां घात्यघातिनाम् ।
नाशं विधाय यत् प्राप्ता-ऽनादिर्नो न च कल्पिता ॥
इहानन्ताच्युतं बोधं, लब्ध्वा स्वामिन् ! गतः शिवम् ।
अपुनर्भवभावत्वात् सत्यं पारङ्गतः प्रभुः ॥ ३१ ॥
अनन्तैर्या पुराश्लिष्टा, सिद्धैस्तां श्रितवान् भवान् ।
गुणानां श्रेणिमत्युग्रां, परम्परागतस्ततः ॥ ३२ ॥
वस्तुसत्त्वान्मतिमुग्धा, येषां नैरात्म्यमाश्रिताः ।
ते नो विदन्ति यन्मोहोऽभिष्वङ्गादसतोऽपि च ॥ ३३ ॥
मत्या स्मृत्याश्च वैचित्र्यं, विदन्नात्मनि पण्डितः ।
जीवं ज्ञानमयं ज्ञात्वा, त्वां सिद्धं चिन्मयं महेत् ॥३४॥
जीवस्य सुखरूपत्वं, बुध्यन् बुद्धं शिवं मतम् ।
सुखरूपं प्रपेदानः, सदाऽऽनन्दं स विन्दति ॥ ३५ ॥
सर्वैरास्तिकसत्तमैरभिमता सिद्धिः परा वै प्रभो !,
किन्त्वन्यान्यगुणापलापकलिता शोच्या सतां या सदा ।
किन्त्वर्हं भवदीरिता गुणगणश्रेण्या च या संयुता,
स्तुत्या मे जिनराजशासनमहिमोद्गीता सदानन्ददा ॥ ३६ ॥

[ पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता
सिद्ध-षट्त्रिंशिका समाप्ता ]

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# श्री सिद्धगिरि-पञ्चविंशतिका ।

तीर्थेषु प्रथमं चकार जिनपः श्रीमान् युगादिप्रभु—
र्यत् सर्व.र्य गणधारिणांशिवपदं युक्तं स्वसाधूत्तमैः ।
प्राप्यामितमापिवान् भुवि परं माहात्म्यमुग्रं तकद्,
भव्याः साध्यविशुद्धये सुमनसा नित्यं भजन्तां मुदा ॥ १ ॥

श्रीपुण्डरीकाचल एष आदौ, श्रीपुण्डरीकाय गणाधिपाय ।
युताय साधूत्तमकोटिसङ्ख्यैः, प्रभावतः स्वस्य शिवं ददौ प्राक्

जिनोऽप्यनेकानि समायया प्राक्, पूर्वाणि भव्याब्जविबोधनाय।
युगादिनेता तद्दः समर्च्य, भव्यैः सुतं.र्थं विमलाचलाख्यम् ॥

न कोऽपि देशो नरलोकमध्ये-ऽनन्ता न यत्रागुरबाधधाम ।
जीवाः परं क्षेत्रशुभप्रभावात्, सम्प्राप्य रत्नत्रितयं शिवेऽगुः ॥

सङ्ख्यातीतान्यत्र चैत्यानि चक्रु-
भव्या मुक्त्यै नैव सङ्ख्यां विधातुम् ।
शक्यं यस्त्रैर्मानवैनैष सानु-स्तद्भव्यानां सर्वदाऽऽराधनीयः ॥

वैराग्यरङ्गपरमात्महितं विधित्सु-
जैनो जगत्यपरसर्वमतान्यसाध्यः ।
एकान्तमाश्रयति सैव ततो ह्यमुष्य,
तीर्थानि सानुशिखरेषु विशेषतोऽपि ॥ ६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

दृश्यन्तेऽचलमूर्धसु प्रतिगिरि देशेऽत्र तीर्थान्यरं,
श्रीशत्रुञ्जयमुख्यधामसदृशान्यन्यान्यलोकातिगम् ।
शान्तत्वं हि मतं शिवाप्तिसुभगं जैनेन लोकातिगं,
तीर्थान्यस्य ततोऽचले वनतले वैराग्यरङ्गादृतौ ॥७॥

परे परेशा विविधान्यवात्सुः स्थानानि वृन्दावनमुख्यकानि ।
कामादिदीप्त्यै न च तीर्थराजां, वैराग्यरङ्गादरणात्तथाऽभूत् ॥

विहाय राज्यं सकलां समृद्धिं, स्निग्धं कुटुम्बं च समस्तमोज्झन् ।
तीर्थेश्वरास्तद्विजने गिरौ वा-ऽवात्सुर्न यन्मोक्षपथोऽन्यथा स्यात् ।
यथैव वैराग्यनिधिर्जिनेशो, मोक्षैकसाध्यः स्थितिमान् प्रशान्त्या
तथाऽपवर्गस्य नगादिवासं, प्राप्त्यै स शिश्राय न परस्तु कोपि ॥

अतो हि लीलारहितं शमाढ्यं, स्थानं मतं ध्यानवरोपयोगि ।
जैनेऽनगारा अपि तेन जग्मु-र्मोक्षाय तीर्थानि गिरौ स्थितानि ॥
स्वभावभूतान् प्रतिपादयन् जने, जीवादिसार्थान् प्रवरो हि धर्मः ।
भवेदयं सर्वयुगेषु सिद्ध-स्तीर्थानि तस्यैव पदानि शान्त्यै ॥

एवं च जीवाश्चिरकालजाता, अत्राऽऽगता आत्मविमोचनाय ।
ततः पदं शाश्वतमेतदन्ता-तीतासवश्चाऽऽपुरबाधधाम ॥ १३ ॥

न चास्ति देशोऽपर उत्तमोऽमू-दृशः समग्रेऽपि च लोकभागे ।
क्षेत्रानुभावं त्वमुमाश्रिता अमु-र्जीवा अनन्ताः परमं शिवालयम् ॥
सङ्घोपि जैनो निखिलोऽव्ययार्थी, कालादनादेरिह तत्साध्यमाप
सदा प्रसिद्धं शिवधाम तीर्थं, भजन्ति चैनं विविधं च लोकाः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

माहात्म्यमुद्गातुमतो ह्यमुष्य, यत्नः कृतः श्रीगणधारिमुख्यैः ।
कल्पोऽपि वज्रेण धुरन्धरेण, माहात्म्यदम्भोऽपि धनेश्वरेण ॥

मानं नो नियतं सदा गिरिवरस्यास्तीति तेनोच्यते,
नित्येष्वद्रिगणेषु नो श्रुतधरैः शास्त्रे परं सर्वदा ।
स्थास्नुत्वान्नियमेन कथ्यत इह प्रायेण वै शाश्वत-
स्तस्मात् सर्वमनेहसं गिरिरयं संसारपोतायते ॥ १७ ॥

भविष्यन्त्यां तीर्थाधिपतय इहानेक उदितं,
लभिष्यन्ते मोक्षं परमपदमिता भाविन इह ।
मुनीनां सन्ताना असममहिमानं गिरिवरं,
तदेष स्तुत्यः किं भविकनिचयस्यास्ति न परम् ॥ १८ ॥

विदेहेषु सर्वज्ञसिंहो जगाद पुरः शक्रसिंहस्य वर्य-प्रभावम् ।
श्रुत्वा च तत् सागतोऽत्र व्यधाद् यत् सदुद्धारमेतस्य सिद्धप्रकामम्

माहात्म्यमेतस्य निपीय चक्री, चकार चैत्यंप्रथमं जिनोक्तेः ।
ततः परं सर्वमनेहसं तु, परापरैः पूज्यपदं समेतः ॥ २० ॥

विमलवाहनभूप इहान्तिमोऽरकनृपेषु करिष्यति सद्धिया ।
भविकतारकतीर्थपतेः परां, हृदि प्रधार्य समुद्धृतिमन्तिमाम् ।२१

गिरेरस्योद्धाराः सुरनृपनरैर्येऽत्र विहिता,
न शक्याः सङ्ख्यातुं मतिमनतिशयां ये दधुरिह ।
असङ्ख्यो यत्कालो गणपतिवरस्याव्ययपदा-
द्गतस्ते चाभूवन् लघुलघुतरात्कालविगमात् ॥ २२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

विधाय षष्ठं तप आर्हतानां, चतसृणां त्यागपरो मनुष्यः ।
करोति यात्रास्तृतीये भवे सोऽवश्यं गमी मोक्षपदं तु सप्त ॥
नाभाविभद्रः स्वपनेपि पश्येत् शुभं तथा नैव नरो ह्यभव्यः ।
शत्रुञ्जयं पश्यति दृष्टिमात्रात् तीर्थं महत्तद्भविकाः श्रयन्तु ।२४।
समेषां जगत्युत्कटानां भवाब्धेः परं तीर्थमेतत्सुतीर्थव्रजानाम् ।
अतः प्रत्यहं भव्यजीवाः प्रभाते, भजन्त्येनदत्युत्कभावं भजन्तः ।
गिरिवरं विमलाचलसञ्ज्ञितं प्रथमतीर्थमनुत्तरभावतः ।
भवी भजन सुखसम्पद उत्तमाः शिवरमा अपि शीघ्रतरं श्रयेत् ॥

पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता
श्रीसिद्धगिरि-पञ्चविंशतिका समाप्ता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# श्री गिरनार-चतुर्विंशतिका ।

श्रीउज्जयंतगिरिराजमुदारतीर्थं, भव्याः सदा नमत नम्रसुरासुरेंद्रम्,
श्रीनेमिनाथजिनपादपवित्रितं तद्
यस्माल्लभध्वमचिराच्छिवसम्पदं द्राक् ॥ १ ॥
सामान्यतोपि जिनराजविहारभूमि-
रागाढदर्शनकरी भविनां स्वभावात् ।
यद्दर्शनाद्भवति भव्यततेर्जिनानां,
तीर्थाश्रिता शुभकृतिः सततं प्रशस्या ॥ २ ॥
एकस्यापि भवेज्जिनस्य धरणिः पावित्र्यसम्पद्वती ।
विश्वव्यापिसुखाद्भयाकरपरं कल्याणकं जायते ।
यत्रैकं त्रितयं परं जिनपतेस्तेषामभूदत्र भोः,
श्रीनेमीशितुराप्तसम्मततमं तत्तीर्थमेतद्वरम् । ३ ॥
सैन्यान्मोहमहीपतेः पुरवरादिस्थानसंस्थाद्भयं
शृङ्गारादिरसाञ्चिताद्वरतरस्त्र्याराममुख्यैर्वृतात् ।
बिभ्राणाः शिवसम्पदे शुचितरं धामाजनं प्राप्नुयु-
स्तस्यावश्यमुदित्वरं फलमिहोद्द्रष्टुं गतोऽमुं जिनः ॥ ४ ॥
यद्वा तां नृपबालिकां नवभवसम्बन्धबन्धोद्धुरां,
छित्वा सर्वकुटुम्बरागनिगडान् मोहादिजानान्तरान् ।
पाशान् संयममाश्रयितुममलं स्थानं गिरीन्द्रोपगं,
द्राग गन्तुमुपादिशन् जिनपतिरेत्याग्रहीत् संयमम् ॥ ५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

वैराग्यरङ्गभरपोषणतत्परं तं, ज्ञात्वा नगं जिनवरं सुखमाश्रयन्तम्
मोहो हतां निजचमूमपशस्त्रवीर्यां दृष्ट्वात्र नाशमगमद्धतवीर्यवृन्द
नष्टे वरिष्ठशुभसंयमघातदक्षे मोहे गतास्तदनुगाः प्रलयं प्रकामम्।

ज्ञानावृतिप्रमुख उद्धृत उत्कटारौ,
किं केवलादिगुणराजिरिहार्हतो न ॥ ७ ॥

राजिमतिर्वरतरं गिरिराजसंस्थाऽऽ-
पत्केवलं विनिहतामतिदुष्प्रपञ्चम् ।

निर्विघ्नमेतदिह मोहलयाज्जिनेशाद्
भीतस्य कर्मनृपतेर्न बलं ससार ॥ ८ ॥

सामान्यतो जिनराजमनुश्रितोऽङ्गी,
कैवल्यमाप्नुत इहोत्तमसङ्गसाध्यम् ।

राजी तु तन्मयहृदा मदनं जघान,
किं तल्लभेत नहि तत्प्रभवप्रभावात् ॥ ९ ॥

या नेमिनाथ उदितं गतरागभावं,
चित्तं सदा धृतवती न परं जिघृक्षुः ।

सा देवरं गतनयं पथमानिनाय,
तत् किं न केवलमसौ वृणुतेऽर्हदुक्का ॥ १० ॥

मन्ये मोचयितुं प्रियां भवगतां दुर्गं समादेशितुं,
मोहाद्यैस्तु सुदुर्गमं प्रतिगतो दुर्गं जिनेन्द्रः प्रभुः ।

अस्या भावमनुश्रितं पतिमनु ज्ञात्वा सतीत्वोचितं,
पत्नीं किं शीलधारिणीमपि पतिः कष्टान्न रक्षेद्यतः ॥ ११ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

कल्याणकानां त्रितयं जिनस्य, श्रीनेमिनोऽत्राभवदुग्रभावम्,
कैवल्यमुक्तिप्रसिताऽत्र दीक्षा, जाताऽत्र तत्तीर्थमिदं श्रयध्वम् ॥
दिगम्बरैस्तीर्थमिदं पवित्रं, जगत्यसाधारणसत्प्रभावम् ।
उद्दालयित्वा सितचीवरेभ्यो, ह्यनेकशोऽपीष्टमभूद् वृथा पुनः ॥
गाथाऽत्र प्रथमं पराभवपदं ह्युज्जिन्तसेलादिका,
या सिद्धस्तवसंश्रिता सुरकृता श्रीआमराजात् परम् ।
ऐन्द्र्या स्वर्णघटीभिरुद्यततरं नीतं तृतीयं स्फुटं,
श्रीमत्पेथडदे कृतं भुवि परं नग्नाटवृन्दस्य ही ॥ १४ ॥
पुनः पुनर्जातपराभवा अपि, न तीर्थलुण्टाकदशां त्यजन्ति ।
चौरा यथा नैकश आप्तशिक्षा, न चौर्यमुज्झन्ति तथास्वभावात् ॥
ग्रन्थाः श्वेताम्बराणां महिमभरयुता मूर्त्तयो ग्रन्थकारा-
स्तीर्थानि प्राज्यतेजोधरविदिततमान्याप्त पूर्वाणि कीर्त्तिम् ।
लात्वा तान् स्फातिमिच्छुर्न भवति जगति स्पष्टचौरो हि नग्नः ॥
चौरः समेतो गृहिणां गृहेषु, यथा न सौख्याय यतो जिहीर्षुः
तथा कथञ्चिज्जिनमन्दिरादिकं, जातु प्रविष्टो न हिताय नग्नः ॥

रक्षोद्यतेषु सकलेषु सिताम्बरेषु,
ग्रन्थादिकस्य तदपि प्रचुरान् प्रपञ्चान् ।
आचर्य मोषितुमनाः सततं प्रवृत्तो,
नग्नाट एष तदितो न शुभं समेतात् ॥ १८ ॥

अत्रास्ति देवमहिता परमातिशस्यै-
र्युक्ता सदा सुरकृतैर्विविधातिशेषैः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

मूर्त्तिः प्रभोः सुरपतिः परितुष्टचेता,
रत्नाख्य सत्कृतिवराय यकां पुराऽदात् ॥ १९ ॥
तन्मन्दिरं वरतरं धृतजीर्णभावं,
योग्यं समुद्धृतिकृते प्रविधार्य सुज्ञः ।
श्रीसज्जनो दलपतिस्तूदधारयत्तत् ।
सौराष्ट्रसम्भवमशेषधनं व्ययित्वा ॥ २० ॥
दृष्ट्वा समुद्धृतमिदं वरपत्तनेशः,
श्रीसिद्धराज उदितात्मसुकृत्यभावः ।
आत्मीचकार सुजनावलिसत्कृताङ्गः,
सञ्ज्ञाऽत्र राजभुवनेति निवेशिता च ॥ २१ ॥
श्रीवस्तुपालसचिवो निजसोदरेण,
सम्यग् विचार्य वरचैत्यमिहाध्युवास ।
कोटी शतानि द्रविणानि मुदा व्ययित्वा ॥ २२ ॥
श्रीमालवीयवरमण्डपदुर्गवासी,
सौवर्णिकोपि गिरिराजवरप्रभावात् ।
सङ्ग्राम इत्यभिधया विदितो ह्यमात्य,
श्चैत्यं समेत्य वरभावमिहातनिष्ट ॥ २३ ॥
इत्येवं विविधैः प्रभावनिवयैर्जुष्टो गिरीरैवतो,
भव्यैर्निर्वृतिमाप्तुकामसहितैराराधनीयोऽन्वहम् ।
ते धन्या गिरिमेनमात्मशुचये शत्रुञ्जयाद्रेरिव,
ध्यानं पूजनमग्र्यभावसहिता नित्यं मुदा तन्वते ॥ २४ ॥

आ.श्री. श्रीआनन्दसागरसूरिकृता श्रीगिरनार-चतुर्विंशतिका समाप्ता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# आगममन्दिर-षट्त्रिंशिका ।

श्रीमान् रैवतकः प्रसिद्धमहिमा कल्याणकैर्यस्त्रिभि-
र्दीक्षाकेवलनिर्वृतिप्रदतया श्रीनेमिनाथे जिने ।
नातोऽत्यन्तपवित्रताधर उपादत्तो मुनीनां गणै-
र्यत्प्राप्ताःशिवशर्म नैकमुनयः प्राप्य प्रभावं गिरेः ॥ १ ॥

दिगम्बराः सर्वविरुद्धवादिनस्त्यक्त्वांऽशुकान्यूषुररण्यवासम् ।
तेषां न तीर्थेन युजांऽशतोपि, ततो न तीर्थं तदधिष्ठितं भुवि ॥

तीर्थेश्वराणां जननादिभूम्यः, श्वेताम्बराणामखिला अधीनाः ।
अच्छिन्नतीर्थत्वमनूनमाधु-स्त एव तेनाखिलतीर्थवन्तः ॥ ३ ॥

सवस्त्रमार्गाद्विभिदामगुस्ते, दिगम्बरास्तेन पुरा जनानाम् ।
वस्त्रस्य शून्यत्वमपालपन्तो, दिशाम्बरत्वं जगदुः स्वकायम् ॥

सिताम्बराणां चरमार्हतत्वान्न पञ्चवर्णानि यदम्बराणि ।
सिताम्बराणां धरणात्पृथक्ता, श्रीवीरतीर्थे प्रभुपार्श्वतीर्थात् ॥

सिद्धाचलोऽयं सततं वशे तत्, सिताम्बराणां नहि तत्र चित्रम्
यच्चात्र नग्नाटमतीयचैत्यं, नूत्नोद्भवं तत् कृपया परेषाम् ॥६॥

अत्राधिपत्यं सकलं वितेनुः, सिताम्बरा लोकनृपालयादौ ।
तन्वन्ति कालेपि च वर्त्तमाने, नांशेन नग्नाट इहास्ति नेता॥७॥

यान्यस्य तीर्थानि समीपवर्तीन्येषां प्रभुत्वं सिततिचयानाम् ।
हस्तात्कदम्बाद्व गिरौ ध्वजान्ते ताले च नग्नाटगमोपि नैव ॥८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सिताम्बरेषु प्रथितं तु नाम, गिरेः पवित्रं जगति प्रसिद्धम् ।
श्रीसिद्धयुक्तं नियतनमस्यं, चेत्रं परेषां न मतं विचित्रम्(भिन्नम्)
अत्रैत्य लोका व्यधुरादिनाथा-नुकारबुद्ध्याङ्घ्रियुगप्रमाणाः ।
यात्राः परोलक्षमिता हि वर्षे, प्रत्येकमीयुः सितचीवराङ्काः ॥१०॥
समीक्ष्यास्य तीर्थस्य रूढां प्रतिष्ठां
समेभ्यः पुनर्दिग्विभागेभ्य आप्तान् ।
जना यात्रिकानत्र सच्चैत्यवृन्दं,
सदा नूत्ननूत्नं व्यधुः स्वात्मसिद्ध्यै ॥ ११ ॥
प्रत्यब्दमायातिमवेक्ष्य यात्रा-कृते जनानां क्रमवृद्धिमाप्तां ।
जगत्यशेषे जनवृन्दमाह तीर्थं परं जैनमतेऽद्र एव ॥ १२ ॥
सदातनं वीक्ष्य गिरेः प्रभावं, परोऽयुतानां गमनं जनानाम् ।
शास्त्रोदितं शाश्वतभावमस्य, सनातनं कार्यमिहाद्रियन्ते ॥१३॥
विचार्य सर्वैर्विबुधैः सुनीत्या, गीतार्थवृन्दं जिनवाङ्मयानां ।
स्थास्नु प्रमाणं च विधित्सु धाम समैकमत्येन चकार वर्यम् ॥
कालस्य दौरात्म्यमभिश्रयन्तः, सदागमाभ्यासपरेषु सत्स्वपि ।
सर्वत्र पाठं जिनवाङ्मयानां पृथक् पठन्तो बभुरत्र नैव ॥१५॥
पुरा समीक्ष्येदमुदात्तधैर्या जिनागमान् पुस्तकगान् विदध्युः ।
देवर्धिपादाः परतस्ततस्तन्मानं वचः पुस्तगतं न चान्यत् ।१६।
तत्रापि कालस्य दुरात्मताऽस्मात् नीचा जनाः स्वार्थपरायणा यत्
पाठांश्च दम्भांश्च नवान् विधाय, न्यवेशयंस्तत्र सुदीर्घपापाः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

ततः स्थिरत्वाय जिनागमानां, पाठस्य दम्भस्य च सौष्ठवाय ।
समीक्षमाणा रुचिरं तु मार्गं, जैना व्यधुरागममन्दिरं त्विह ॥
मर्मराणि-खानिप्रभवा विशालाः
शिलाः समाहृत्य जिनागमालिम् ।
उत्कीर्य तासु प्रविधापयते चेत्ताभिश्च भित्तिर्जिनमन्दिरस्य ॥
ततो ह्यतीतेषु युगेषु न स्यात्, पाठस्य दम्भस्य कणेन भेदः ।
न व्यत्ययोपि स्थिरताजुषोऽस्यास्तत्प्रस्तरैरेव सुचैत्यमाधुः ॥
सदैकरूप्याय जिनागमानां, भेदाच्च पाठस्य सदावनाय ।
न्यस्ता शिलासु प्रभुशास्त्रसंहतिः साधिष्ठितिश्चेन्महनं जने स्यात्
समीक्ष्य चेदं त्विह रेऽत्र चैत्यं, जिनागमानां जिनबिम्बयुक्तम् ।
यतोऽर्चनाढ्यं जिनवाङ्मयाना-
माराधनं स्यात् प्रभुसन्निधानात् ॥ २२ ॥ युग्मम् ॥
शश्वद्धवत्वं जिनवाङ्मयाना-मवेक्ष्य सङ्घेन जिनेश्वराणाम् ।
न्यस्तानि बिम्बानि सनातनानि,
मुख्येऽत्र चैत्ये ऋषभादिकानि (नां) ॥ २३ ॥
सन्त्यर्हतां लोकगतानि चैत्यान्यनाहतान्येव परं द्युलोके ।
शतं त्वशीत्या जिनबिम्बमानं, सर्वत्र तेनात्र तदेव मानम् ।२४।
समानतायै जिनवाङ्मयानां, लघूनि चैत्यान्यभितः कृतानि ।
समुद्रयुग्मप्रमितानि तत्र चतुष्कमस्थापि जिनेश्वराणाम् ।२५।
चतुर्मुखीभूय जिनेश्वरा यद्-द्दुर्गणिभ्यो जिनशास्त्रवाणीम् ।
तस्माद्धि सर्वत्र जिनेशमूर्तीश्चतुर्मुखाः सङ्घ इहापि चक्रे ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

जिनेन्द्रा दधानाः समस्ता हि मुद्रां,
समां योगसञ्ज्ञां जगुः सत्कृतान्तान् ।
परं जैनमुद्राद्वयं पूज्यते यत् कृतं तु पर्यङ्कशयं सुबिम्बम् ।२७।
जिनेशबिम्बानि चतुर्मुखानि, विधातुमत्राकृत सङ्घमुख्यः ।
सद्देशनाभूसदृशानि मोदात्, स्थानानि सुसङ्घसुखाकराणि ॥
जिनेश्वराणां जननोत्सवा यत्, सुरेशवृन्देन सुमेरुमूर्ध्नि ।
सदा विधीयन्त इतीह पञ्च सुमेरवः स्थानवरं विनाताः ।२९।
चतुर्दिशं यद् गुरुमन्दिरेषु, मूले च चैत्ये विहितो निवेशः ।
सुमेरुरूपेषु जिनेश्वराणां, सदासनेष्वेतदचिन्त्यभावम् ॥३०॥
स्थितः पुरेऽत्रैति गिरेरधित्यकां वर्षासु षट्कायविराधनाच ।
चैत्यं ततोऽदः कृतवान् सदार्चापदं हि सङ्घःसदुपात्यकोर्व्याम् ॥
देशे समग्रेऽप्यधुना हि दुश्शको व्ययो जिनेन्द्रालयमत्र उग्रः ।
विचिन्त्य भावि प्रचुरा हि द्रम्माश्चैत्यस्य निर्वाहकृते प्रदत्ताः ॥
निर्वाहहेतून्निखिलांश्चकार, जलाशयादीन् प्रचुरार्थदानात् ।
भूमिर्विशाला च वितीर्य वित्तं, राष्ट्राद्गृहीता भयमुक्तिहेतोः ।
व्रातेन सर्वो व्यवहार आत्तश्चैत्यस्य सच्छ्रावकमङ्गतेन ।
न कश्चिदत्रास्ति प्रभुः स्वयं यो,
भविष्यति स्यात् सुकृतान्तरायः ॥ ३४ ॥
प्रौढां प्रौढिमुपागताश्चिरतनाचार्योद्धृता वाङ्मया,
उत्कीर्णातिशयेन सङ्गततमा श्रेण्याऽऽगमानां युताः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

न्यस्ता मम्मणिखानिसम्भवशिलावृन्दे विशुद्धाक्षरा-
स्तत् सर्वार्थसमेतमागमपदोपाढ्यं श्रिये मन्दिरम् ॥ ३५ ॥

वस्तुव्रात इहाप्यसन्नुपकृताकारात् सदा सुन्दराद्,
देशेभ्यो विविधेभ्यः साधनवरं देशान्तरं प्रापणे ।
शीघ्रं सौख्यकरं लघुव्ययुतं सर्वेषु साधारणं,
लोकेषु प्रथितं ततोऽत्र उदितं चैत्यं श्रुतानामिदम् ॥ ३६ ॥

इत्येवं जिनमन्दिरेण सहितं श्रीआगमानां वरं,
चैत्यं भव्यजनः सदा सुखयतु द्वन्द्वं दृशोर्मोदतः ।
दर्शं दर्शमतिप्रभं भयहरं मोक्षाध्वनिर्वाहकं
सद्धर्मार्थिजनेऽस्य सन्ततमपि प्रोच्यार्हणाद्याः स्तुतौ ॥ ३७ ॥

[ पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता
आगममन्दिर-षट्त्रिंशिका समाप्ता ]

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# श्रीगणधरपट्ट–द्वात्रिंशिका ।

जिनेश्वराः केवलमाप्य सर्वे, समग्रपर्याययुतान् समस्तान् ।
अवैत्सुरर्थान् यदपेक्ष्य लोके, मानाश्रितैवास्ति च मेयसिद्धिः ॥

ज्ञातं न कैवल्यविदा तत्र, त्रिश्वेपि नास्त्यैव च वस्तुजातम् ।
न मेयमानत्वभवाऽनवस्था, कैवल्ययुक्ते जिनराजि चिन्त्या ॥

एवं च दृष्टे निखिले जिनेन, लोके स्वपर्याययुते ह्यलोके ।
द्रव्येषु पर्यायतया विबुद्धा, उत्पादभावाः स्वतः षट्सु तेषु ॥३॥

व्ययो न सत्त्वं व्यतिरिच्य सत्त्वं, विना न चोत्पत्तिमृते न तां तत
सत्यन्वयेपि स्फुटमत्र सत्त्वं, प्रादुर्भवं प्रेक्षत उद्धृतत्वम् ॥ ४ ॥

ततो गणेशान् प्रति तत्त्वबोधे, प्रश्ने पुरोत्पादमुवाच शम्भुः ।
उत्पत्तिधर्माणि ततः समस्ता द्रव्याणि जज्ञुर्गणधारिणस्ते ॥

अतस्त्रिपद्यां प्रथमं न्यगादि, व्याप्तो हि दृष्टौ प्रभवोऽर्थवृन्दे ।
नासौ विना पूर्वतरस्य नाशं, ततो द्वितीयं विगमोपि तत्त्वम् ॥

भावे स नाशे क्षणिकत्वसक्तिः, स्याच्छून्यवादोऽपि परावकाशः
नार्थक्रिया नैव च कार्यहेतुभयं ततः स्माह जिनो ध्रुवत्वम् ॥

व्याप्ता तदेवं कथिता त्रितत्त्वी, ततो गणेशेषु समोऽवबोधः ।
मुक्त्वा त्रयं नैव यतो जगत्यां,
वस्त्वस्ति किञ्चिन्न च तद्वियुक्तम् ॥ ८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

एवं च स्याद्वादपथोपदेशाद्दिष्टं समग्रं जिनवाङ्मयं स्यात् ।
षण्णां यथार्थत्वनिवेदनाच्च, धर्मादिकानां विलयोऽनुयोक्तेः ॥
पदत्रयेणापुरशेषबुद्धि, समा गणेशा जिनसत्प्रभावात् ।
दिनेशतेजःस्फुरणात्समानि, भवन्ति नाञ्जानि विकाशभाञ्जि ॥
पीयूषतुल्यां जिनवाचमेते (निपाय) भावादिति रम्यरूपाम् ।
मोक्षावसाना भवतीह यद्वत्, साधुक्रियाज्ञादिकृतिं तथा व्यधुः ॥
उत्पत्तिमुख्यां जिनवाचमर्थस्वरूपिका लोकमुखार्थगावा ।
निपीय तां चक्रुरशेषशास्त्रततिं गणेशाः शुचिसूत्ररूपाम् ॥१२॥
विध्यर्थबद्धा यतिवर्गयोग्या, विभागयुक्ताः क्रमसङ्गताश्च ।
गणाधिपानां कृतयस्ततस्ताः, स्यात् सूत्ररूपा हि न तत्र चित्रम् ॥
क्षेत्रे विभिन्ने समये च भिन्ने, जिनोपदिष्टार्थततेः प्रवाधः ।
गणेशदृब्धाच्छुचिसूत्रवृन्दात्ततश्च तीर्थं गणधारिणस्ते ॥१४॥
यतो हि सङ्घो गणिदेशिताया, भवाब्धितीरं व्रजतीद्धरूपः ।
आलम्बनात्सूत्रततेस्ततोऽयं, तीर्थस्वरूपेण जिनैर्न्यवेदि ॥१५॥
जिना हि तीर्थङ्करतामवाप्ता, न तीर्थरूपा गणधारिणस्तु ।
प्रोक्ताः श्रुते तीर्थतया यतस्तद्वाणीं समालम्ब्य तरन्ति भव्याः ॥
गणेशवर्या अपि साधुवृन्दं, स्वं स्वं समाश्रित्य कृतिं प्रचक्रुः ।
ततः समेषां गणधारिणां स्युः, पृथक् पृथग्वाचनिकाः कृतान्ताः ।
परं समेषां शिवगामिनां नृणां, पोतायमाना भववार्धितारे ।
त्यक्त्वा गणेशान् न परे ततस्ते,
सर्वेऽपि पूज्यत्वपदं शिवार्थिनाम् ॥ १८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

न कार्यगृह्या नव जातिगृह्या, व्यक्तेः पदं नानुसरन्ति जैनाः ।
यत्रांगतोऽप्युच्यते आत्मसिद्धिं, नमन्ति तत्रासमभावयुक्ताः ॥
अस्तवारम्भ इतो नमन्ति, अनादिकर्तॄन् समकर्मभौमान् ।
क्षेत्रेऽत्र जाता भरते पुरा ये, गणाधिपा ये महतास्पदं तत् ॥
सर्वेषु तीर्थेषु चतुर्भिराढ्या, नम्या जिनानां द्विदशा तु सङ्ख्या ।
नन्वार आप्ता न समो रकारानुगास्त्वमीषां गुणितादरोऽतः ॥
समस्ततीर्थेश्वरतीर्थपूजां, ततो विधातुं सकृताभिसन्धिः ।
गणेशिनां सर्वजिनाश्रितानां, तत्स्थापनामत्र विदो ह्यकार्षुः ॥
ततश्चतुर्विंशतिरर्हतां कृताः सत्स्थापनात्तद्गणधारियुक्ताः ।
मामे यतो भव्यजनोपकर्तृ पदस्थिताः पूज्यतनाश्च तीर्थे ॥२३॥
मोक्षाध्वसिद्ध्यै जिनपैर्जनानां, तीर्थं कृतं दृब्धमशेषविद्भिः ।
समैर्गणेशैःद्य परमेतदद्य यावद्धृतं सूरिवरैः समस्तम् ॥ २४ ॥
तीर्थं ततोऽङ्गोऽवधृतं मुनीशैः सदा साधुभिस्त्यक्तपरस्पृहैश्च ।
बाधो न यत्र परपूर्वभागे, हितो यदेतत्परवरं प्रवृत्तम् ॥ २५ ॥
अविच्छिन्नं यज्जिनशास्त्रवृन्दं, भव्यैरिहाप्येत शिवाध्व सिद्ध्यै ।
देवर्षिगणक्षमाश्रमणगणाधिपास्तत् पूज्या यदीयावलिकाऽत्र हेतुः ॥
यथाहि तीर्थं गिरिराजरूप-माराध्यमेवाखिलगच्छमानाम् ।
भेदोऽस्ति यन्नात्र विधौ कथञ्चित्तीर्थाश्रिते गच्छगतो विचित्रः ॥
सर्वे श्रिता गच्छगता मनुष्या, विरोधवर्जं जिनशास्त्रगृह्यैः ।
ततो निखिलैर्गणसंश्रितैर्जनैः,
स्थानं मतं पूज्यतमं सदैतत् ॥ २८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

प्रतिदिनं भवनं परिपूजकै रिदमनाहतभाववरैर्वरैः ।
भरितभुग्नतपूजनतत्परै-र्व्रजति चानुदिनं शुचिसिद्धये
( कीर्तिततिं परमां भुवि ) ॥ २९ ॥

यथैव मोक्षाध्वनि दर्शनादिकं, मिथो विमिश्रं जनतेष्टसिद्धये ।
तथैव शास्त्राणि पदानि सिद्ध्यै, स्युस्तद्गणेशालियुतानि सन्ति ॥

मार्गे जैने पूज्यतां ते प्रयान्ति,
ये स्युः सिद्धाः साध्यतां वा श्रिताश्च ( साधकत्वं गता वा )
तन्माराध्यास्तत्र दारार्थरक्ता,
नहि स्यात् साधोः सक्तसेवा मनीषा ॥ ३१ ॥

एकादशीं तत्प्रतिमां प्रपन्नः, श्राद्धो न वन्द्यत्वपदं समेति ।
मार्गानुयायी गतशास्त्रबोधो, मुनिः सुरेन्द्रैः परिषेवणीयः ॥

ये मोक्षं परिसाधयन्ति जिनपाल्लब्ध्वा ससम्यग्दृशम् ।
पापेभ्यो विरतिं समस्तविषयां वाणीं त्रिपद्यात्मिकाम् ॥
यावत्तीर्थमशेषभव्यहितदां जग्रन्थुराप्तोदितिं,
ते सर्वे गणधारिणः शिवपदाप्त्यै सन्तु भव्याङ्गिनाम् ॥३३॥

पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता
॥ श्रीगणधरपट्ट-द्वात्रिंशिका समाप्ता ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# अनेकान्तवाद-विचारः ।

(पूर्व०) यस्मात् सत्त्वमसत्त्वं च विरुद्धं हि मिथो द्वयम् ।
वस्त्वेकं सदसद्रूपं तस्मात् खलु न युज्यते ॥ १ ॥

भेदो वा स्यादभेदो वा द्वयं वा धर्मधर्मिणोः ।
भेदे नैकमनेकं स्यात् अभेदेऽपि न युज्यते ॥ २ ॥

द्वयपक्षोऽपि चायुक्तो विकल्पानुपपत्तितः ।
तेनानेकान्तवादोऽयमज्ञैः समुपकल्पितः ॥ ३ ॥

न च प्रत्यक्षसंवेद्यं कार्यतोऽपि न गम्यते ।
श्रद्धागम्यं यदि परं वस्त्वेकमुभयात्मकम् ॥ ४ ॥

पर्यायाऽभेदतो द्रव्यं नित्यं स्यात्तत्स्वरूपवत् ।
स्याद्वादविनिवृत्तिश्च नानात्वे संप्रसज्यते ॥ ५ ॥

प्रवृत्तिनियमो न स्याद् विषादिषु तदर्थिनः ।
मोदकाद्यपृथग्भूत-सामान्याऽभेदवृत्तिषु ॥ ६ ॥

भेदे चोभयरूपैक-वस्तुवादो न युज्यते ।
भेदाभेदविकल्पस्तु विरोधेनैव बाधितः ॥ ७ ॥

विशेषरूपं यत्तेषु तत्प्रवृत्तेर्नियामकम् ।
साध्वेतत्किन्तु वस्तुत्वं तस्यैवेत्थं प्रसज्यते ॥ ८ ॥

सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः ।
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ? ॥ ९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

अथास्त्यतिशयः कश्चिद्येन भेदेन वर्त्तते ।
स एव दधि सोऽन्यत्र नास्तीत्यनुभयं परम् ॥ १० ॥
सर्वात्मत्वे च भावानां भिन्नो स्यातां न र्धाध्वनी ।
भेदसंहारवादस्य तदभावादसम्भवः ॥ ११ ॥
यः पश्यत्यात्मानं तत्रास्याहमिति शाश्वतः स्नेहः ।
स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते ॥ १२ ॥
गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते ।
तेनात्माभिनिवेशो यावत्तावत् स संसारे ॥ १३ ॥
आत्मनि सति परसञ्ज्ञा स्वपरविभागात् परिग्रहद्वेषौ ।
अनयोः संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ॥ १४ ॥
कर्मक्षयाद्विमोक्षः स च तपसस्तच्च कायसंतापः
कर्मफलत्वान्नारक-दुःखमिव कथं तपस्तत् स्यात् ॥ १५ ॥
न स्वेच्छाप्रतिपत्त्या विशिष्टसुखभावतुल्यवृत्तित्वात् ।
इष्टौ प्रतीतिकोपस्तदन्यबन्धो द्वयेपि समः ॥ १६ ॥
चित्रं च कर्म कार्यात् सङ्क्लेशादेव तत्क्षयोऽयुक्तः ।
दुःख्येव तपस्वीति च तदभावो योगिनां चैव ॥ १७ ॥
अन्यदपि चैकरूपं तच्चित्रक्षयनिबन्धनं न स्यात् ।
तच्छक्तिसङ्करक्षयकारीत्यपि वचनमात्रं तु ॥ १८ ॥
अक्लेशात् स्तोकेऽपि क्षीणे सर्वक्षयप्रसङ्गो यत् ।
साङ्कर्यादिन्यायात् तद्भेदो ह्यन्यथा नियमात् ॥ १९ ॥
मुक्तो न मुक्त एव हि संसार्यपि सर्वथा न संसारी ।
मानमपि मानमेव हि हेत्वाभासोप्यसावेव ॥ २० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

एवं सप्रतिपक्षे सर्वस्मिन्नेव वस्तुतत्त्वेऽस्मिन् ।
स्याद्वादिनः सुनीत्या न युज्यते सर्वमेवेह ॥ २१ ॥
(उत्तर०) यस्मात् सत्त्वमसत्त्वं च न विरुद्धं मिथो द्वयम् ।
वस्त्वेकं सदसद्रूपं ननु तत् किं न युज्यते ॥ २२ ॥
नाभेदो भेदरहितो भेदो वाऽभेदवर्जितः ।
केवलोऽस्ति यतस्तेन कुतस्तत्र विकल्पनम् ॥ २३ ॥
येनाकारेण भेदः किं तेनासाविति किं द्वयम् ।
असत्त्वात् केवलस्येह सतश्च कथितत्वतः ॥ २४ ॥
यतश्च तत्प्रमाणेन गम्यते ह्युभयात्मकम् ।
अतोऽपि जातिमात्रं तदनवस्थादिदूषणम् ॥ २५ ॥
एवं ह्युभय दोषादि—दोषा अपि न दूषणम् ।
सम्यग् जात्यन्तरत्वेन भेदाभेदप्रसिद्धितः ॥ २६ ॥
तेनाऽनेकान्तवादोऽय-मज्ञैः समुपकल्पितः ।
न युज्यते वचो वक्तुमिति न्यायानुसारिणः ॥ २७ ॥
अयमस्तीति यो ह्येष भावे भवति निश्चयः ।
नैष वस्त्वन्तराभाव—संवित्त्यनुगमादृते ॥ २८ ॥
नास्तीत्यपि च संवित्तिर्न वस्त्वनुगमं विना ।
ज्ञानं न जायते किञ्चिदुपष्टम्भेन वर्जितम् ॥ २९ ॥
यस्मात् प्रत्यक्षसंवेद्यं कार्यतोऽप्यवगम्यते ।
तस्मादवश्यमेष्टव्यं वस्त्वेकमुभयात्मकम् ॥ ३० ॥
भावेष्वेकान्तनित्येषु नान्वय—व्यतिरेकवत् ।
संवेदनं भवेद्धर्म—भेदाभावादिह स्फुटम् ॥ ३१ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सर्वथा कारणोच्छेदाद् भवेत् कार्यमहेतुकम् ।
तच्छक्त्यन्वयवाधार-स्वभावानामनन्वयात् ॥ ३२ ॥
नित्यं योगी विजानाति क्षणिकं नेति का प्रमा ।
देशनाया विनेयानु-गुण्येनापि प्रवृत्तितः ॥ ३३ ॥

नान्वयस्तद्विभेदत्वाद् न भेदोऽन्वयवृत्तितः ।
मृद्भेदद्वयसंसर्गवृत्तिजात्यन्तरं हि तत् ॥ ३४ ॥
द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः ।
क्व कदा केन किं रूपा दृष्टा मानेन केन वा ? ॥ ३५ ॥

अन्योऽन्यव्याप्तिभावेन द्रव्यपर्याययोः कथम् ।
भेदाऽभेदो विरुद्धः स्यात् तदभावानुपपत्तितः ॥ ३६ ॥
नान्योऽन्यव्याप्तिरेकान्त-भेदेऽभेदे च युज्यते ।
अतिप्रसङ्गाच्चैक्याच्च शब्दार्थानुपपत्तितः ॥ ३७ ॥

अन्योऽन्यमिति यद्भेदं व्याप्तिश्चाह विपर्ययम् ।
भेदाभेदे द्वयोस्तस्मा-दन्योऽन्य व्याप्तिसम्भवः ॥ ३८ ॥
एवं शबलरूपेऽस्मिन् व्यावृत्त्यनुगमावपि ।
स्याद्वादनीतितः सिद्धौ यथाऽनुभवसुस्थितौ ॥ ३९ ॥
इत्थं प्रमाणसिद्धेऽस्मिन् विरोधोद्भावनं नृणाम् ।
व्यसनं धीजडत्वं वा प्रकाशयति केवलम् ॥ ४० ॥

[ पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरिकृता
अनेकान्तवाद-विचारः समाप्तः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

* श्रीगौतमगणधराय नमोनमः *

# अमृतसागर-मुनिगुणवर्णनम् ।

लब्धो येन समस्तदोषविकलो मोदैकहेतुः परं,
स्याद्वादश्रुतदेशकोऽसमशमपाथोधिरर्च्योऽमरैः ।
भव्यानां शिवमार्गसाधनविधौ निष्णो जिनेशः प्रभुः,
निर्ग्रन्थोऽमृतसागरोऽयमनिशं जीयात् सतां मोदकृत् ॥१॥

ज्ञातो देवकुदेवसंयमधरानिवृत्तधर्मेतरे-
ष्वात्मारामतयाऽखिलार्त्तिहरणो मुक्त्यै विशेषोऽभवत् ।
सम्यक्त्वं शिवकल्पपादपनिभं येनार्चितं लभ्यते, नि० । २ ।

येन श्रीऋषभादयो जिनवराः स्तुत्यास्पदं लम्भिताः,
जीवाजीवपदार्थसार्थहृदयोद्भासैकदीप्तप्रभाः ।
कैवल्याश्रितविग्रहा गुणगणोच्चित्यै क्षमाः सर्वदा, नि० । ३ ।

ज्ञातं येन सुरासुरोरगनरश्रेणिश्रितानां सना,
दर्शनमाप्तिधुरन्धरं स्वकदशादानैकदक्षं मुदा ।
तीर्थेशां श्रमणौघशान्तिकरणं व्यापत्तिविध्वंसनं, नि० । ४ ।

लब्धा येन जिनेशसन्ततिपदाम्भोजेषु सौख्यैकभू-
रर्चिष्मत्सु भवान्धकारनिकरप्रोज्झासने भाविनाम् ।
सेवा स्वात्मरतिप्रदा शिवसुखप्राप्तिक्षमा तान्तिभिद्, नि. । ५ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

पाथोभिर्हरिचन्दनैः सुकुसुमैर्धूपैर्बलिं संश्रितैः,
पुष्पैः शुद्धफलैस्तथामिषवरैः पूजा तता नित्यशः ।
येनानन्तफलाप्तिसाधनसहा (प्रये समजनि) द्रव्योत्थिता भावयुग्,
नि० । ६ ।

भव्यानां भविकाप्तिलम्पटहृदां या कल्पवल्लीप्रभा,
द्रव्यारम्भविनिर्गताऽखिलविदां चैत्यावलीवन्दना ।
येनात्माखिलसम्पदाम्बुजभिदे सूर्यप्रभा लम्भिता, नि० । ७ ।
चित्रं मोक्षप्रदाप्तिजातमनिशं रूपं निरूपं श्रितां,
मुक्तानां जिननाथतापदजुषामोकः कृतं मुक्तिदं ।
येनावापि शमेशसाधितपथालीनेन शुद्धात्मना, नि० । ८ ।
लीलालीनहृदः प्रभूतरुचयः देवाः सहस्रा भुवि,
संज्ञासंस्मृतिमात्रकृत्तदुरिताश्चिह्नेन सिद्धिप्रदाः ।
त्यक्ता दुर्गममार्गमंहतिहरं सत्यं श्रितो येन च, नि० । ९ ।
गर्भे येऽवतरन्त आदिमपले स्वप्नांश्चतुर्भियु तान्,
दर्शं दर्शमचीकृतन् स्वजननीं मोदोद्धुरां तीर्थशाः ।
कल्पद्रोरिव वृद्धितः सुखकरा येनाशु श्रद्धां श्रिता, नि० । १० ।
प्राग्जन्माधिगतान्यथाऽच्युतियुतानीद्धानि बभ्रुर्जिनाः,
प्रव्रज्याग्रहणादनु स्थितिजुषो ज्ञाने मनोवेदिनि ।
सर्वज्ञाः समबोधरोधदुरितध्वंसान् मतास्ते त्विनाः, नि० । ११ ।
त्यक्त्वा मोहमयीं विबोधमहिमप्राग्भारतोऽगारितां,
श्रामण्यं समुपागताः सुरनरैर्ये सेहिरे विप्लवान् ।
संदब्धान् सपरीषहान् गततृषो देवा मतास्तीर्थपाः, नि० । १२ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

आरुह्यात्मबलेन संयमभृतः कर्मालिसंहारिणीं,
श्रेणिं कर्मचतुष्टयक्षतिमथानन्तं विबोधं गताः ।
यैर्निर्दिष्टमिदं महाप्रवचनं ते येन शुद्धा जिनाः, नि०।१३।

पौर्वापर्यविरोधदोषरहितं सत्साधुभिः सम्मतं,
निश्शेषाङ्गिहितं दयार्द्रवचनं मोक्षैकमूलं दृढम् ।
सर्वज्ञैर्जिननामकर्मकलितैरुक्तं मतं येन वै, नि०।१४।

साम्यं यैर्निरुपाधि संश्रितमनुप्रध्वस्तदोषं सदा,
देहे पर्षदि साधुसंयमधरे श्राद्धेऽन्यतीर्थाश्रिते ।
सम्यग्धर्मनिरूपणैकनिपुणैस्तेऽन्तः सदा स्थापिता, नि०।१५।

सर्वेभ्यो हितमादिशन् द्विविधया पीडापरीहारया,
ये धर्मं दययाखिलार्त्तिहरणं जन्तूद्दिधीर्षान्विताः ।
सार्वाः शुद्धनयान्वितं मुनिगृहीष्टं येन ते सम्मताः, नि०।१६।

सूक्ष्मं भेदशतान्वितं जनिभृतां संरक्षणेऽगादिषु,
धर्मं सदयया युतं मखमुखां हिंसां निवार्याङ्गिनाम् ।
रक्षोपायमुपादिशन् शतविधं ते येन चित्तैर्वृताः, नि०।१७।

आख्यन् वादमनर्थघातनिपुणं स्याद्वादसङ्गं यतो,
नित्यानित्यसमानताविषमतैकानेकधर्मान्वितम् ।
दृष्टेष्टानतिबाधितं वृषकृते ते येन सेव्याः श्रिताः, नि० ।१८।

आख्यायाङ्गिहितं दयैकनिपुणं चक्रुः स्वयं ये तथा,
श्रामण्यं निखिलाघवारणसहं वाक्कायसाम्ये स्फुटम् ।
तेऽनन्यासमशान्तिकान्तिसहिता मान्या अभूवन् जिनाः, नि०।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

लब्ध्वा ज्ञानमनन्तमस्तनिखिलाबोधं निहत्यांशतो,
मोहादीन् चिरकाललब्धनिचयानाप्येन्द्रपूजां शुभाम् ।
व्याख्यन् धर्ममधिश्रिताः शिवसुखा येन कृतार्थाः पुनः, नि०॥

येषां वाग् निखिलाङ्गिबोधनपटुर्जाता स्ववाग्गामुक्ता,
भारत्या समदेश्यमिश्रिततया विश्वाच्र्यताकारणं ।
ये सत्यं दधिरे जगद्गुरुपदं ध्याता जिना येन शं, नि०।२१।

येनाप्ता नतिरर्हतां शिवकृतां सिद्धात्मनां निर्वृतौ,
स्वात्मारामतया सदा सुखजुषामर्थानुयोगश्रिताम् ।
सूरीणां जिनशास्त्रपाठनयुजां सद्वाचकानां मुनेः, नि० ।२२।

मुक्ता येन विभावसौ दिनकरे चन्द्रेऽग्निवाय्वोः सुरे,
सस्त्रीके भुजगे वटे शशिधरे रामे मधौ माधवे ।
अश्वत्थार्कशमीषु तारकधिया देवत्वबुद्धिर्हृदा, नि० ।२३।

येनोज्झिङ्क्तिमर्हदादिचरणैस्तीर्थं श्रितं पावनं,
जन्तूनां भववार्धिवीचिनिहतानन्दात्मनां जन्मिनाम् ।
अव्याबाधपदाप्तिहेतुरसमं कर्मादिघाते पविं, नि० ।२४।

येनाङ्गीकृतमात्मनिर्वृतिकृते शत्रुञ्जयो रैवत-
स्तारङ्गोऽर्बुदकेशरीयचपलाजीरावलीराणपूः ।
सम्मेतः फलवृद्धिरुज्जयिनीपूः पापा च चम्पा शुभं, नि० ।२५।

साकेतं च बनारसीपुरवरं काम्पील्यमक्षीपुरे,
पार्श्वः स्तम्भन आश्रितो गजपुरं श्रीअन्तरीक्षप्रभुः ।
श्रीमन्मण्डपदुर्गभण्डुकपती कुल्पाक सत्ये तथा, नि० ।२६।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

सञ्ज्ञाऽष्टोत्तरमादधत् फणिपतिस्तुत्यो जिनेश शतं,
सञ्ज्ञास्तप्रतिबिम्बभूषितमलं तीर्थं जगत्तारकम् ।
वन्दं वन्दमशेषतीर्थनिकरं धत्तं पवित्रं जनुः,
( तीर्थं जनुः पावनं, नि० ।२७। त्रिभिर्विशेषकम् ॥
दूराद् येन कृता निरस्तनिचया आशातना आर्हती,
प्रेत्याबोधिफला दुरन्तदुरिता सद्बोधविद्राविणी ।
आचीर्णा बहुकर्मभिरनुगता ज्ञानादिवार्तैः सदा, नि० । २८ ।
भक्तिः स्वर्गशिवालयाप्तिजननी सन्मार्गदानक्षमा,
येनात्मोद्धृतिकारिणी शमपदा ज्ञानादिसम्पत्प्रदः ।
स्वान्यश्रेयस आद्दता क्षमदला धर्मप्रभावैकभूः, नि० । २९ ।
यस्य ज्ञानमनन्तवस्तुविषयं वैशिष्ट्यबोधक्षमं,
सामान्यप्रविबोधकं च तदिव स्वोद्भासिसद्दर्शनम् ।
जन्माद्यै रहितं शिवं शिवदयं येनाश्रितं तत् सता, नि० । ३० ।
आत्माऽनादिनिबद्धकर्मगुपिलः शेषान्तकोटीं स्थितिं,
कृत्वाऽशेषविबाधिनां च करणे अन्त्ये विधायात्मना ।
बुद्धो मण्डितबुद्धनीतिसरणाद् येन प्रशान्तात्मना, नि० । ३१ ।
लब्ध्वा दर्शनमात्मदर्शनकरं त्यक्त्वा शरीरात्मता,
लिप्सुर्यः परमात्मतामघचयोच्छेदैकनिष्णां शुभाम् ।
आत्मा येन सुसंस्कृताऽव्ययपदप्रेप्सुः सदा जातवान्, नि० ३२।
सम्प्राप्तुं निजरूपमच्युतपदं लब्धं न यत् प्राग् मना-
ग्दृष्टिज्ञानमयं विरागपदयुग् जन्मान्तकाद्युज्झितम् ।
संसारार्णवपाति दुःखरहितं येनोद्यतं निस्तुषं, नि० । ३३ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

यस्त्वारम्भपरिग्रहाद्युपरतो जैनेन्द्रमार्गोल्लस-
ज्ज्ञानध्यानपरो गुरुः स मनसि सम्यक्त्वपूर्वं धृतः ।
जन्तूनां शिवमार्गदो वृषरदं येनानुभावी सदा, नि० । ३४ ।
गार्हस्थ्येऽपि सदा जिनेशयजनं भक्त्या कृतं द्रव्यतः,
पाथश्चन्दनधूपदीपसुमनोनैवेद्यशुद्धाक्षतैः ।
प्रातःसङ्गतसत्फलैः सह मुदा पावित्र्यकृज्जन्मनः, नि० ।३५।
( येनाङ्घ्रिपावित्र्यकृत् )
हेम्नां लक्षमनारतं प्रदिशतो यल्लाभ आप्यो नृभि-
स्तस्माद् भूरिफलप्रदं नियमतः सामायिकं गीयते ।
ध्यात्वेति ध्रुवमाचरद् जिनपतेर्येन श्रुते भक्तिभाग्, नि०।३६।
श्रामण्यं चरितं नरामरपतिप्रार्थ्यं भवेऽनेकशः,
दत्तं दानमनेकधा धृतमिदं शीलं चमत्कारकम् ।
तप्तं दुस्तप आत्मनो हितकरी सद्भावना भाविता, नि० ।३७।
निर्दोषं फलवद् भवेत् सुमनसां कर्मेह पारत्रिकं,
मत्वेति प्रसभं समाचरदहो आवश्यकीं सत्क्रियां ।
यस्त्वाद्यंहतिशोषिणीं शुभदशां येनात्मशर्मावहां, नि० ।३८।
श्राद्धत्वं सुरशाखिकल्पमभवत् सत्तीर्थयात्रादृतेः,
स्वर्मोक्षाख्यफलप्रदं त्विति विदन् यात्रां जिनेशाङ्घ्रिभिः ।
पूतानां व्यतनोत् समाहितमतिः सत्तीर्थभूनां यतः, नि० ।३९।
सूत्राणां परमेष्ठिमन्त्रमहिमेर्यालोकचैत्यश्रुत-
सिद्धानां सुधिया क्रियन्त उपधानानि प्रभोर्वाक्यतः ।
श्रद्धानादियुतानि भो ! इतरथा भ्रान्तिर्भवे इत्यविद्, नि०।४०।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

संसारेऽसुमतां विलोक्य विविधान् बाधोच्चयान् नैकधा,
जन्मव्याधिजरान्तकोद्भुव इहोद्यच्छेच्छिवाप्त्यै सुधीः ।
श्रुत्वा सद्गुरुभाषितं प्रतिपदं वैराग्यमापत् क्षमं, नि० ।४१।
प्राचीनर्षिचरित्रमद्भुततरं वैराग्यपूर्णं गुरोः,
शृण्वन्नात्मगुणान् द्रुतं चिभरिषुः शीलं मुदोच्चीर्णवान् ।
संसारैकनिबन्धनं प्रविजहद्योऽब्रह्मपापं प्रधीः, नि० । ४२ ।
जातौ मृत्युभयं धने व्ययभयं काये भयं रोगतो,
वाक्ये दुर्जनसाध्वसं मनसि च कामाद् भयं दुःखदम् ।
सत्कारे च्युतिसम्भवं भयमिहावेक्ष्यात्मसिद्ध्यै यतः, नि० ।४३।
वीक्ष्यात्मोद्धृतिकारकं शिवकरं सम्मोहविद्रावकं,
पापाद्रिप्रविभेदने पविसमं धर्मामरद्रुप्रसूम् ।
आचारं मनसा गुरोर्वचनतः शुद्धं समाराधयत्, नि० ।४४।
जन्तूनां··· ···वाचा तथा कर्मणा,
नैवान्यैर··· ···त्रिधा हितरता ।
तो येनात्मनीनो मतः, नि० । ४५ ।
सत्योक्तेर्वितथोदितेर्विरमणे संवीक्ष्य शक्यात्मतां,
गाम्भीर्यं व्रतपालनं च वचसो दृष्ट्वा चतस्रो त्रिधाः ।
अत्यक्षद्वितथोदितिं गुरुवरोऽसौ येन चित्ते धृतः, नि० । ४६ ।
हिंसा हिंस्यनिबद्धकर्मजनिता सोपक्रमे जीविते,
सम्भाव्याऽऽप्तगिरा तथापि तनुमान् सङ्क्लिष्टभावो भवन् ।
बध्नात्यंह इति व्रते नियतवान् येनाश्रितः साधुराट्, नि० ।४७।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

ग्राह्याः केवलिनेक्षिता जगति ये वाचोऽणवो यैर्यदा,
जीवैः स्वैर्विधया यया भवति हि प्रोद्यत्प्रभावं तथा।
जीवानां फलवद् भवेत् प्रयतनं वीक्ष्येति वाक् संयता, नि० ४८।

त्रिधाऽदत्तमनर्थसार्थपदवीं त्रेधा त्यजन्नात्मना,
नान्यैरन्यधनं स्वजीवनसमं नादत्तमुद्ग्राहयेत्।
नानुज्ञां विदधीत तत्र सुमुनिः संसारपारार्थिकः, नि० ।४९।

यद्यप्यत्र भवे परत्र यदि वा स्याद् ग्राह्यभावो धने,
जीवानां मिथ आत्तकर्मजनितो वैरं तथाप्यग्रिमम्।
इत्यालोच्य महोदयप्रदमिदं स्वीकार्य ते तद्व्रतं, नि० ।५०।

यद्यप्यस्ति न कर्मसु प्रभुपदं कस्यापि तत्तद्भवं,
नादत्ते ग्रहणे तु कल्मषकरं किन्तु स्वरूपापहम्।
मत्वेति ध्रुवमातनोति धृतिमान् येनात्मभावे स्थितिं, नि०।५१।

साधोः शुद्धपदं सदाभिलषतो हेयोऽभिलाषः स्त्रिया-
मब्रह्माऽस्ति मतं जिनागमततावेकान्तिकं पापकृत्(न्ततोऽघालिमत्)
नात्रान्यत् पदमस्ति यद् वृषपुषे तत्त्यक्तमेतत्त्रिधा, नि० ।५२।

संसारोऽयमनेकधा विषयजं सौख्यं समादित्सतो,
नीरन्ध्रः समुपैति वृद्धिमनिशं तद्धेयमेतद् ध्रुवम्।
एवं चित्तगृहे मनोरमतरं चारित्रलक्ष्मीं श्रयेत्, नि० ।५३।

वेश्यां द्वादशवर्षभुक्तविषयां सच्चित्रशालास्थितां,
शृङ्गाराङ्कितविग्रहां रतिसमां श्रामण्यमाप्योज्झहौ।
मत्वा तत्र मुनिः चचाल च मनाक् येनात्मसिद्धौस्थितः, नि० ५४

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

जम्बूस्वामिसुदर्शनप्रभृतयः सच्छीलरत्नाञ्चिताः,
प्रद्युम्नप्रमथा धृताद्भुतविदो मत्वेति वाचयमीम् ।
दीक्षामुज्झितवाकनिगृहीतवान् यस्य प्रभावोऽद्भुतः, नि० ५५
नारीर्नारकृतान्तिराजिरचनाचातुर्यविभ्राजिता,
हिंसातथ्यवचोपटच्चरकृतिद्रव्यप्रसङ्गाविलाः ।
सञ्चित्यात्मरतिः वृताऽसमधिया येन प्रशान्तात्मना, नि०५६
सम्यक्त्वं दधते स्थितिं तनुधरे स्फूर्त्या नयान्निश्चयात्,
सद्बोधामरपादपोऽपि फलति प्राणिन्यशाध्यद्युतिः ।
( चेद्वृत्तं यमिनां ) मत्वेति प्रशमी दधाति विधिवत्
प्रोज्झ्य प्रमादान् व्रतं, नि० । ५७ ।
स्थैर्यं चेद् विदधाति संयमधरो ब्रह्मादतौ ब्रह्मभाक्,
सिद्धं तस्य समस्तमर्थितपदं शेषं विना साधनम् ।
वाचो यस्य सुधाकिरः सुमतिभिराषीय दग्धोऽतनुः, नि० ५८
त्यक्त्वाऽशेषमघोच्चयस्य निकरं सांसारिकं तत्त्ववि-
दादचो निखिलाङ्गिनिर्भयकरं ब्रह्मव्रतं मोदभाक् ।
सत्यं यन्निजरूपदर्शनविधौ येनामितानन्दभाक्, नि० ।५९।
सर्वांहःप्रकरैकसाधनमहानर्थप्रदं वैभव,
भव्योच्चाटनदीक्षितं वधमृषास्तेयादिदोषोत्करम् ।
त्यक्त्वात्मर्द्धिनिमित्तमात्मरमणात् सन्तोष आत्तोऽमुना, नि० ६०
सर्वे ये समुपासिता गुणकरा देवा जिनेशादिमा,
निर्ग्रन्था गुरवस्तपोव्रतमुखाः शुद्धाः शिवाप्तौ क्षमाः ।
धर्मास्तान् प्रणिहन्ति सक्तहृदयः सङ्गं ततो योऽजहत्, नि० ६१

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

ग्रैवेयाः करगोचराः समभवन् देवेशचक्रिश्रियः,
जीवानां भुवि लब्धयश्च विविधा आश्चर्यदा लेभिरे ।
अन्त्यन्तं वृजिनौघघातनसहं नैर्ग्रन्थ्यमापत् शुभं, नि० । ६२ ।

रेवा मोहकरीन्द्रचित्तरमणे कुज्ञानकन्दाम्बुदो,
मिथ्यातस्करसार्थत्रासनकृतेऽरण्यं मतोर्थो ध्रुवम् ।
तत्त्वं साधुपदेन सर्वसुगुणाढ्ये नावधीत् श्रेयसा, नि० ।६३।

येनाप्तेन भवाष्टके शिवपदं जन्तोर्भवेन्निश्चयात्,
संसारोदधिपारलम्भनविधौ पोतायते योऽङ्गिनाम् ।
देवाः स्वामियुता भवन्ति वशगाः सोऽसङ्गभावो यतः, नि०६४

आर्त्तध्यानविधानवीर्यसहितं रौद्रेऽपि सौधे व्रजेत्,
स्तम्भत्वं विनिहत्य धर्मविषयां बुद्धिं शिवाध्वोद्यताम् ।
यः सङ्गः स विशिष्टलाभविधये येनोज्झितः सर्वथा, नि० ६५

क्षीणे दुष्कृतसञ्चये शिवपदं लभ्येत भव्यात्मभि-
र्नाशस्तस्य न जायते व्रतमृते, निःसाधनं तच्च नो ।
सामर्थ्येऽसति तादृशे ह्युपधिना येनार्चितः संयमी, नि० ६६

सम्पूर्णो ननु संयमः सुरगिरेस्तुल्ये स्थिरत्वे भवे-,
दारात्कायवचोमनःप्रभृतिभिर्वृत्तौ न चासंयमः ।
हेयेऽप्येवमशेषवस्त्रनिचये शुद्ध्यर्थमेतद्दधत्, नि० । ६७ ।

आहारोऽपि समग्रपापविधये भावीति विज्ञस्त्यजेत्,
तं प्रान्त्ये न तु कायधारणसहे दिष्टे त्यजेत्तं सुधीः ।
इत्येवं निखिलोपकारकरणं पात्रं यतः साधनं, नि० । ६८ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

शिष्यादिर्निखिलोऽपि बाह्यविसरस्त्याज्यो विशुद्धात्मभिः,
किन्त्वर्वाग् हतमोहराजगरिमा तीर्थेट् तकं दीक्षयेत् ।
इत्येवं स्वदशार्हतामनुगतः पूज्यो यतः······,
ध्याने नैव कदापि शुक्लतरके भाव्या जिनेन्द्राकृतिः,
दृश्या प्राक्सुधिया तथापि यदि तं ध्येया समर्च्या सका ।
तत्सर्वत्र न साम्यता हितकरीत्योद्यांशुकानां धृतिः, । नि० ।

प्रत्नानेहसि नैव पुस्तकधृतिर्ज्ञानाय साधोर्मता,
किञ्चाऽसंयमतापि तत्र विबुधैर्गीता च जैनागमे ।
बुद्धया ह्रासमवेक्ष्य संयमतया सैवोदितेत्यादृता, नि० ।७१।

तीर्थेशां न कमण्डलुर्न च पशोः पिच्छं त्रिभिर्जन्मतो,
ज्ञानैः साध्यमुपेयुषां किमु ततो नग्नाटसाधुव्रजः।
ते धत्ते यदि संयमोपकृतये वासो न तस्यै किमु, नि० ।७२।

लोचो मुष्टिभिरर्हतां तु विहितो दीक्षाक्षणे पञ्चभिः,
किं नास्याऽनुकृतिः कृताऽवसनिकैश्चेच्छक्तिसाध्ये न सः ।
तत् किं जीवदया हितैः परिहृतैस्तद्धारयंस्तान्मुनिः, नि० ।७३।

लोचोऽकारि जिनेश्वरेण विबुधादीनां समक्षं स्वयं,
केशानां स्वकरेण मस्तकहनुश्मश्रूद्भवानां तदा ।
सोऽप्येवं सकृदादृतः परममुं सैषांऽरैः किं व्यधात्, नि० ।७४।

शौचं तीर्थपतिर्मुनित्वमकृताभ्याप्यात्मनः कर्हिचित्,
नैवान्यैस्तदनुक्रियेत न किमु श्रामण्यमाप्तैः परं ।
येष्वैषामतिशायितेति विधिना येनोदिता सत्क्रिया, नि०.७५।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

मार्गं श्रीजिनराजजल्पितमिमं शुद्धं श्रयत्यञ्जसो-
त्सृष्टापोदितयुग्मगं निजबलं प्रेक्ष्यात्मशुद्ध्यै सहम् ।
वीर्यं स्वीयमगूहयन् व्रतविधौ योऽनोदितः साधुराट्, नि० ७६।
सङ्गः सर्वसुखस्तपस्युदयति ह्यस्मात् पराभग्नवान्,
तत्सक्तो न सहोदरेषु वनितालाभे भगिन्यामपि ।
निःसङ्गो मुनिराट् समस्तशमिनां दृष्टान्तभूतो यतः, नि० ७७।
आप्याप्याप्तमतं मुनित्वमनघं छायां न कोशस्य यो,
यावज्जीवमशिश्रियत् यतमनो वाक्कायवृत्तिर्मुनिः ।
जातेऽपि विविधे प्रसङ्गनिचये क्रोधः क्रुधाऽस्माद्ययौ, नि०।७८
क्रोधो धामधगित्यनारतममुं देहं दहत्यात्मनो-
पेतं मस्तकनेत्रघ्राणगलकोरो दाहमादौ दहत् ।
सञ्चिन्त्येति सदा क्षमाऽसिमदधद्यस्तीर्थकृज्ज्ञाततः, नि० ७९।
यः कोटीमपि संयमं गतमलं संसाधयेत् साधुराट्,
पूर्वाणां तु समाष्टकेन रहितां शुद्धां श्रितो भावनां ।
सोप्यन्तर्घटिकायुगेन दहति प्रास्तागमोक्त्याश्रयः,(मोऽतःक्षमा)
श्रामण्येऽधिकृतो महातपसि च मासोपवासात्मके,
साधुः क्रुद्धमनाः स्वशिष्यविषये मण्डूकिघातोत्थितम् ।
पापं शुद्धि मनाप्नुवन्(पयन्)गतिमितो नीचां यतोऽनागमः, नि०
यावज्जीवमधाज्जिनेश्वरवचः प्रोक्तं व्रतं भक्तिभाक्,
श्रामण्यान्वितमार्गसाधनरतिः संसारवृद्धेर्भिया ।
सोऽधाक्षीच्चरमं जिनं निजदृशा क्रोधात् श्रुतैर्जितः,
(क्षमी शम्यसौ) नि० ।८२।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

भक्तं प्रातरुरोषिते गृहिगृहादानिन्य आत्मम्भरि-
र्यः सांवत्सरिकोऽपि कुम्भमितमाः मासैश्चतुष्के मुनेः ।
एकां क्षान्तिमुपेयुषः कूरगडोः कैवल्यमाकर्ण्यते, नि० ।८३।
शारीरं छविराच्छिनत्ति नृपतेराज्ञामधिकृत्य य-
स्तस्मिन्नप्यभवन्न कोपकणिका स्कन्धस्य चित्तेऽप्यहो ।
एषा क्षान्तिः समाश्रिताऽव्ययपदेच्छामादधाने मुनौ, नि०।८४।
शिष्याः स्कन्दकसूरिराज उदितां तीव्रां व्यथां यन्त्रजा-
माज्ञाया नृपतेर्हतेन विहितां वादे जितेन द्विषा ।
(पालक) यावन्मोक्षपदं पुरोहितपदा क्षान्त्या यतः सेहिरे, नि०
वीर्यं विश्वजनातिशायिविदितं बाल्ये गिरेश्चालनात्,
क्षान्त्याऽसेवि दया तथापि जिनपेनान्त्येन क्लृप्ता (स्पष्टा) गसि ।
देवे सङ्गमके श्रुतोदितमिति श्रद्धाय तामाश्रितः, नि०।८६।
जीमूतेन पराभवं घटयितुं दैत्याधमः प्रावृतत्,
श्रीपार्श्वेन स आगतं जलमपि प्रोद्देशमत्रान्तरा ।
न क्रोधस्य लवोऽपि जात इह यां श्रित्वा क्षमां सा यतः, ।नि०।८७।
चेद् विश्वे नहि दुर्जना न च कृतास्तैः स्याद् व्यथाः काश्चन,
कायिक्यो न च दुर्वचांसि विधियः शक्ता अलं भाषितुम् ।
किं क्षम्यं सुधियां क्षमा भवति का ते कर्मनाशे क्षमाः, नि०।८८।
मानो नाशयति त्रिवर्गमखिलं मूलानि नीचैर्नयन्,
मान्यायाः सुगुणावलेः शतमुखान् दोषद्रुमान् वर्धयन् ।
तीर्थेशादिमतं निहन्ति विनयं मूलाद्धतो येन सः, नि० ।८९।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

जातेर्लाभकुलर्द्धिरूपतपसां सामर्थ्यसिद्धान्तयो-
स्त्वेकं विदधद्विनोति गुणिषु श्लाघा हतिं स्वात्मना ।
अन्यैःकारयति प्रधानगुणितां येनाऽयमुद्घाटितः, नि० ।९०।

वर्षं यावदनेकधा विषहिता बाधाः तुषारैस्तपैः,
पाथोभिश्च चतुर्विधाहृतिरुधोत्सृष्टान्यकायक्रियम् ।
ध्यानं धारयता च बाहुबलिनाऽस्माद्यन्न लेभेऽव्ययं, नि०।९१।

मानं स्वल्पमुपेत्य सद्गुणलवं याया जनोऽनीदृशो,
येन स्याद् भववार्धिपारगमनं दु (ष्प्राप्य) र्लम्मलाभं भवे ।
पीयूषं विषवत् फलेद्यदि तदा भैषज्यमन्यत् किमु, नि०।९२।

विश्राणे भवचारके शतविधे स्थानानि कर्माणुभि-
र्हीनाहीनतमानि जन्तुनिकरे का स्यान् मदस्याहृतिः ।
बालोऽपि श्रमणे स्थितो न मतिमानूर्ध्वंगतो माद्यति, नि०।९३।

विद्यन्ते भववार्धिगे न नियतस्थानानि जन्तुव्रजे,
केऽप्युच्चान्यवमानि यान्ति सुकृतैर्धामानि पापैस्तथा ।
इत्येवं क्षपयत्यनारतमिहात्मानं मुनिर्बोधभाग् नि०।९४।

देवर्द्धिर्निजबान्धवाश्रितपदैर्मत्तो मुधा नर्तयन्,
आत्मानं भवमर्जयज्जलनिधीन् कोटयोन्मितान् मानभाक् ।
अन्यस्मिन् भवभाजि मानमितरैः कुर्वत्यहो किं भवेत्, नि०।९५।

यस्याज्ञा प्रसरिष्यति मुनिजनैरुत्कीर्यमाणा चतु-
र्युक्ता विंशतिकाश्चतुर्भिरनुगा पुण्यादर्शांतिं प्रभोः ।
नावापान्तरपायसन्ततिमिदं मानात् श्रुतं पूर्वगं, नि०।९६।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

मानं तीर्थकरो जघान निगदन् तीर्थप्रणामं मुखे,
लब्ध्वा ज्ञानमशेषगं जनततेर्धर्मोपदेशोदिते: ।
तत्सेवामनुधावता मतिमताऽसौ हेय आप्तोदितेः; नि०।९७।

माया मल्लिजिनस्य किं न विहिताऽदाद्योषितां वेदनां,
ब्राह्मीं श्रीऋषभेशितुर्दुहितरं सैव व्यधात् सुन्दरीम् ।
सर्वार्थामरसम्पदां पदमभूत्तेषां चरित्रोत्थितं, नि०।९८।

शाठ्यात् प्रत्ययमुज्झिहाति मनुजस्तत्स्वात्मघातप्रदं,
जानानोऽपि जनो यतोऽनृतवचो मायाश्रितः संश्रयेत् ।
देवान् धर्ममुपासकान् गुरुवरान् मायी सदा वञ्चयेद्,नि०।९९।

माया कृष्णमहोरगी प्रतिदिनं वासं श्रयन्ती सदा,
या शुद्धा विरतिर्महोद्यमवता शुद्धात्मनोपार्जिता ।
तां हन्ति प्रगुणां शिवालयसहां निर्वास्यतां सा ततः,नि०।१००

क्रोधाद्याः स्फुटचिह्नसन्ततिधरा लक्ष्यन्त आर्यैः स्फुटं,
(सुखं) निर्वास्यन्त इहोदितात्मरमणैर्ज्ञानादरैर्भावुकैः ।
ईर्ष्याऽद्यावलीसम्भवा हृदि गता मायाऽर्जवेनान्तभाग् , नि०।।

तिर्यग्योनिविधानसाधनपटुर्माया यतो युग्मिषु,
जातो वारण आप्तवञ्चनपरो दानी नरो वाहनम् ।
श्रुत्वेत्याद्यकुलाधिपस्य सुहृदस्त्याज्या सदासौ बुधैः, नि०।१०२।

धर्मस्योद्गिरणं भवेत् सरलतामाश्रित्य शास्त्रानुगं,
किञ्चिन्नात्र पदं द्वितीयमुदितं यद्धर्मवाक्यं श्रुते ।
प्रोक्तं प्राच्यमुनीश्वरैर्ऋजुगुणं माया ततो जीयतां, नि० ।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

माया दोषहुताशनैकपवनः सौजन्यवृक्षानलः,
पापौघद्रुमसारणिः सुकृतभूच्छेदैकवज्राशनिः।
श्रद्धासानुपविर्विकारहृदयं सद्बोधचित्रे मषी, नि० ।१०४।

लोभो दोषवटस्य बीजमणीयो दुष्कृतराज्याश्रयः,
धर्मारामदवः समस्तमलिनाचारैकहेतुः सदा।
किञ्चिन्मात्रमुपेत्य कारणमसौ ऊर्मीव वृद्धिं भजेद् नि०।१०५।

शान्ता यस्य समस्तदोषनिवहाश्चत्वार आप्तेशितुः,
क्रोधाद्या निहताश्च कर्मनिचया वेद्यं विना साधुना।
लोभस्यैष लवं गतोऽपरिमितं संसारवासं श्रितः, नि०।१०६।

क्रोधाद्याः खलु नाशयेयुरखिलं प्रेमानुबन्धादिक-
मेकैकं निखिलास्तु तान् निसरयेत् लोभः प्रवृद्धः क्षणात्।
दुर्जेयः समनाशकोऽशमकरो जेयः सदाऽनीहया, नि०।१०७।

लोभो दुर्गतिवर्त्तनी शिवपुरस्वर्गार्गला पावकः,
सौजन्यादिगुणावलीसुरवने सर्वापदां संश्रयः।
श्रामण्यादिगुणौघवार्दपवनो हेयः सदा धर्मिभिः, नि०।१०८।

हिंसावारणविन्ध्यभूमिरनृतांम्भोराजिपाथोनिधि-
श्चौर्यारोपणचण्डवीर्यसहितो योषालिसक्तांतरः।
लोभोऽनर्थसमाहृतौ क्षमतरः किं तन्न लोभाद् भुवि, नि० १०९।
वार्धौ वारिचयोऽगराजिरमरोद्याने सुराणां व्रजो,
नाके सद्गुणसञ्चयो जिनवरे शक्रे चयः सम्पदाम्।
सामर्थ्यं भरतानुजे भुवि यथा लोभे च यो ह्यापदाम्, नि०

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

यावत्संभूतिसाधने पटुतमः स्वर्गद्रुपशूपमो,
भावोऽहं प्रभुरस्य मेऽद इति च जागर्ति जन्तोर्हृदि ।
तावद्धर्मगुणा जिनेशयमिनां स्थास्यन्ति नोक्तान्यपि, नि०।१११
देवान् लोभयुतो गुरून् परिभवेदाशातयेद्धार्मिकान्,
भृत्यान् वञ्चयते प्रतारयति च स्निग्धान् प्रहन्त्याश्रितान् ।
तत्तत्कार्यमसौ करोति विपदां येनोच्चयोऽवाप्यते, नि०।११२।
सङ्काशोऽपि गुणाकरो व्रतधरश्चैत्यस्य चिन्तां श्रितो,
बभ्रामाऽनणुपापपुञ्जजटिलः संसारवार्द्धौ भवान् ।
दुःखौघानमितान् तदेष महिमा नान्यस्य लोभादृते,नि०।११३।
दिग्वासाः शिवभूतिराप कुमतिं भिन्नं मतं मन्त्रितं,
चैत्यानि प्रतिमाः श्रुतानि मुषितान्येतेन मोक्षाध्वनः ।
लोपोऽकारि जिनेन्द्रधर्मगुरवो लोभात् समे गर्हिताः,नि०।११४।
नग्नाटैः प्रतिमाः पुरातनकृता नैकाः परावर्त्तिता-
स्तीर्थानि प्रबलानि शास्त्रनिचयाः कुग्राहमत्यातुरैः ।
उद्दाल्यात्ममते कृतानि तदिदं लोभान्धधीस्फूर्जितं, नि० ।११५।
आजिं देवगणा करोति विरसं लुब्धोऽसुराणां गणैः
स्त्रीरत्नायुधलोभलोपितमतिर्वैरानुबन्धाश्रयम् ।
देवानामपि चेदनर्थकरणो लोभस्तदा नृषु किम्. नि०।११६।
दैत्यानां भववीचि... मं सुरगणैर्वैरं हि स्वल्पोद्भवं,
तेनैते जिनराजमूर्त्तियमिनो निश्रित्य योद्धुं सुरैः ।
मन्त्र्याद्यं विनिवारिता अपि ययुर्लोभं ततः किं न धिक् !, नि०

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

श्रद्धायाऽऽप्तवचो विधाय विरहं तातप्रसूयोषितां,
पश्चात्प्राप्य महाव्रतानि पृतनां जित्वोपसर्गावलेः ।
मोक्षार्होऽपि मुधैकलोभलवतो भ्राम्यत्यनन्तं भवं, नि० ।११८।
मासादिक्षपकोऽपि शुद्धचरणः शस्तः सुरैर्भक्तित,
आरूढोऽपि सदा शमामरगिरौ लोभेरितोऽसौ पतन् ।
कृत्वा लूनविशीर्णमेतदखिलं वासं निगोदे श्रयेत् , नि०।११९।
इत्येवं सुगुरोर्निशम्य विविधं पाक कषायावलेः,
सम्बुद्धो जिनशासनागमगत श्रीक्षेमचन्द्रः सुधीः ।
संसारं मनुते ततः स विषमं कारागृहाभं सदा, नि० ।१२०।
कन्यायां निजबान्धवेन वचसा श्रीहीरचन्द्राभिधे-
नाऽऽत्तायामपि शुद्धवंशजनितौ तस्मै तथाप्यात्मनः ।
श्रेयः साधयितुं व्रतं गुरुमुखाच्छोलं (समादत्त यः), नि०।१२१
भ्रातृभ्यां विहितेऽपि दारकृतये गार्हस्थ्यभावाय च,
ज्ञातेयेन सहाग्रहेऽपि न मनाग्लीनं मनस्त्वाश्रवे ।
तस्याऽभूत् मुक्तावली तु निहितं तत्तस्य भावाद्यतेः, नि०।१२२।
आत्मश्रेय उदित्वरं हृदि सुधीः सञ्चित्य मौने लघु,
गत्वा श्रीनवसारिके गुरुवरादादात् प्रव्रज्यां शुभाम् ।
माणिक्याम्बुधिसञ्ज्ञकाद् वसुरसाङ्काब्जोन्मिते वत्सरे, नि०।१२३।
मार्गे मार्गमसौ महोदयपुरो मासे श्रितः संयमे,
तथ्यास्तस्य गुणा अनन्यसदृशा आजन्मशस्या बुधैः ।
येऽभूवन्नहि तान् क्षमो गणयितुं शक्रोऽपि नाकस्थितः, नि०

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

शान्तेर्धाम निरीहताकुलगृहं व्यावृत्तबुद्धेः स्थलं,
तस्मिं साधुगणस्य लीन उदितो भानुः पदे भाविनि ।
दीपः शासनसद्मनि भविमनःपद्मार्क आप्तोत्तमः, नि० ।१२५।
भक्तो यो गुरुषु गुरोर्गुरुषु च वात्सल्यकृत् साधुषु,
धर्मोद्योतविभावसुर्गृहिषु यः सौजन्यरत्नाकरः ।
पौषे वेद-वसु-क्षमेश-विधुगे (१९८४) वर्षेऽभवत् स्वर्गभाक्, नि०
व्यस्मार्षीद् गुरुराड् गुरोर्गुरुरपि सङ्घोऽपि यस्यानघं,
गायन् कीर्त्तिमरं स्वकृत्यमखिलं पुण्यात्मनोऽनर्गलम् ।
दृष्ट्वा कीर्त्तितनुं सदाऽमरतया नानन्दभाग् को नरः, नि०

इति आगमोद्धारक-आचार्यदेव-श्रीआनन्दसागरसूरीश्वर-
पट्टधर-श्रीमाणिक्यसागरसूरिशिष्यरत्न-
श्रीअमृतसागरमुनि-गुणवर्णनम् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# अमृतसागरमुनि-तीर्थयात्रा

यात्राः कृता मुनिवरामृतसागरेण—

आदौ स्तुतो जगडिये प्रभुरादिदेवः,
श्रीस्तम्भनाधिपतिपार्श्व जिनो द्वितीयः ।
पश्चासरोऽणहिलपत्तनगस्तृतीयः,
श्रीभोयणीपुरवरे प्रभुमल्लिनाथः ॥१॥

पार्श्व स्तुतो भिलडिये पुरमेतराणे,
श्रीमान् युगादिविभुरानत आदरेण ।
अस्तावि पानसरगश्चरमो जिनेशः,
श्रीमातरे सुमतिनाथजिनश्च सत्यः ॥२॥

दर्भावतीपुरि च लोढणपार्श्वनाथः,
शत्रुञ्जये जिनवरौघ उदित्वरौजाः ।
श्रीमालवे करमदी-बिबडोदपुर्यो-
रादीश्वरो मगसिपार्श्वजिनः सदिव्यः ॥३॥

पार्श्वोऽप्यवन्तिपुरि मण्डपगः सुपार्श्वः,
भोपावले ततततनुः प्रभुशान्तिनाथः ।
पार्श्वो वहीपुरि परासलिगो युगादिः,
श्रीशान्तिनाथजिनराट् पुरसेमलीये ॥४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

काश्यां सुपार्श्वजिनयुक् प्रभुपार्श्वनाथः,
स्वस्तावि तेन मुनिना विततेन प्रेम्णा ।
श्रेयांसनाथ उदितः पुरि सिंहनाम्न्यां,
चन्द्रावतिपुरि जिनेश्वरचन्द्रकान्तिः ॥५॥

सम्मेतगा जिनवराः प्रणताः स्वयुग्मं,
वङ्गागरे चरमतीर्थपपादयुग्मम् ।
यत्रर्जुवालिकसरिद्वहति प्रकामं,
यस्याभिधानमभवत् पुरजृम्भिकेति ॥६॥

श्रीवासुपूज्यजिनराड् नगमन्दरे च,
चम्पापुरे सुविधिरानुतसाधुराजा ।
काकन्दिके प्रचुरभक्तिभरेण नाथः,
श्रीक्षत्रिये पुरि च माहनकुण्डनाम्नि ॥७॥

कल्याणकत्रितयभूमिरिहान्तिमेशः,
श्रीसुव्रतस्य पुरि राजगृहे चतुष्कम् ।
सच्छ्रेयसां नगवरा विपुलादिकाश्च,
जन्मोदधिं लघु तरीतुमुदारपोताः ॥८॥

पञ्च स्तुताः सततभक्तिभृता प्रमोदात्,
श्रीवीरनिर्वृतिपदं नगरी च पापा ।
जन्मस्थलं च वडगाममिहेन्द्रभूतेः,
कल्याणकव्रजपदं पुरि कौशलायाम् ॥९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

श्रीधर्मनाथजिनपस्य चतुष्कमैह्न,
सत्श्रेयसां गुणपदं पुरि रत्ननाम्न्याम् ।
काम्पील्यगं च विमलाभिधतीर्थराजः,
श्रीराणके पुरवरे महिमप्रधानः ॥१०॥

त्रैलोक्यदीपकनिभे पृथुले जिनेशः,
श्रीआदिराड् नड्डुलधाम्नि च पद्मकान्तिः ।
सिद्धाद्रिरैवतगिरिप्रतिमे च शैल—
द्वन्द्वे युगादिजिननेमिजिनेशयुग्मम् ॥११॥

चैत्यालयालिरनिशं प्रभुरूपयुक्ताः,
पार्श्वः स्तुतश्च वरकाणपुरे महिम्नाम् ।
धाम्न्यबुर्देऽचलगिरौ च जिनेशपङ्क्ति-
र्दृष्टा स्तुता भविमनःकमलालिहंसः ॥१२॥

नाणे च नन्दिकपुरे वरबांभणे च,
व्हेडे पुरे विजुविवीरजिनेशमूर्त्तिः ।
सेपाटिकापुरि च वीरविभुर्महाढ्यः,
नन्दे समे समिनके च जिनेशपार्श्वः ॥१३॥

मूर्त्तिर्नतोदयपुरे वरपाद्मनाभी,
दीपालिकाऽऽहडपुगेः पुरि नाइकायाम् ।
श्रीमद्धुलेवनगरे प्रभुरादिनाथः,
ख्यातप्रभो जगति केसरियेति वित्तः ॥१४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

दृष्टः स्तुतोऽमितमुदा महिमानिधानं
आनन्दसागरगणेः स्वगुरुप्रमोश्वा-
रोपे सहायमकरोद् ध्वजदण्डयोर्यः ।
श्रीमद्धुलेवनगरे गुणिनो हितस्य,
तस्याऽसमानगुणरत्नमहार्णवस्य
यात्रास्थलावलिगतं प्रथनं मुदेऽस्तु ॥

इति अमृतसागरमुनिकृत–तीर्थयात्रा ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

# अमृतसागरमुनि-स्तुत्यष्टकम् ।

अमृतसागरं मुनिवरं सदा भजत भावतः सद्गुणाकरं, ।
शिशुदशायुतः प्रशमपात्रतां श्रुतमतां गतः सद्गुरूदितैः ।
विनयभाजनं सुजनसङ्गतो निकटसिद्धिकः सद्गुणे रतः,
प्रतिदिनं प्रगे जिनवरार्चनं समसृजन् मुदा सत्पदार्थिकः ॥१॥

गुरुवचोऽमलं हृदि निधारयन् जिनपतेर्मतं शान्तिदायकं,
मनसि सारयन् मुदमुदीरयन् समयदेशिनां धर्मबोधने ।
वचनमानयन् सुकृतसाधने वितथतोज्झितं चित्तपङ्कजे,
सफलजन्मिता दधदुपाश्रये वसतिवर्यतां बोधतो व्रजन् ॥२॥

समयसागराद् वचनवर्णिकां मणिगणोपमां दायवर्जितां,
समवधारयन् सुकृतमार्गगं जनगणं मुदा धर्म (मुद्गृणन्) ।
निजमतिप्रमं वचनमुद्गिरन् सरलभाविके भावुकं ददद्,
गृहिदशां श्रितः श्रमणभावनां जगति साधयन् प्राप निर्वृतिम् ।३।

उषित आग्रहादनुजबन्धुना गृहधृतौ कृताद् दिष्टमल्पकम्,
पटुकृतं ततः विषयवारणं कनककामिनीयुग्ममुज्झत् ।
स्वजनसंहतेः प्रणयकारणं भवभयोज्झितो मार्गमादिशन्,
श्रमणताश्रयं विरतिधारणं सततशुद्धिभाक् प्राप काङ्क्षितम् ॥४॥

श्रमणतां श्रितो धृतिबलं गतो वयसि बालकः षोडशाब्दिके,
सुरतपत्तनात् शुभमनोरथोऽगमदपापहृत् [1]नूत्नसारिके ।

---

१ नवसारीग्रामे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner

ततमहोत्सवं व्रतमसौ दधत् शुशुभ आर्हतो धर्मसारथिः,
गुरुपदेऽकरोत् सुगुणसेवधिं शमपयोभृतं माणिक्याम्बुधिम् ॥५॥

विततभावनश्चरणमासदद् व्रतकथोद्भवं स्तम्भने पुरे,
प्रथमवार्षिकं नगर [1]श्रीकरे कुमर (ऽणहिल) पत्तने जैनपूर्वरे ।
सुरतबन्दरे वसति पञ्चमे मुमहिबन्दरे जन्मधामनि
विमलभूधरे नवममात्रसत् समयवाचने पूर्णतां गते ॥६॥

[2]सइलने पुरे द्वितयमावसद् युगलमाब्दिकं रत्नपूर्वरे,
कलकतेऽजिमे मरुधरे पुनः पुरि च सादडीनाम्नि वार्षिकम् ।
उदयपूर्वरेऽवसदनन्तिमे मन उपाह्वन् संयमे दिवं,
विमलपञ्चमीदिवस आसदद् मुनिवरैः स्तुतः पौषमासि यः ॥७॥

अभिनुतो यमी शमिगणैः सदा नियममाचरन् शुद्धभावतः,
सकलसाधवो गणविचिन्तनं नयनगोचरे कुर्वतोऽनिशम् ।
व्रतिगुणोद्धुरं सततमानमुः श्रमणशेखरास्तं गुणोद्यतं,
वदति मोदतोऽवितथवर्त्तनं सदुदयो महानन्दसागरः ॥८॥

इति आगमोद्धारक-आचार्यदेव-श्रीआनन्दसागरसूरीश्वर-
पट्टधर-श्रीमाणिक्यसागरसूरिशिष्यरत्न-
श्रीअमृतसागरमुनि - स्तुत्यष्टकम् ।

---

१ छाणीग्रामे  २ सैलानाग्रामे

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust
Scanned by CamScanner



मुद्रकः—
जैनबन्धु प्रिंटिंग प्रेस,
कसेरा बाजार, इन्दौर नगर.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust
Scanned by CamScanner